CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.13
Coll. No. 970

Title Cit. prabhā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 270 Subject: Grammar.

Title: Cit prabhā

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11.5" by 4.3" Extent: 82 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: Incomplete.

प.शे.चि. ॥श्रीगणेशायनमः॥ ॥श्रीमत्सीतालक्ष्मणभरतशत्रुघ्नादिपरिवारसमेतश्रीरामचंद्रःस्वामीसहायः॥ ॥नमःश्रीसच्चिदानंदमूर्तये

१ परमात्मने।सर्वेष्टसिद्धिर्भवतियत्कृपालेशमात्रतः॥१॥चित्प्रत्मानामिकांव्याख्यांपरिभाषेंदुशेखरे।बालानामुपकारायकुर्वे भा

ष्यप्रदर्शिकां॥२॥स्वचिकीर्षितनिर्बंधसमाप्तिप्रतिबंधकदुरितप्रशमायशिष्टाचारप्राप्तिपालनायचशिष्टाचारानुमितश्रुतिप्र

माणकंनिखिलजगद्गुरुश्रीपरमेश्वरनमनात्मकंमंगलमाचरन्स्वचिकीर्षितंप्रतिजानाति।नत्वेत्यादिना।तत्रचतुर्थ्याःशब्दानांप्र

वृत्तिरितियस्मिन्कस्मिंश्चित्पुरुषविशेषेसंज्ञात्वेनविनियुक्तइतिसंज्ञाशब्दः।तत्रतेनरथकाराधिकरणन्यायेनयोगजोपस्थितिंप्र

तिरूढ्यर्थोपस्थितेःप्रतिबंधकत्वात्पुरुषविशेषोपस्थितौकश्चिन्नागेशःपुरुषविशेषःपरिभाषेंदुशेखरंकुरुतइत्यन्वयः।त्रया

शब्दानांप्रवृत्तिरितिपक्षेतुनसंनियदृच्छाशब्दः।तत्रनागेशशब्दःषष्ठीशब्दस्तस्यचगुणशब्दत्वंभावः।व्यक्तिविशेषेतुतत्रगुणारो

पेणारोपेणप्रवृत्तिः।तत्ररथकाराधिकरणन्यायानवतारात्।नागानामीशोनागेशइतिव्युत्पत्त्याशेषस्यापिमुख्यार्थस्यग्रहणेना

गेशःशेषोमहाभाष्यकृदपरिभाषेंदुशेखरंकुरुतेइत्यन्वयः।अनेनतस्यशुद्धसत्वात्मकोपाधिकत्वेनसर्वज्ञत्वंतत्स्मरणशीलत्वात्स्वस्यएक १

त्वेनाहमितिसूचितं।अथवासर्वांतर्यामित्वेनसर्वबुद्धिप्रवर्त्तकत्वात्तस्मिन्प्रयोज्यकर्तृत्वंप्रयोजकेआरोप्यइदमपिकुरुतेइतिव्यवहा

रइतिभावः।नन्वेवंतस्यसर्वेश्वरत्वप्रतिपत्त्यातत्प्रतिस्वस्यनमस्कार्यतासंभवइतिचेन्नैवं।एकस्यैवब्रह्मणउपाधिभेदेननियम्यनि

यामकभाववन्नमस्कार्यत्वनमस्कर्तृत्वभावसत्त्वेबाधकाभावात्।नागेशशब्दःसंज्ञाशब्दइतिपक्षेकुरुतइतिप्रथमपुरुषप्रयोग

शास्त्रप्रख्यातभावदर्शनात्स्वकीयेस्वस्याभिमानाभावःसूचितः।किंकृत्वेत्याकांक्षायामाह।नत्वासांबमिति।अत्रसांबमितिविशे

षोपादानमितररूपंविशेषणं।नन्वेवंयासहवर्तमानोमहादेवस्तस्याचिताभस्मलेपादिमत्त्वेनामंगलस्वरूपत्वात्तन्नमस्कारेण

मंगलसिद्धिरितिशंकावारणायशिवमिति।एतेनतस्यमंगलस्वरूपत्वेनतन्नमस्कारेमंगलप्रदत्त्वंसूचितंभवति।तथाचोक्तं।

श्मशानेष्वाक्रीडास्मरहरपिशाचाःसहचराश्चिताभस्मालेपःस्रगपिनृकरोटीपरिकरः।अमंगल्यंशीलंतवभवतुनामैवं

मखिलंतथापिस्मर्तॄणांवरदपरमंमंगलमसि।नन्वेवमपितस्यव्याप्तिविशेषस्यस्थानविशेषस्थत्वेनस्थानांतरेमंगलप्र

दत्त्वमनुपपन्नमित्याशंक्याह।ब्रह्मेति।तेनतस्यपरिपूर्णत्वेनसर्वत्रव्यापकत्वान्नतदनुपपन्नमितिसूचितं।अथवाब्रह्मेतिविशे

प.भा. ष्यं। न च ब्रह्मशब्दस्य मायावाचकत्वेन तस्याप्यानर्थहेतुत्वेन न तन्नमस्कारे मंगलसिद्धिः फलमित्याशंकानिरासाय शिव
२ मिति विशेषणं। तेन मायाव्यावृत्त्याऽद्वितीयब्रह्मणो ग्रहणे तत्सिद्धिरिति सूचितं। शिवशब्दस्याद्वितीयब्रह्मपरत्वं च प्रसि
द्धं शिवं शांतमद्वयं चतुर्थं मन्यंत इति मांडूक्यश्रुतौ। नन्वेवमपि तस्याद्वितीयत्वेन निर्विशेषत्वान्नमस्कार्यत्वासंभव इत्यतः
सांबमिति विशेषणं तेन तस्य मायाशबलत्वेन सविशेषत्वान्नमस्कार्यत्वसंभव इति सूचितं। नमस्कारपदार्थश्च मत्तस्त्व
मुत्कृष्टस्त्वतोऽहमपकृष्ट इत्याकारकबुद्ध्यनुकूलो व्यापारः। ग्रंथकरणस्य प्रयोजनं निर्दिशति बालानामिति। बालत्वं चात्र
निष्कृष्टपरिभाषार्थानभिज्ञत्वं। बालसंबंध्यनायासपूर्वकबोधोपकारकप्रकृतविशेषणविशिष्टसांबनमस्कारपूर्वक
नागेशाभिन्नकर्तृकः भविष्यत्कालिकपरिभाषेंदुशेखरनामकग्रंथनिष्ठोत्पत्त्यनुकूलो व्यापार इति समुदितवाक्यार्थः॥
यद्यपि परिभाषेंदुशेखरमिति परिभाषा ज्योत्स्ना तया युक्त इंदुः शेखरे शेखरो वा यस्य तमिति व्युत्पत्त्या सांबविशेषणं
संभवति तथापि अत्र कर्माकांक्षायां निबंधनीति कर्मवाचकपदाध्याहारे दोषः। स्वसंनिहितकर्मवाचकपदं परित्यज्य तदध्या २

हारस्यान्याय्यत्वात् चिकीर्षितग्रंथस्य नामांतरनिर्देशाकरणापत्तेश्च ग्रंथपक्षे परिभाषेंदुः शेखर इव शेखरो भूषणं यस्येति यस्य तमि
त्यर्थः। पूर्वोक्तपक्षे परिभाषेंदोर्विशेषणं रहुयत्नत्ववारणाय। अत्र वर्तमानसामीप्ये वर्तमानवद्वेति भविष्यति लट्। अत्र ना
गेश इति स्वनामग्रहणे शिष्यादौ विन्यासेस्मृत्युक्तदोषाभावः सूचित इति बोध्यं। सामान्यतः स्वचिकीर्षितं प्रतिज्ञाय विशेषतस्तं प्र
तिजानीते प्राचीनेत्यादिना। प्राचीनवैयाकरणा इंद्रादयस्तेषां तंत्रे शास्त्रे वचनरूपेण सूत्ररूपेणापठितान्यनिनस्मन्नित्यादीनि
यानि परिभाषारूपाणि तानि व्याख्यायंत इत्यन्वयः। किंच पाणिनीयतंत्रे ज्ञापकन्यायसिद्धानि तानीत्यन्वयः। अत्र ज्ञापकन्यायसिद्धा
नीत्युक्त्यास्त्वपाठस्य परिभाषाणां नात्र मानमिति सूचितं। ज्ञापकसिद्धं न्यायसिद्धं बहिरंगमित्यादयः। न्यायसिद्धास्त्वेकदेशविकृ
तमनन्यवदित्यादयो बोध्याः। अत्र न्यायस्य लौकिकत्वेन तदपेक्षया ज्ञापकस्य शास्त्रीयत्वेनाभ्यर्हितत्वात्तस्य पूर्वनिपातः। एतेन ज्ञा
पकन्यायसिद्धानीत्यत्र तत्पुरुषगर्भितज्ञापकन्यायसिद्धेति द्वंद्वेऽल्पाच्तरत्वेन न्यायशब्दस्यैव पूर्वनिपातेन भवितव्यमित्याशंकाप
रास्ता। ननु प्राचीनोपेक्षितज्ञापकसिद्धानां संज्ञापूर्वको विधिरनित्य इत्येवमादीनामपि पाणिनीयतंत्रीयत्वेन प्रामाण्यस्योरनिष्प्रती

प॰भा॰चि॰ पक्षत्वात्करिष्यमाणं तत्खंडनमयुक्तं स्यादित्यत आह। भाष्यवार्तिकयोरिति। ओर्गुणेत्यादिपाणिनीयसूत्रस्य गुणादिग्रहणस्य तज्ज्ञा-
३ पकत्वेन तं त्रायत्वेपि भाष्यवार्तिकनिबद्धत्वाभावेन तासामप्रामाण्यमव्याहतमेवेति भावः। स्पष्टीकरिष्यते चैतदुपरिष्टात्। अने-
न भाष्यवार्तिकनिबद्धत्वमिति परिभाषापदस्य रूढ्यर्थतावच्छेदकमयुक्तमिति विदितव्यं। अतः शुद्धरूढमिदं परिभाषापदं। प-
रितो व्याप्तां भाषां प्रचक्षते इत्यभियुक्तोक्तेर्योगरूढपरिभाषापदमित्यपि केचिद्वदंति। एतावता शुद्धयौगिकमिति सर्वव्यापिना-
स्तीति प्रतीयते। लिंगवत्त्वे संदिग्धार्थनियामकत्वं परिभाषात्वमिति लक्षणं तु अष्टाध्यायीपाठस्थानेत्यादिपरिभाषासूत्राभिप्रा-
यकं। अन्यथा वर्णाश्रयेनास्ति प्रत्ययलक्षणं एकदेशविकृतमनन्यवदिति निषेधादिविशेषु तत्तद्भावेन व्याप्तिरापद्येत। व्याख्या-
यंते इत्यस्य व्याख्यानविषयीक्रियंते इत्यर्थः। तत्त्वं च पदच्छेदाद्यन्यतमत्वं। तदुक्तं। पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना
। आक्षेपोथ समाधानं व्याख्यानं षड्विधं मतं इति। अथवा व्याख्यानं पदच्छेदाद्युक्तिद्वारा विशेषेण आक्षेपपूर्वकसमाधानकथनं
। षड्विधमित्युक्तिस्तु विशिष्टैकलक्षणाभिप्रायेणापि योज्या। क्वचित्कस्यचिदनुक्तिस्तु सौलभ्याभिप्रायेण। ऊहनीयमनुक्तमपि सर्व- ३

त्राभिमता। ननु प्राचा नोत्प्रेक्षित ज्ञापकसिद्धातिरिक्तानामेव। एतासां तु पदच्छेदाद्युक्तिद्वारा आक्षेपकथनमेवेति विरु-
द्धं व्याख्यानमिति विवेक्तव्यं। अतोत्र विशिष्टसूत्रेण विशिष्टविरुद्धेतदुभयपरः। वर्णांतरोपादाने संभवति अइउणिति लणि-
ति सूत्रद्वयेपि णकारस्योपादाने ढ्रलोपे पूर्वस्य दीर्घोणः। केणः। अणोप्रगृह्यस्यानुनासिकः। उरण्रपरः। अणुदित्सवर्णस्य
चाप्रत्यय इति सूत्रेषु अण्ग्रहणे इणः षीध्वमित्यादिष्विण्ग्रहणे संदेहः स्यात् तथा सति संदिग्धार्थबोधकस्य लक्षणस्याप्रामा-
ण्यं शास्त्राणामापद्येतेत्याशयेन व्याख्यानत इति प्रथमपरिभाषामवतारयति नन्वित्यादिना। शिष्टसत्तादिति। शिष्टाश्चात्र
भाष्यकारादयः। तत्त्वं च सकलशास्त्रार्थविषयकभ्रांतिराहित्यं। ननु संदेहाच्छास्त्रस्य लक्षणत्वनिषेधासंभवाद् लक्षणमि-
त्यनुपपन्नमित्यत आह। अननुष्ठापकमिति। तथा च लक्षणशब्दोत्रानुष्ठापकपरः। तदर्थांतरभावेनैव न स्वतन्त्ररूपः। तथा
च अलक्षणमित्यस्याननुष्ठापकमित्यर्थः पर्यवस्यति तथा सति संदेहाच्छास्त्रस्य लक्षणत्वनिषेधासंभवेप्यननुष्ठापकत्वनिषे-
धेन किंचिद्बाधकमिति भावः। ननु ढ्रलोपे पूर्वस्येति सूत्रे नाण्ग्रहणे संदेहः। अत्रत्याण्ग्रहणसामर्थ्यादेव पूर्वेणैवाण्ग्रहणमिति ज्ञाप

चित्
४

नात्। अन्यथा ढ्रलोपे पूर्वस्य दीर्घोऽच इत्येव वक्तव्येऽजित्य भविष्यच्च इत्युपस्थित्या वाऽण्ग्रहणमनर्थकं स्यात्। तथैव केऽण इत्यत्रापि
केच इति वक्तव्येऽण्ग्रहणसामर्थ्यादणः पूर्वेणैवेति न संदेहः। एवमणोऽप्रगृह्यस्यानुनासिकः इत्यत्रापि अजिति वक्तव्येऽण्ग्रहण-
सामर्थ्यादणः पूर्वेणैवेति न संदेहः। उरण्रपर इत्यत्राप्यण्ग्रहणसामर्थ्यात्पूर्वेणैवेति न संदेहः। अन्यथा तु रपर इत्येव पाणि-
निर्ब्रूयात्। उःस्थाने परस्याणोऽसंभवात्। न चासंभव इत्ययुक्तं कर्त्रर्थे हत्रर्थे इत्यत्र संभवात्। संभवेपि फलाभाव इति न वाच्यं।
रपरत्वे रेफद्वयस्य श्रवणस्यैव फलत्वात्। न चैवमपि हलो यमां यमि लोप इत्येकस्य लोपो भविष्यतीति वाच्यं। तत्र झयो ह इत्यतोऽन्यतरस्या-
मित्यनुवृत्तेः। पक्षे रेफद्वयश्रवणस्य तदवस्थत्वादिति चेन्न। रो रि इति नित्यं लोपे सति पूर्वोक्तफलासंभवेनासंभवस्य युक्तत्वात्। नन्वे-
वमप्यसंभव इत्ययुक्तं। मातॄणां पितॄणामित्यादौ संभवात्। तत्र फलाभावस्त्वयुक्तः। रपरत्वफलस्य स्पष्टत्वादिति वाच्यं। तत्र संभवेपि
ज्ञापकेन फलाभावे सति तस्य पराहतत्वात्। ज्ञापकं च ऋत इद्धातोरिति सूत्रे मातॄणां पितॄणामित्यत्र व्यावृत्त्यर्थं धातुग्रहणं ज्ञापयति न
चात्र रपरत्वं। अन्यथा रपरत्वे नत्वाद् अप्रसक्तौ तद्व्यावृत्त्यर्थं धातुग्रहणमनर्थकं भवेदिति। अणुदित्सवर्णस्य चाप्रत्ययः इत्यत्रापि अ- ४

ण्ग्रहणं परेणैव न पूर्वेणेति न संदेहः। अन्यथा दीर्घव्यावृत्त्यर्थं क्रियमाणस्तपरकरणं निरर्थकं भवेत्। नन्वत्र परेणाण्-
ग्रहणमिति ज्ञापितेपि ऋकारस्य विधीयमानत्वेन भेदकाभावग्रहणाप्रसक्तौ तपरकरणं व्यर्थमिति वाच्यं। सिद्धऋकारानुवादस्य इ-
दिसंख्यार्थत्वेन तस्य विधेयत्वासंभवात्। अचिश्नुधात्विति सूत्रेऽर्धमात्राद्यवारिणीति वक्तव्ये ग्रहणसामर्थ्यादिण्ग्रहणं सर्वत्र
परेणैव न पूर्वेणेति न संदेह इति लण्सूत्रस्थभाष्योक्तज्ञापकेनैव संदेहनिवारणे तद्व्यावृत्त्यर्थत्वेन परिभाषा निरर्थका भवेदित्य-
त्राह। असंदिग्धानुशासनेनासंदिग्धोच्चारणरूपाचार्यव्यवहारेण तत्र संदिग्धप्रदेशे ज्ञाप्यत्। तथाचायमेतस्यार्थः। संदि-
ग्धार्थप्रतिपादकाण्कारोच्चारणरूपाचार्यव्यवहारेणेति तत्तत्स्थले संदेहनिवारणार्थत्वेन तत्तज्ज्ञापकाश्रयेणैव प्रतिपत्तिगौर-
वात्सर्वत्र ज्ञापकमेवेति नियमाभावाच्चेयमावश्यकीति भावः। अत एव भाष्ये ज्ञापकानि षदनादरेणैव किंपुनर्वर्णोत्पन्ना विवा-
यं णकारोऽहिरनुबध्यते तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमित्युक्तं। एता-
वता संदेहनिवृत्तौ व्याख्यानमेव शरणं ज्ञापकानुसरणक्लेशो मुधेति फलितं। एतदेवानंतरमाणुदित्सवर्णपरिहाय पूर्वेणैवाणग्र-

चित् हणंपरेणैवेणग्रहणमिति व्याख्यास्याम इति स्पष्टीकृतं भगवता भाष्यकृतेत्याह। तेनेति। तच्छब्दोऽत्र व्याख्यानपरामर्शकः। तथा चैत
५ द्भाष्यविरोधादेव ज्ञापकादेव संदेहनिवृत्तिर्न व्याख्यानमात्रादिति सीरदेवाद्युक्तिर्निरस्ता वेदितव्येति सूचयन्तीति कः। ननु व्याख्यान
तइतिपरिभाषां समाप्यैतत्सजातीयपरिभाषान्तरावसरे कार्यकालमितिपरिभाषाद्वयमत्रासंगतं। अतएव चैतद्द्वयं सीरदेवा
दिभिर्नोक्तमित्याशंक्य संज्ञापरिभाषाशास्त्राणां सर्वशास्त्रोपकारित्वेनादौ यथोद्देशत्वं तथा कार्यकालमितिपरिभाषाद्वयस्यापि
सर्वपरिभाषोपयोगित्वादत्रोल्लेख उचित इति शङ्कादर्शनपूर्वकं परिहरन् परिभाषाद्वयमवतारयति तत्रेति। तयोराद्यं परिभा
षार्थं वक्तुं तद्घटकीभूतयथोद्देशपदार्थं चाह। उद्देशमनतिक्रम्येति। उद्देश इति। एवं चान्यत्र प्रत्यक्षमाख्यानमुपदेशो गुणैः प्रा
पणमुद्देश इत्युद्देशोपदेशयोर्भेदेपि न तथा प्रकृते। अत एवोद्देशापदेश एवेति सूचितं। अत्रायं वाक्यार्थः संज्ञापरिभाषं यथोद्दे
शं स्वोच्चारणकालमनतिक्रम्य वाक्यार्थबोधं जनयतीति तथा च स्वोच्चारणदेश एव वाक्यार्थबोधेन वृद्धिरादैजित्यादिसंज्ञाविध
येवृद्ध्यादिपदानामादैजादिग्रहीतशक्तात्तद्विधिशास्त्रे वृद्ध्यादिपदे दृष्टे बोधकवशात्तदर्थस्मृतौ तत्तद्विधिवाक्यार्थबो ५

धो भवति। परिभाषाविषयेऽनुगृहीतपरिभाषार्थेनैव तत्तद्विधिस्थले तत्तदर्थस्मृतौ लक्ष्यसंस्कारकवाक्यार्थबोध इत्यस्मिन्नंशेपि
सर्वेष्टसिद्धिर्भवतीत्याह। यत्रेति। ननु यत्र देश इत्युक्त्या व्यपदिश्यते उच्चार्यते तस्मिन् देश इति व्युत्पत्तौ फलितायामुच्चारणदेश एवो
पदेश इत्यायाति। तन्नयुक्तं। उच्चार्यत इत्यस्य उच्चारणक्रियया निष्पाद्यत इत्यर्थो वाच्यः। तथा चोच्चारणक्रियानिष्पन्नस्य शास्त्रस्या
काशदेशस्थत्वेन तद्बोधस्य च ज्ञानरूपत्वेनात्मनिष्ठत्वात् वृत्तिरूपेणान्तःकरणनिष्ठत्वाच्चोनयोः सामानाधिकरण्यासंभवात् दे
श एव वाक्यार्थबोधेनेत्यस्यासंगतेरित्यत आह। देशश्चेति। लक्षणयेति शेषः। चशब्दस्त्वर्थे बोध्यः। तथा च भिन्नदेशनिष्ठानामपि
पदार्थानां कालावच्छेदेन तात्कालिकसामानाधिकरण्ये न किंचित्प्रतिबंधकमिति भावः। ननु यत्र काले उच्चारणं संज्ञापरिभाषाशा
स्त्रस्य तदानीं विधिवाक्यार्थज्ञानेन किमस्य फलमित्याकांक्षायां तस्याः पूर्त्यभावेन निराकांक्षवाक्यार्थबोधानिष्पत्तेर्नायं पक्षः
श्रेयानित्याकांक्षां मनसि निधायेदूदेद्द्विवचनं प्रगृह्यमिति सूत्रे दीर्घाणामेव तपराणां प्रगृह्यसंज्ञेति प्रकृते तत्र दीर्घाणां चोच्च
मानाप्लुतानां न प्राप्नोतीत्याशंक्यासिद्धत्वेन समाधाय अनंतरं चैवमपि यत्सिद्धं प्रगृह्यकार्यं तत्प्लुतस्य न प्राप्नोति अणो प्रगृह्यस्यानुना

चित्
६

सिकइतीतिपुनराशंकाएवंतर्हि किं नेतेन कालसंज्ञापरिभाषमितियथोद्देशमेवसंज्ञापरिभाषंअत्र चासावसिद्धस्तस्यासिद्धत्वात्का
र्यकालाभवंतीतिपरिहृतंभाष्यकृता। तत्र च केयटेन कार्यकालपक्षमाश्रित्यादेत्येवमपीतिशंका भाष्यमवतार्यअग्रेयथोद्दे
शपक्षाश्रयणेनपरिहारइतिएवंतर्ह्येतिपरिहारभाष्यस्यतात्पर्यंवर्णितं। अनंतरं च कथं पुनरयं पक्षोयावताकार्यार्थत्वात्संज्ञा
यस्यकालत्वमेवन्याय्यमित्याशंक्यनैषदोषः यदानुद्दिश्यप्रयोजनविशेषंप्रयोजनमात्रमभिसंधायभविष्यतिकिंचिदनेन
प्रयोजनमितिसंज्ञापरिभाषंप्रणीयतेतदाभवत्येवायंपक्षोयथाश्रुतग्राहिप्रतिपत्रपेक्षइतिसमाहितं। तथाचैतत्कैयटग्रंथ
पर्यालोचनयामहावाक्यमहावाक्यार्थपर्यालोचनप्रवृत्तिप्रतिपत्तारंप्रत्येतत्पक्षस्यदुष्टत्वेपियथाश्रुतग्राहिप्रतिपत्तारंप्रतित्व
यंपक्षःश्रेयानेवेतिनपूर्वोक्तदोषप्रसक्तिरित्याहुः। तत्तद्वाक्यार्थबोधेति। तथाचैतन्मतेयथोद्देशपक्षेसंज्ञापरिभाषयोःस्वदेशे
ऽलक्ष्यसंस्कारकवाक्यार्थबोधस्तदुत्तरंविधिप्रदेशेतदुपस्थित्यावाक्यैकवाक्यतायांतत्रलक्ष्यसंस्कारकवाक्यार्थबोधः। कार्य
कालपक्षेतुविनैवस्वदेशेवाक्यार्थंविधिप्रदेशेतदुपस्थितोपदैकवाक्यतयात्वयेलक्ष्यसंस्कारकवाक्यार्थबोधइतिफलितं। ६

एतच्चयथोद्देशपक्षावच्छेदेनपरिभाषांशेषष्ठीस्थानेयोगेतिसूत्रस्थभाष्यविरुद्धं। तत्र हि भस्यावयवषष्ठ्यादिषुसंदेहःप्रकृ
तो। अथवाकिंचिल्लिंगमासज्यवक्ष्यामिइत्थंलिंगाषष्ठीस्थानेयोगाभवतीति। नचतल्लिंगमवयवषष्ठ्यादिषुकरिष्यतेइतिप
क्षांतरमाश्रितंतत्रयद्येवंशासइदङ्हलोःशाहेत्रासिकरणंकर्तव्यंस्थानेयोगार्थंलिंगमासंज्यामात्याशंक्यनकर्तव्यंयदे
वादेःपुरस्तादवयवषष्ठ्यर्थंप्रकृतंएतदुत्तरत्रानुवृत्तंसत्स्थानेयोगार्थंभविष्यतीतिचसमाधायतदुत्तरंकथमतिप्रसंगः
धिकारोनामत्रिप्रकारःकश्चिदेकदेशस्थःसर्वंशास्त्रमभिज्वलयतियथाप्रदीपःसुप्रज्वलितःसर्वंवेश्माभिज्वलयति। अप
रोयथारज्वाऽयसावाबद्धंकाष्ठमनुकृष्यतेतद्वदनुकृष्यतेचकारेण। अपरोऽधिकारःप्रतियोगंतस्यानिर्देशार्थइतियोगेऽ
योगेउपतिष्ठतइत्युक्तं। तत्रदीपस्यप्रभाद्वारासर्वप्रकाशकत्ववदेतस्यापिस्वबुद्धिजननद्वारासर्वशास्त्रोपकारकत्वमित्याशयः
।कश्चिदेकदेशस्थइत्याद्यभिज्वलयतीत्यंतंभाष्यस्यपक्षद्वयसाधारण्येनतस्मात्पक्षद्वयेपिपदैकवाक्यतायाःप्रतीत्याविरोध
स्यस्पष्टत्वात्। नचैतन्भाष्यादधिकारप्रक्रमादधिकारविषयेतथात्वेपिपरिभाषाविषयेतथात्वस्यापितुमयुक्तत्वेनविरोधापादन

वित
७ मप्युक्तमिति वाच्यं। पारार्थ्यसामान्येनैतस्यापि परिभाषाभ्युपगमात्। अत एव तत्रैव बाधिकारो नामेति प्रतीकमुपादाय पारा-
र्थ्यसाम्यात्परिभाषाप्यधिकार इत्युच्यते इति कैयटः। तथा सति भाष्यविरोधस्य स्पष्टत्वान्न तथा परिभाषाश्रयणं युक्तमित्यरु-
च्या परिभाषाविषये स्वाभिप्रेतार्थमाह। केचित्त्वित्यादिना। इमामेवारुचिं मनसि निधाय पूर्वत्र कैयट इत्युक्तं। ननु पक्षद्वये-
पि पदैकवाक्यतायां। कार्यकालपक्षाद्यथोद्देशपक्षस्य न कश्चिद्विशेषः सिध्येत्। तथा सति ईदूदेदिति सूत्रस्य कार्यकालं
संज्ञापरिभाषमिति संज्ञापरिभाषाविषये पक्षद्वयव्यवस्थापनपरं भाष्यं विरुध्येतेत्यत आह। तत्रैतावानिति। तावता
विशेषेणैव पक्षद्वयस्थापनेपि न भाष्यविरोध इति भावः। क्ङिति चेति सूत्रे वार्त्तिककृतोपधायेनिमित्तग्रहणस्य कर्तव्यता
चोदितान्तत्वात्प्रत्याख्यानायाथवा कार्यकालमिति पक्षांतरमाश्रित्याथवा यदेतस्मिन्योगे क्ङिद्ग्रहणं तदनवकाशं। तस्यानवका-
शत्वाद्गुणवृद्धी न भविष्यत इति पुनः पक्षांतरमाश्रितं भाष्यकृता। तत्र चाथवेति प्रतीकमुपादाय माभूत्परिभाषा तथापि प्र-
तिषेध्याकांक्षायां यावंतो यादृशाः प्रतिषेध्यास्तावंति षेधसूत्राणि इति प्रसंगं तत्र लघूपधगुणे प्रतिषेधस्याभावेऽनवकाशः प्रति ७

षेधोऽव्यवहितेपि प्रवर्त्तत इत्युक्ताऽव्यवाय यथोद्देशपक्षाश्रयणेन भाष्यं। तथा हि। प्रधानान्यप्राप्तसंस्काराय संनिधीयमानानि गु-
णभेदं प्रयुंजत इति यदेतस्मिन्नित्युक्तं इति कैयटस्य पक्षांतरोक्तिः। तदुक्त्वा तं प्रतिविरोधं ध्वनयन्नतां स्वानुकूलयितुमाह। तदु-
क्तमिति। गुणभेदमिति। परिभाषाभेदमित्यर्थः। प्रतिप्रधानं गुणावृत्तिरिति न्यायात्। स्पष्टश्चायमर्थस्तृतीयाध्यायस्य प्रथमपा-
दे दशापवित्रेण ग्रहं संमार्ष्टीति सप्तमाधिकरणे। तत्र हि सोमप्रकरणे दशापवित्रेणेति वाक्यं श्रुतं। दशापवित्रं वासःखंडः। अ-
त्र पः कश्चिद्ग्रहः शोधनीयः सर्वे वा ग्रहाः तदर्थं संशयः ग्रहमित्येकत्वं विवक्षितमविवक्षितं वेति। पशुना यजेतेत्यत्रोपादेय-
पशुगतैकत्ववदुद्देश्यग्रहगतैकत्वस्यापि विवक्षितत्वेनैव ग्रहः शोधनीय इति प्राप्ते ग्रहमिति द्वितीयया ग्रहस्योद्देश्यत्वेन
प्राधान्यप्रतीतेरस्य मार्गस्य च गुणत्वेन प्रतिप्रधानं गुणाश्चावर्तनीया इति न्यायेन यावंतो ग्रहाः संति सर्वे एव शोधनीयाः। अयमा-
णमपि ग्रहमित्येकत्वमुद्देश्यगतत्वादविवक्षितमेव। अन्यथा ग्रहं संमृज्यात्तं चैकमिति विधेयार्थेनैकेन वाक्यभेदप्रसंगात्।
पशुना यजेतेत्यत्र तु प्रधानयागं प्रति पशोर्गुणत्वात्तान्न पूर्वोक्तन्यायावसर इति विधेयगतत्वादिति विवक्षितमेव। तत्र वाक्यभे-

चित
९

दस्तुविशिष्टविधानेनैवपरिहरणीयमितिराद्धांतइतिस्थितं।यथोद्देशपक्षगतविशेषमुक्त्वाकार्यकालपक्षगतविशेषमाहका
र्यकालेत्विति।अत्रायंनिष्कर्षः।यथोद्देशेपरिभाषाप्रदेशेपदैकवाक्यतयापदार्थबोधोत्तरस्यसंस्कारकः।सचविशेषग्राहिप्रति
पत्तिपक्षः।कार्यकालेतुपरिभाषाप्रदेशेविप्रतिषेधमशास्त्रोपयोगिनिराकांक्षवाक्यार्थबोधेजातेऽनंतरमाकांक्षावशाद्विधि
देशेपरिभाषोपस्थितौपदैकवाक्यतयालक्ष्यसंस्कारकोनिराकांक्षएववाक्यार्थबोधइतिकैयटमतेत्वयंनिष्कर्षः।यथोद्देशे
संज्ञापरिभाषयोःस्वदेशेवाक्यार्थबोधोत्तरंविधिप्रदेशेवाक्यैकवाक्यतयालक्ष्यसंस्कारकमहावाक्यार्थबोधः।यथाश्रुतप्रति
पत्तिपक्षस्थायांकार्यकालपक्षेतुविधिप्रदेशएवपदैकवाक्यतयावाक्यार्थबोधोविशेषग्राहिप्रतिपत्तिपक्षस्थायांननुत
त्तद्विधिप्रदेशेपरिभाषावुध्येकवाक्यतायांपरिभाषाशास्त्राणांतत्तद्देशस्थत्वेतस्मिन्निितितस्मादितिपरिभाषयोरिकोह्रस्वा
दिचात्यायेकदेशास्थैकवाक्यतयोभयोरप्येकदेशस्थत्वेनपरत्वापरत्वव्याघातात्परत्वादित्याशमकनभयनिर्दिष्टेपंचमीनि
र्देशोवलीयानितितस्मिन्निितिनिर्दिष्टेइतिसूत्रस्थंभाष्यंविरुध्येता।किंचयथोद्देशपक्षेपरिभाषादेशेविध्येकवाक्यतायांसुपि ९

चबहुवचनेझल्येदित्युभयोरपितस्मिन्निित्येकपरिभाषैकवाक्यतयोभयोरपिपरिभाषारूपैकदेशस्थत्वेनपरत्वापरत्वव्याघाता
द्विप्रतिषेधेचरितार्थस्यबहुवचनेझल्येदित्यस्यतेनपरत्वात्सुपिचेत्यस्यबाधाकरणेनरामेभ्यइत्यादीनामसिद्धिप्रसंगश्चस्यादि
सतश्चाह।अत्रैकदेशस्थइति।ननुक्ङितिचेतिसूत्रेऽथवाकार्यकालंसंज्ञापरिभाषमितिपक्षांतरेभाष्यकृता।क्ङितिचेतिनिषेध
सूत्रस्यकार्यकालपक्षाश्रयणंतदग्निमंमथवायदेतस्मिन्निितिपक्षांतरंभाष्यंमानत्परिभाषेत्यादिनाव्याख्यायायवायथोद्देशप
क्षाश्रयेणभाष्यमितिप्रकारांतरेणव्याख्यातांकैयटेनक्ङितिचेत्यस्ययथोद्देशपक्षाश्रयणेबोधनंचेत्तुभयमप्यसंगतंस्यात्तस्य
निषेधसूत्रत्वेनपरिभाषात्वस्यायुक्तत्वात्।संज्ञापरिभाषयोरेवयथोद्देशकार्यकालपक्षाश्रयणस्येष्टत्वात्तत्रभाष्येस्पष्टत्वात्।
तथासतिक्ङितिचेतिसूत्रस्थभाष्यकैयटस्यस्वाभिप्रेतार्थेतदुक्तमित्यादिनास्वानुकूलीकरणत्वमयुक्तमित्यतआह।निषे
धवाक्यानामपीति।तथाचक्ङितिचेत्यस्यनिषेधत्वेनपरिभाषात्वाभावेपितस्यपरिभाषासादृश्येनपरिभाषात्वमाद्यपक्षत्रितयम
पिनायुक्तमितिभावः।नन्वेकवाक्यत्वंचपरस्परंभिन्नानांवाक्यानामन्यतराकांक्षयोभयाकांक्षयावैकतात्पर्यार्थकत्वंतच्चविधिनिषेध

चिट
१

योःपरस्परविरुद्धार्थकत्वेनैकतात्पर्यकत्वाभावान्नसंभवतीत्यतआह।तन्नैकवाक्यतेति।पर्युदासेति।पर्युदासोयमेकवाक्यतासा
धकस्स्यादशमाध्यायस्याष्टमेपादेप्रथमाधिकरणेमीमांसकैर्विचारितः।तत्रहियजतिषुयेयजामहंकरोतिनानुयाजेष्वित्यत्र
प्रसज्यप्रतिषेधार्थकोपर्युदासार्थकोवातदर्थसंशयेस्वनञ्पदंकरोतिनासंबध्यतेऽनुयाजपदेनवेति।तत्रप्रधानान्वयलाभे
संभवत्यप्रधानान्वयस्यायुक्तत्वात्करोत्यर्थस्यप्रधानत्वेनतत्वेनतत्रैवान्वयात्प्रसज्यप्रतिषेधार्थकएवाननन्वेवंसतियजतिषुयेजा
महंकरोतीत्यनुयाजेष्वसामान्यतःप्राप्तस्ययेयजामहकरणस्यनानुयाजेष्वितिनिषेधेनतदंशेतद्वाक्यमप्रमाणंस्यादुभयोर
पिवेदवाक्यत्वाविशेषात्उभयोःप्रामाण्यंकल्पयितुमयुक्तमितितिचेन्न।विकल्पाभ्युपगमेनाप्युभयप्रामाण्यस्याक्षतत्वेनादोषा
दितिप्राप्तेविकल्पस्याष्टदोषदुष्टत्वेनान्याय्यत्वात्परस्परविरुद्धयोर्विधिनिषेधयोःसमुच्चयस्यासंभवाच्चोभयाप्रामाण्यपरि
हारायनञ्अनुयाजपदेनैवान्वेतिपर्युदासार्थकमेवातदुक्तं।पर्युदासःसविज्ञेयोयत्रोत्तरपदेननञ्।इति।एवंचनञ्प
दसमभिव्याहारेणानुयाजपदस्यानुयाजातिरिक्तपरत्वेयजतिषुयेयजामहंकरोतीत्यनेनैकवाक्यतयाऽनुयाजभिन्नेषुप १

जतिषुयेयजामहंकुर्यादितिवाक्यार्थेनोभयोरपिप्रामाण्यमक्षतमेवेतिसिद्धांतितं।तथाचात्रनञःपर्युदासार्थकत्वेन
यजतिषुयेयजामहंकरोतिनानुयाजेष्वित्यनयोरेकवाक्यतातथाप्रकृतेपिनञःपर्युदासार्थकत्वेनकिं।भिन्नसार्वधातुका
र्धधातुकयोःपरतइगंतांगस्यगुणइत्यादिरूपासार्वधातुकेतिकिं।तिचेत्यनयोःपरस्परविरुद्धार्थकत्वेप्येकवाक्यतासिध्य
तीतिभावः।ननुव्यस्तस्यापिनञःक्वचिदुपक्रमादिविरोधेपर्युदासार्थकत्वमितिमीमांसकमर्यादा।तथापिसमस्तनञो
विनाप्रमाणंप्रधानान्वयलाभासंभवेनतत्रपर्युदासार्थकत्वेप्यसमस्तस्यतुनञःप्रधानान्वयलाभेसंभवतिअसतिबा
धकेऽप्रधानान्वयस्यायुक्तत्वात्प्रसज्यप्रतिषेधार्थकत्वमेवाश्रयणीयं।तथाचात्रोत्सर्गापवादन्यायेनबाध्यबाधकभावा
श्रयणेप्रधानान्वयलाभस्यसंरक्षितत्वात्प्रसज्यप्रतिषेधार्थकत्वमेवयुक्तमाश्रयितुमितिनिषेधस्यविध्येकवाक्यतया
परिभाषासादृश्येनपरिभाषात्वंकल्पयितुमशक्यमित्यतआह।प्रसज्यप्रतिषेधेपीति।तथाचप्रसज्यप्रतिषेधाश्रयणे
पदैकवाक्यताभावेपिनिषेधाकांक्षायांविधिशास्त्रोपस्थितौवाक्यतयैकवाक्यताव्यवहारस्यारूढत्वाद्युक्तमेवपरिभाषासाह

चित· शेनपरिभाषात्वव्यवहारकथनमिति भावः। यद्यपि यथा कार्यकालपक्षे परिभाषाविषये साकांक्षविप्रतिषेधशास्त्रोपयोगित्वा
१० द्बोधस्य परिभाषाप्रदेशएवोत्पत्तावनंतरं विधिप्रदेशे तत्तदुपस्थित्या निराकांक्षपदैकवाक्यतयान्वयबोधस्तथा संज्ञाशास्त्रविष
येपि कार्यकालपक्षे न्यायसाम्यात्प्राप्तस्तथापि तस्मिन्निति सूत्रस्थभाष्यप्रामाण्याच्चत्पक्षे परिभाषाविषये तथाभ्युपगमेपि प्रमाणानुप
लब्धेः प्रत्युतादसोमादिति सूत्रस्थभाष्यविरोधाच्च नसा क्रियते इत्याह संज्ञाशास्त्रस्येति। तत्र हि एवमुक्तं। मात्प्रगृह्यसंज्ञायां तस्या
सिद्धत्वादयावेकादेशप्रतिषेधइति वार्त्तिकं। मात्प्रगृह्यसंज्ञायां तस्य ईत्वस्य कृत्वस्यासिद्धत्वादयावेकादेशः प्राप्नुवंति तेषां प्रतिषे
धोवक्तव्यः। अमी अत्र अमी आसते अमू अत्र अमू आसाते इति स प्रयोजनं व्याख्यायनतु च प्रगृह्यसंज्ञावचनसामर्थ्यादयादयो
न भविष्यंतीत्याशंक्य कार्यकालपक्षमाश्रित्य वचनार्थो हि सिद्धे तेदं वचनात्स्युप्यमस्ति। अस्ति ह्यन्यदेतस्य वचने प्रयोजनं किं यदसि
द्धे प्रगृह्यसंज्ञाकार्यं तदर्थमेतत्स्यात् अणोप्रगृह्यस्यानुनासिकइति। कार्यकालपक्षे अदसोमादित्यस्याणोप्रगृह्यस्येत्यनेनैकवाक्यतां
यांतस्यापि तद्देशस्थत्वेन अदसोसेरित्येतच्छास्त्रापेक्षया तस्य पूर्वत्वाभावात्पूर्वत्रासिद्धमिति पूर्वग्रहणेनाग्रहणअसिद्धत्वस्याना १०

वात्। अमू इत्यादौ अप्रगृह्य इति पर्युदासार्थत्वेनैव तस्य चारितार्थ्येन सामर्थ्यादयादीन्बाधितुं नोत्सहते इति तदाशयः। कार्यकालपक्षे
परिभाषावत्संज्ञाशास्त्रस्य स्वदेशएवथवाक्यार्थबोधे तु व्यवहर्तव्यन्यायेन तस्य तद्देशीयत्वव्यवहाराभावात्सर्वमेतदसमंजसं भवेदिति
बोध्यं। नन्वेतद्भाष्यप्रामाण्यात्संज्ञाशास्त्रस्य तद्देशगमनेन तद्देशीयत्वव्यवहारसत्वेपि पूर्वपावसामर्थ्येन तत्त्वस्यापि दुर्वारत्वादसिद्ध
त्वं तद्वस्थमित्यत आह। असिद्धत्वस्येति। तत्रत्यपरत्वेनैवेति। विधिप्रदेशस्थपरत्वेनैवेत्यर्थः। नहि संज्ञाशास्त्रस्य विप्रतिषेधशा
स्त्रोपयोगि एथग्वाक्यार्थ इति भावः। अत्र च समनंतरोक्तादसोमादिति सूत्रस्थभाष्योत्तरभाष्यमेव प्रमाणं। तत्र हि। विप्रतिषेधाद्धे
ति वार्त्तिकं व्याख्यानावसरे नेष उक्तो विप्रतिषेधः। विप्रतिषेधे परमित्युच्यते पूर्वा च प्रगृह्यसंज्ञा परे हि अयादय इत्याशंक्य परा
प्रगृह्यसंज्ञा करिष्यते इति समाधायानंतरं सूत्रविपर्यासः कृतो भवतीति सूत्रविपर्यासाशंकायां एवं तर्हि परेव प्रगृह्यसंज्ञा कथं
कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यं। प्रगृह्यप्रकृत्येत्युपस्थितमिदं भवति अदसोमादितीत्युक्तम्। ननु संज्ञाशा
स्त्राणां एथग्वाक्यार्थ न स्वपगमेन प्रदेशवाक्येनैकवाक्यतायां कार्यकालपक्षे तत्तद्देशस्थत्वात्परादिसंज्ञानामिष्टबाध्यबाधकभावोनसि

चित ध्येत्तथाचराज्ञेइत्यादौनलोपः प्रातिपदिकांतस्येत्येतदेकवाक्यतापन्नपदसंज्ञापेक्षया अल्लोपोऽनइत्येतदेकवाक्यतापन्नपदसंज्ञायाः
११ परत्वनित्यत्वनिरवकाशत्वयोरभावाद्बाध्यबाधकभावानापत्यातदेकवाक्यतापन्नभसंज्ञायां अल्लोपस्यासिद्धत्वात् एवंप्रवृत्तायामपितदुत्तरं
पदसंज्ञायाः प्रवृत्तौबाधकाभावान्नलोपापत्तिरित्यतआह। आकडाराधिकारस्येति। नन्वेवमपिपचिनंसादिष्वसर्वनामस्थानेइत्यादौ
नांकार्यकालपक्षानभ्युपगमेनत्रिपाद्यांप्रवृत्तिर्नस्यात्तथाचराजभ्यामित्यादौनलोपानापत्तिरित्यतआह। पदादिपदानामिति। नन्वाकडार
स्थभपदसंज्ञाविषयेयथोद्देशपक्षस्यैवाश्रयणेचजातशक्तिग्रहणैवनिर्वाहे। नांत्यविकारेंत्यसदेशस्येत्यस्याःपरिभाषायाःप्रयोजननिराक
रणावसरेऽनकारांतस्याल्लोपप्रयोजनंतक्ष्णःतक्ष्णोति। नइत्यत्रापिप्राप्नोति। अनोनत्यविकारेंत्यसदेशस्येतिनभवति। एतदपिनास्तिप्रयो
जनं। अन्कारंविशेषयिष्यामः। अनोयोऽकारइति। एवमप्यनस्तक्ष्णः अनस्तक्ष्णोत्यत्रप्राप्नोति। एवंतर्हिकालसंज्ञापरिभाषंयत्रकार्यंत
त्रोपस्थितंद्रष्टव्यंभस्येतितत्रोपस्थितमिदंभवतियचिभमितितिरितिभसंज्ञाविषयेकार्यकालपक्षप्रदर्शकंप्युऽःसंप्रसारणमितिसूत्रस्थ।
भाष्यंविरुध्येतेतिचेन्न। पूर्वत्रासिद्धमितिसूत्रस्थभाष्यविरोधेनतस्यैकदेश्युक्तित्वेनाविरोधात्। प्रत्ययस्थांगांद्रेत्यतावुक्तांप्रत्येनतत्रैवान् ११

यस्योचितत्वाच्च। पदादिसंज्ञाविषयेकार्यकालपक्षानभ्युपगमेप्रमाणंदर्शयति। अतएवेति। यथोद्देशांगीकारेपिजातशक्तिग्रहणनिर्वाहादेवेत्यर्थः
।इत्थंहितत्रभाष्यं।द्विसपादसप्ताध्याय्यामयंपादोनोऽध्यायोऽसिद्धइत्युच्यतेयेइहसप्तमीनिर्देशाःपंचमीनिर्देशाःषष्ठीनिर्देशाश्चोच्यंतेतेप्यसिद्धा
ऽस्युःतत्रकोदोषः।स्कोःसलोपश्चलिङ्क्सादंगात्संयोगांतस्यलोपइत्येतेषांनिर्देशानामसिद्धत्वात्तस्मिन्नितिनस्मादितिषष्ठीस्थानेइत्येताःपरिभाषा
नप्रकल्पेरन्। नैषदोषः। यद्यप्येतत्रासिद्धंतल्लिङ्गसिद्धं कथंकाललंसंज्ञापरिभाषंयत्रकार्यंतत्रोपस्थितंद्रष्टव्यमिति। यदिसंज्ञाविषयेता
सांनिपाघांप्रवृत्तस्येकार्यकालपक्षोभिमतश्चेत्परिभाषेवतद्विषयेपिशंकासमाधानंकृतंस्यात्। तदकृत्वातद्विषयेतदर्थःकार्यकालप
क्षोनास्त्येवेतिभाष्याभिमतमन्यथापरिभाषाविषयेविशिष्यतदुक्तेरसंगत्यापत्तेरितिबोध्यं। आहुरित्यस्यकेचिदित्यनेनान्वयः। यथोद्देशप
क्षस्यदुर्लभत्वशंकांविघटयंस्तत्रप्रमाणमाहायथोद्देशपक्षइति। प्रथमपरिभाषार्थस्फुटत्वात् द्वितीयपरिभाषार्थवक्तुमारभते। कार्येणेति। स्वसंस्का
रायेति। इकोयणचीत्यादिशास्त्रेस्वविधेययणादिरूपेणकार्येणस्वसंस्कारायस्वसंस्कारायस्ववाक्यार्थबोधायस्वहितिपत्सप्तम्यंतादिरूपंलिंगंते
नचिन्हितानांतस्मिन्नित्यादिपरिभाषाणामाक्षेपइत्यर्थः। एतेनोभयोरचेतनत्वात्तत्रकथंपरिभाषायाःसांनिध्यशक्तिः कृतोवानसर्वत्रसर्वासांतदापत्ते

चित् ।असिद्धे च कर्यतासामुपस्थितिरित्याक्षेपत्रयमपि समाहितं वेदितव्यं।आरोपिताकांक्षयैव दोषत्रयस्य निरस्तत्वात्।अचेतनत्वेप्यारोपिताकांक्षयैव
१२ सवृत्तिलिंगचिन्हितपरिभाषाणामाक्षेपद्वयमत्र प्रमाणमाह अत एवेति।कार्येणपरिभाषोपस्थानां देवेत्यर्थः।एतेन कथमसिद्धे तदुपस्थितिरित्
तायदोषोद्धारः सष्टीकृतो वेदितव्यः।पूर्वत्रासिद्धमितिसूत्रस्थभाष्यावपर्वीतु भाग्यक्रास्मर्तव्या।नन्विकोगुणवृद्धीइतिसूत्रभाष्ये तच्छेषतदपवा
देतदुभयपक्षानादरेणसंबद्धमेवेदं परिभाषांतरमसंबद्धमेवानयापरिभाषयापरिभाषांतरमितिचक्रोष्ट्रायाः पतंतिनियमादिकोगुणेच
द्धीभवतो विप्रतिषेधेनेतिद्वति क्रोष्ट्रायमतावलंबेनपक्षांतरावलंबनावसरेऽग्रेगलानैषशुक्को विप्रतिषेधः।विप्रतिषेधपरमित्युच्यतेप
र्वेक्षायं योगः परोत्तिमपद्रत्याशंकितं।अनंतरं च परत्वाद्वृत्तेष्टवाचकत्वमादायसमाहितमित्यन्मदेतत्।परंतु तत्रैनैषशुक्क इतिप्रतीकस्व
पादायेष्टसिद्धयेदृत्यर्थः।यथोद्देशपक्षेपरिभाषयोः पौर्वापर्येनतु कार्यकालतायामितिकैयटानुरोधेन कार्यकालपक्षे तस्मिन्निति सूत्रस्थ
भाष्यासंगतिमाशंक्य तेनचेति।अथ शास्त्रीयपाठकृतपरत्वमादायासंगतिं परिहरति।विप्रति।विप्रतिषेधसूत्रेइति।तदेवोपपादयति।नद्दी
ति।कैयटस्यैवपूर्वापरविरोधं दर्शयितुमाह।अत एवेति।नन्विकोगुणवृद्धीइतिसूत्रस्थकैयटस्यकागतिरित्यत आह।इकोगुणेतिनातस्मिन्निति १२

सूत्रस्थभाष्यविरोधात्स्वग्रंथविरोधाच्चेति भावः।स्वग्रंथस्थायपयचो भयं निर्दिश्यते किंतत्र पूर्वस्य कार्यं भवत्याहोस्वित्परस्येत्युभयनिर्देशो विप्रतिषे
धात्संचमानिर्देशो भविष्यतीतितस्मिन्निति सूत्रस्थं भाष्यं तत्र विप्रतिषेधादिति पताकमुपादायसूत्रपाठपेक्षयापरस्यव्यवस्थापकत्वमित्यर्थ
इति कैयटग्रंथः।तथा चात्रैवं फलति।तस्मिन्निति सूत्रस्थभाष्यकैयटानुरोधेन कार्यकालपक्षेपरिभाषाविषयेऽष्टाध्यायीपाठकृतपरत्वस्ये
वाश्रयणं।आ।कडाराधिकारसंज्ञाविषयेतुपरैवप्रगृह्यसंज्ञेत्यदसोमादितिदिसूत्रस्थभाष्यप्रामाण्यात्वदेशकृतपरत्वस्यैवाश्रयणमित्येता
वतासंज्ञापरिभाषयोर्वैरूप्यं फलति।अपरे त्वत्र।वस्तुतः सर्वत्र पाठकृतपरत्वस्यैवाश्रयणमिति न संज्ञापरिभाषयोर्वैरूप्यं परैव प्रगृह्यसं
ज्ञेतितु अदसोमादितिसूत्रभाष्ये संज्ञापदेन तत्कार्यं प्रकृतिभाववच्यते।ऽग्रेऽत्राशयानभिज्ञस्य प्रश्नः कथमिति।एकदेशिनस्तत्तरं कार्यकालमि
तिनतद्भाष्यविरोधः।एवं च परिभाषावत्संज्ञाशास्त्रस्यापि स्वदेशे वा कार्यबोधे स्त्वेवा।लक्ष्यसंस्कारकत्वमपि तुल्यमेवा।अत एवेतावदंशस्य
इष्टत्वसूचनायैव केचिदित्युक्तं।अन्यथा तदन्यस्य सर्वस्य सिद्धांतत्वेन परे त्वित्येव वक्तव्यं स्यादित्याहुः।तदेतद्ध्वनयन्नाह।अस्त्वमिति।केचिद्वि
द्दंनपरिषदंतो।तथाहि।एकदेशिभाष्यविरोधपरिहारार्थेऽदसोमादितिसूत्रस्थभाष्यं भाष्यस्यामयाख्यानमनुचितं।तस्मिन्निति सूत्रस्थभा

चित

१३ व्यसामथाख्यानमनुचितं।तस्मिन्निति सूत्रस्य भाष्यस्य परिभाषाविषयत्वं।अदसोमादिति सूत्रस्य भाष्यस्य संज्ञाविषयत्वमिति विशेषवि
षयत्वान्न कश्चिद्विरोधः।न चैवं ननु कार्यकालत्वात्परिभाषयोः पौर्वापर्याभावात्कथं विप्रतिषेधोऽन्त आह।सूत्रपाठापेक्षया परस्य व्यवस्थापक
त्वमित्यर्थ इति कैयटग्रंथमवतार्यमेऽतएवाग्रेऽमोह्रस्वादिति त्रैपादिकसूत्रसंग्रहणं संगच्छते इति तस्मिन्निति सूत्रस्थविवरणनिरोधः स्यादिति
वाच्यं।उभयनिर्देशे पंचमीनिर्देशो बलीयानिति परिभाषाव्याख्यानपराचीति सप्तमीनिर्देशस्य मयवजइत्यत्र चारितार्थ्यात्पंचमीनिर्देशेन कोवि
शइति मूलग्रंथविरोधेन तस्मिन्निति सूत्रे विभक्तिविशेषनिर्देशस्यानवकाशत्वादयुक्तोयं विप्रतिषेध इति सूत्रभाष्यविरोधेन च तदुत्तरं स
वकृतसामीप्येऽकृतसामर्थ्यात्पंचमीति कृत्वा पंचमीनिर्देशो भविष्यतीति व्याख्यानपरभाष्यस्याबलत्वात्स्वार्थ एव भविष्यती विवरणविरोधे
न च तद्विवरणस्य प्राचीनमतानुसारित्वकल्पनेन विरोधाभावात्।किंचादसोमादिति सूत्रस्य परिवप्रगृह्यसंज्ञेति भाष्यस्य लक्षणयातात्स्था
र्थकत्वेनेन प्रकृतिभावस्य परत्वेपि प्रगृह्यसंज्ञाया भयादिपरत्वस्य बाधितत्वात्तदंतरेण तदप्राप्तेश्चेत्याहुः॥३॥सर्वसंज्ञापरिभाषोपयो
गिकार्यकालयथोद्देशपक्षद्वयमुक्त्वाऽनेकांता अनुबंधा एकांता वेति पक्षद्वयमध्ये एकस्य सामंजस्यं व्यवस्थापयितुमाह।इत्संज्ञका इति।इ १३

र्थ्यापत्तेः।स्पष्टं चेदं संख्यासंज्ञासूत्रे भाष्ये।तच्च नित्यार्थत्वपाव इति वाच्यं।विपाट्शस्य नदीविशेषाग्रह सोज्ञापकत्ववर्णनपरभाष्यप्रा
माण्यान्नध्वंसकादन्यतरस्या।मित्यस्य चरितत्वाभावात्।नदी।भिन्नेत्वत्रापि संज्ञिनो ग्रहणं आएनद्या इतिवन्न घाचेत्यवक्तव्यमेव बहु
वचननिर्देशाश्चेति दिक्।तत्र ज्ञापकं दर्शयति संख्याया इति।उपपादयति नु हीति।ननु त्यंतनिषेधस्य उत्तरार्थत्वेन चरितार्थत्वात्तस्य
ज्ञापकत्वमयुक्तमिति चेन्न।अर्थवद्ग्रहणपरिभाषयाऽर्थवतस्तिशब्दस्य ग्रहणात्।उतंस्तिशब्दस्यानर्थकत्वात्।तथा चोक्तं भाष्ये॥
ननु चोक्तं उत्तरार्थमेतत्स्यादिति अर्थवद्ग्रहणेनानर्थकस्येत्यर्थवतस्तिशब्दस्य ग्रहणं न च उतेस्तिशब्दोऽर्थवानिति।तदाहस्यदां चेदमि
ति।स्ववर्णार्थाभिधानशक्तियुक्तः शब्दो यदा विशिष्टेर्थे संव्यवहाराय नियम्यते तदा तत्रैव प्रतीतिं जनयति नान्यत्रेति केपरोक्तिं युक्तित्यादि
नार्थतो नन्वयरत्वं डयति तन्नेति।ननु सर्वे वर्णार्थवाचका इति शास्त्रकृत्सिद्धांतानुरोधेन सर्वार्थेषु सर्वशब्दानां शक्तेर्गृहीतत्वेन वृद्धिरादैजित्यादि
नां गृहीतशक्तिग्राहकत्वेन नियामकत्वे कृते न वृक्षन इत्यत आह सर्वे सर्वार्थेति।तादृशसिद्धांतानुरोधेन सामान्यतः शक्तिग्रहेपि विशिष्य
तत्तदर्थज्ञानाभावेन विशेषतस्तदर्थशक्तेरगृहीतत्वेन निर्विधित्वमेव न नियामकत्वमिति भावः।ननु सामान्यज्ञानमादायैव नियामकत्वमस्ति

चित् तिचेदत्राह। सामान्यज्ञानं त्विति। सामान्यशक्तिग्रहस्य विशेषबोधोपयोगित्वाभावात्तद्वत् किंचित्करं तदिति भावः। अन्यथा तादृशसिद्धान्तानुरोधेन
१६ शक्तिग्रहे वृत्ते विशेषतः सर्वार्थज्ञाने सर्वेषां सर्वज्ञत्वापत्तिः॥ ४७॥ इदानीं सिंहावलोकनन्यायेन संज्ञकविशेषो द्देश्यकविधौ विचारं सूचय
न्नाह कार्यमिति परिभाषामवतारयति। नन्वध्येत्यादिना। शयित इत्यत्र निष्ठा शीङ् इति निष्ठायाः कित्वनिषेधः। ङित्वात् गुणनिषेध इति। किं ति
चेतिसूत्रे ससम्प्रसारणाश्रयणादिति भावः। न च निष्ठा शीङ् इति किन्त्वनिषेधसामर्थ्यात्सत्सम्भावस्तत्र सूत्रे कल्प्यत इति वाच्यं तदभाव
कल्पनापेक्षया परिभाषाज्ञापनस्यौचित्यात्। किंचिन्नेत्यस्याप्रवृत्तिमात्रकल्पनेनापि निष्ठा शीङ् इति निषेधस्य सार्थक्यात्तेन सत्सम्भावकल्प
नस्यायुक्तत्वाच्च। तस्माद्बहुलक्ष्योपकारार्थं परिभाषाज्ञापनीयैवेति तेनैव सिद्धे सामर्थ्यकल्पनं अनुचितमिति दिक्। ज्ञापकमाहस्यंङित्वा
चायितरीति। तेनैतस्यां परिभाषायां दीधीवेव्योरिति गुणप्रतिषेधो ज्ञापकमिति सारं एवाद्युक्तिः परास्ता। भाष्ये तस्य प्रत्याख्यानात्तिङ
ऽशेचित्रमिति न्यायायितत्वादिति भावः॥ ४८॥ इदानीं संज्ञाप्रसंगादेव संज्ञिविशेषो द्देश्यकविधौ विचारं सूचयन् यदागमपरिभाषामवता
रयितुमाह। नन्वित्यादि। परिभाषार्थं व्याचष्टे यमुद्दिश्येत्यादि। यदागमा इत्यत्रो द्देश्यविधेयभावबोधकषष्ठ्यर्थो न तु यया कथंचित्संबंधमा १६

त्रं। अन्यथा प्रतिदारयतीत्यादौ तो द्देश्यघटितसमुदायत्वसंबंधेन रेफस्य दासंबंधित्वेषु त्वात्मत्वमापद्येत। पूर्वौ कार्यानुसरणेतु त्वनिर्दिष्टवि
धेयतानिरूपितो द्देश्यतासंबंधेन रेफस्याकारसंबंधित्वाभावान्न दोषः। तद्गुणीभूत इत्यत्र गुणशब्दोऽवयवपरः। विप्रत्ययेन वास्तवत्वा
भावव्यारोपितं शास्त्रीयं तत्त्वमिति सूचितं। ग्रहणशब्दो ग्राहकपरः। गृह्णातिश्च ज्ञानार्थक इति भावः। ननु यदागमास्तद्ग्रहणेन गृह्यंत
इत्येतावतैव सिद्धे तद्गुणीभूता इत्यस्य वैफल्यमित्याशंक्याह। तत्रेति। लोकेपि इत्यपि शब्दः शास्त्रसमुच्चायकः। नुम्विधानेनि। अनित्य
त्वकल्पनाद् निष्ठातिरिष्ठातिष्ठातिरिक्तस्थलेपि संकोच इति न युक्तं। प्रवृत्तिरौत्सर्गिकी अप्रवृत्तिः परंगमकसाध्येति सिद्धान्तात्। अत एव
कुम्भेजंत इति सूत्रे संनिपातपरिभाषादोषनिरूपणानंतरं परिभाषाव्यवस्थापनावसरे यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा
कर्तव्या इति विधेयं दोषेष्वित्युक्तं भाष्ये। ननु नुम्विधानं हि स्ववर्णार्थं पदि च यदागमपरिभाषया सवर्णदीर्घः स्यात्तदालस्यैव यत्थेस्यष्टमे
वातस्तत्त्वेलोपपत्यर्थेपचमानेत्यादौ परिभाषाया अप्रवृत्तिं कल्पयतीति। अनित्यत्वे ज्ञापकमिति चेन्न। सामर्थ्येन परिभाषाया अप्रवृत्तिक
ल्पनापेक्षया तस्यां नित्यत्वज्ञापकत्वस्यैव बहुलक्ष्यसंस्कारायोचितत्वात्। अनित्यत्वकल्पने ऽप्रवृत्तेरार्थिकत्वेनान्यथासिद्धत्वाच्च। ननु पचम्

चित् आनइत्यवस्थायांप्राप्तस्याकःसवर्णेइतिदीर्घस्यविशेषविहितेनातोऽङितइत्यनेनबाधेतस्याप्यनेनापवादत्वाद्बाधेनसुग्विधानस्यचारि
१७ तार्थ्यात्कथमेतत्परिभाषाऽनित्यत्वेज्ञापकं।नचक्वचिदपवादविषयेप्युत्सर्गोऽभिनिविशतइतिन्यायेनरमायामित्यादाविवपुनरुत्सर्गप्रवृ
त्तिस्वीकारेणसत्यपिसुग्विधानेआद्देशप्रवृत्तिरबाहतेवेतिवाच्यं।सर्वथानिरवकाशस्थलेतथासत्वेपियेननाप्राप्तिन्यायेनबाधकस्यत्वेनतथा
नंगीकारात्।नचापवादशास्त्रेणपरिभाषायांयेननाप्राप्तिन्यायस्यग्रहणंभविष्यतीतिवाच्यं।तत्रापवादशास्त्रस्यबाधकपरत्वात्।स्पष्टंभविष्य
तिचैतदुपरिष्टात्।नन्वेवंसुकिसतिइत्यादेशप्रवृत्तिंपरिभाषयाशंक्यवर्णग्रहणेयदागमाइत्यस्याप्रवृत्तिरित्यानेसुगितिसूत्रस्थंविवर
णंविरुध्येतेतिवाच्यं।तस्यप्राचीनानुरोधित्वात्।नचतावतापियेननाप्राप्तिन्यायेनसुगपवादस्थलेउत्सर्गाप्रवृत्त्यैपादेशाप्रवृत्तावपिसवर्ण
दीर्घप्रवृत्तौनकिंबाधकमितिवाच्यं।आतोऽङितइत्यस्यानंतरंआनस्यनेतिन्यासेआतइत्यनुवृत्त्याआनस्यातोइत्यादेशोनैत्यर्थेनभानेऽप्यइति
न्यासेनवाइत्यादेशाप्रवृत्तौसुग्विधानस्यसवर्णदीर्घैकबाधकत्वादितिचेन्न।निरवकाशत्वेनसुकादीर्घबाधेतादृशापवादविषयेउत्सर्गस्या
प्रवृत्तेरभ्युपगमात्तदुत्तरंयदागमपरिभाषयासवर्णदीर्घेसुग्विधानवैयर्थ्यस्यास्पष्टत्वेनपरिभाषायाअनित्यत्वज्ञापकत्वस्यसुवचत्वात्।नचै १७

वमपिपरिभाषयासुगागमस्यावर्णत्वेनग्रहणेनस्वतन्त्रोक्षत्वेनचानसंध्यचिआद्गुणेओकाररूपगुणसंपादनेनतस्यचारितार्थ्यमितिवाच्यंप
रिभाषयाऽवर्णत्वातिदेशाद्दवकंदत्वस्याप्यतिदेशोत्स्वाश्रयोक्षत्वस्यप्रतिबंधात्।नचयथासुग्विधानसामर्थ्यात्परिभाऽनित्यत्वंज्ञाप्यतेतथा
विगमनाविरहाद्वर्णग्रहणेइयंनप्रवर्त्ततइतिज्ञापनेपिइष्टसिद्धावनित्यत्वज्ञापनमयुक्तमितिशंक्यते।नचेति।किंविशेषणतयायत्रवर्णग्र
हणंतत्रनेत्यर्थत्वसविशेष्यतयायत्रवर्णग्रहणंतत्रनंप्रवर्त्ततइत्यर्थोवाविवक्षितइतिविकल्पंमनसिनिधायनाद्यइत्याह।आनेसुगिति।।
अद्गुपदेशइति।अतत्वपदेशोयसोऽदुपदेशइतिविशेषणतयावर्णग्रहणात्।अद्गुपदेशाम्यजपन्नादिरेवा।शापितुव्यपादेशिवभावेनाऽदुपदेश
त्वमितित्वांनांसोपात्याह।किंचउमतेति।वर्णग्रहणेपिप्रकृतपरिभाषाप्रवृत्तेरत्रभ्यामितिसूत्रस्थभाष्यमप्यनुकूलं।तत्रहिवृद्धिनिमित्तात्प्रति
षेधइत्युक्तेकिंप्रयोजनमितिप्रश्नेकार्त्तिः।सैतिः।फौष्टयः।अनृत्तौकृतायारदाभ्यामितिनत्वस्यसियोदाघोदितिनत्वस्यचउपधत्वसंनियोगेन
नयोगेनविधीयमानस्यनत्वस्यचाप्राप्तिरितिप्रयोजनमुपपाद्याश्वयोच्यमानेपिप्रतिषेधेवृद्धिनिमित्तादितिकथंविज्ञापतेवृद्धिरेवनिमि
त्तंवृद्धिनिमित्तंतस्मादितिसैतिःसंगृहीतःकार्त्तिरसंगृहीतः।अथविज्ञापतेवृद्धिर्निमित्तंयस्यसोयंतस्माद्वृद्धिनिमित्तादितिकार्त्तिःसंगृहीतः

चित्
अथ विज्ञापते वृद्धिर्निमित्तं यस्य सोऽयं तस्मात् वृद्धिनिमित्तादिति कार्त्तिः संगृहीतः स्यैतिर संगृहीतः। न भयथापि फेल्लिरसंगृहीत इत्युभयथा
१९
पि दूषणेन पोपेदितेयथेच्छसितथा त्वित्युक्ताः ऽस्तुताव वृद्धिरेव निमित्तमित्यंगीकृत्य न त्रुचोक्तं स्यैतिः संगृहीतः कार्त्तिर संगृहीत इति पूर्वो
क्त दूषणं संस्मायी। कार्त्तिश्च संगृहीतः कथं वृद्धिर्भवति गुणो भवतीति रेफशिरा गुण वृद्धिसंज्ञको भिनिर्वर्त्तन इत्युक्तं। तत्र रेफशिरा इ
ति प्रताकसुपादायनन्त चाकपरिमाणस्य वृद्धिसंज्ञाविधानात् कथमारित्यस्य वृद्धिसंज्ञा। अथ पूर्वान्तत्वात् रेफस्य वृद्धिग्रहणेन ग्रहणमित्यु
च्यते तदा किमनेन रेफशिरा इति। यद्यपि प्रसज्यमानो एर परो न भवेत् अपि तत्तरकालं रपरत्वं विधीयते तथापि तन्न कृतत्वात् कार्त्तिः सं
गृहीत एवेति पूर्वोक्त दोषाभाव इति तत्त्वतः कैयटः। वर्णग्रहणे एतदप्रवृत्तेः। तन्न यमप्यसंगतं स्यादित्याह। अत एवेति। वर्णग्रहणे एतद
प्रवृत्तेरेवेत्यर्थः। अत एवेति। लोकन्यायसिद्धपरिभाषांगीकारादेवेत्यर्थः। अन्यथाऽपटीत् कारपितव्यमित्या दोऽद्दा व्यवधानेन वृद्धिणिवि
पयोरप्राप्तो निषेधवैयर्थ्यस्पष्टमिति भावः। एतेन नेदीतिज्ञापकमात्रसिद्धेयं परिभाषेति केषांचित्प्रवादोऽपास्तः। अनागमकानामिति। त
था च स्थानिवत्सूत्रे भाष्यं। अनुपपन्नं स्थान्यादेशत्वं शब्दानां नित्यत्वात् इत्याशंक्य प्रकारान्तरेण समाधाय कार्यविपरिणामादा सिद्धमिति पक्षां १९

तरेण समाहितं। कार्यबुद्धिसंप्रत्ययस्तस्य विपरिणामस्तस्मादित्यर्थः। यथा कश्चित्कस्मैचिदुपदिशति प्राचीनं ग्रामादाम्रा इति। तस्य सर्वत्राम्रबुद्धिः
प्रसक्ता। ततो पश्चाचिरेणोऽवरोहवंतः पृथुपर्णास्ते न्यग्रोधा इत्युक्ते स तत्राम्रबुध्यान्यग्रोधबुद्धिं प्रतिपद्यते। स ततः पश्यति बुध्या आम्रांश्चापकृष्य
माणान्न्यग्रोधांश्चोपाधीयमानान्। नित्या एव च तस्मिन् विषये आम्रा नित्याश्च न्यग्रोधाः। बुद्धिः परं विपरिणम्यते। एवं अस्तिर्यस्मात् अविशे
षेणोपदिष्टस्तस्य सर्वत्रास्तिबुद्धिः प्रसक्ता ततश्च सः अस्तेर्भूरित्यनेनास्तिबुध्या भवतिबुद्धिं प्रतिपद्यते। ततः पश्यत्यस्तिं चापकृष्यमाणं भव
तिं चोपाधीयमानं। नित्य एव च तस्मिन् विषयेऽस्तिर्नित्यो भवतिश्च। बुद्धिस्तस्य विपरिणम्यते इत्यादेशानां बुद्धिविपरिणामत्वं स्वीकृत्यानि
त्यत्वानुपपत्तिः परिहृता। अन्याऽगमेष्वपि नित्यत्वानुपपत्तिपरिहाराया नागमकानां सगमका आदेशा इति बुद्धिविपरिणाममात्रसाम्यादया
देशत्वमंगीकृतं भगवता नेतानेतावता तेषामादेशत्वं सत्यपि तस्मिन् स्थानिवत्सूत्रे तेषां ग्रहणं नेति भावः। नित्यतासमर्थनायादेशपक्षा
श्रयणेऽपि प्रक्रियादशायां कल्पितायामागमागमिभाव एव। अन्यथाऽऽगमादेशयोर्भेदेन व्यवहारो न स्यादिति बोध्यं। नन्वानुमानिकादेश
वदस्यापि स्थानिवत्सूत्रे ग्रहणे। न किंचिद्बाधकमित्यत आह। किंचैवमिति। भाष्योक्तसिद्धान्तासंगतिरिति। असिद्धवत्सूत्रस्थेत्यादिः। त

चि॰ अडिअसिद्धवदित्यस्यप्रयोजनपरिगणनावसरेऽडाड्विधौप्रयोजनंअकारिणेहीति।तलोपेकृतेलुङित्याडादीनप्राप्नुत।।असिद्धत्वात्
१९ न्नवाः।अस्तिलोपइणश्चयणादेशःप्रयोजनं।आसन्नायन्।इणस्तोर्यणलोपयोःकृतयोरनजादित्वादाणनप्राप्नोति।असिद्धत्वान्नव
त्वाप्रयोजनमुपपाद्य।अस्तिलोपरूपंप्रयोजनंअसोरल्लोपइतितपरकरणेनइणोयणादेशप्रयोजनंचइणोयणतत्तणततएनेका
चरतौ।।संयोगपूर्वस्येतियोगविभागेनिराकृत्यसर्वेषामेवपरिहारः।उपदेशइतिवर्त्ततेतच्चोपदेशावस्थायामेवाडादीनवतनःअ
थवाऽर्द्धधातुकइतिवर्त्ततेऽथवालुङ्लङ्लृङ्क्ष्वडितिद्विलकारकोनिर्देशः।लुङादिषुलकारादिष्विति।उपदेशइत्यनुवृत्त्याआर्द्ध
धातुकइत्यनुवृत्त्याद्विलकारनिर्देशेनचेतिपक्षत्रयेणप्रयोजनंनिराकुर्वताभाष्यकृतालावस्थायामडितिसिद्धांतोभ्युपगतः।ऽय
दागमपरिभाषापवादसंगतिंसूचयन्निर्दिश्यमानस्येतिपरिभाषामवतारयति।नन्वेवमित्यादिना।ननुयदागमपरिभाषायांयनु
दिश्येत्यर्थस्यव्याख्यातत्वेनाडागमविधायकेंगस्याद्यवयवत्वेनांगस्यतयाऽतिदेशोपिस्यात्वस्यानतिदेशात्पूर्वसवर्णापादनमयुक्तमिति
चेन्न।उद्देश्यतावच्छेदकीभूतधर्मसमानाधिकरणयावद्धर्माणांकार्यप्रयोजकानांकार्योर्थतयाऽन्यथाऽतिदेशेनस्यात्वस्याप्यतिदेशेन १९

दापत्तेर्दुर्वारत्वात्।अन्यथैधिषीष्टेत्यादौलकारस्थकार्येदेशेनविधीयमानेसुटितत्वादेरतिदेशेपिआर्द्धधातुकत्वस्यानतिदेशादिडागमानापत्तिः
प्रसज्येतेतिभावः।सूत्रार्थन्तेनैवेयंपरिभाषेत्याह।षष्ठीति।प्रत्ययग्रहणपरिभाषयाषष्ठ्यादेनषष्ठ्यंतंगृह्यतइत्याशयेनाह।षष्ठ्यंतमिति।।
निर्दिश्यमानपदाध्याहारेणाह।निर्दिश्यमानमिति।ननुनिःशब्देनैरंतर्यपरोदिशिरुच्चारणक्रियस्तथाचनैरंतर्येणोच्चार्यमाणमितिनस्यार्थो
स्थान४ लभ्यते।सूत्रेचोच्चार्यमाणस्यनतत्संबंधःयस्यसंबंधस्तस्यनसूत्रेउच्चारणमित्यतआह।उच्चार्यमाणसजातीयमेवेति।ननुतदोःसइत्यादौ
त्यदादीनामित्यस्यांगस्येत्यस्यचसंबंधेत्यदाद्यंतांगावयवतदोःसइत्यर्थेनातिस्यइत्यादौअतितकारस्यसत्वापत्तिः।त्यदादीनामित्यस्यनिर्दि
श्यमानत्वेपितदवयवस्यकार्येविधानात्प्रकृतपरिभाषयावारणासंभवादित्यतआह।अवयवरूपमिति।उच्चार्यमाणसजातीयावयवरू
पमित्यर्थः।ननुशुक्लीभवतीत्यादावस्यच्वावित्यनेनेत्वेपिमालीभवतीत्यादौनस्यादितिव्यक्तिपक्षमादायशंकतेनचेति।जातिपक्षमादायो
त्तरयतिजातिपक्षेति।सूत्रकाराभिमतव्यक्तिपक्षाभिप्रायेणाह।किंचेति।नचव्यक्तिपक्षेपिसर्वत्रनिर्दिश्यमानपरिभाषायाःप्रवृत्तौअत्रलो
त्यपरिभाषायानिरवकाशत्वात्तयाऽस्याबाधेनअस्यच्वावित्यादेर्ग्रहणकशास्त्रेणसर्वेषांस्थानित्वलाभेनेष्टसिद्धेर्दोषाभावान्भ्रूसुधियोरिति

ज्ञापकाश्रयणं तत्फलेन युक्तमिति वाच्यं। आदेः परस्येति परिभाषाबाधाऽलोन्त्यस्येति परिभाषाया निर्दिश्यमानपरिभाषाया बाधेभ्युपगतेआ
देः परस्येत्यनेनापि अवश्यं निर्दिश्यमानपरिभाषाबाधस्याभ्युपेयत्वेनोदस्यादित्यादौ षस्य दुरुद्धरत्वात्। न च यदागमपरिभाषाप्राप्तस्यानि
त्यस्यानया बाधेनस्याद् इत्यस्यैव स्यानित्यत्वसिद्धात्तस्य च आदेरिति परिभाषया बाधेपि दोषाभाव इति वाच्यं। निष्प्रामाणिको यदागमपरिभा
षापवादनिर्दिश्यमानपरिभाषाबाधपर्यंतानुधावनक्लेशापेक्षयापूर्वप्राप्तस्यानित्यस्यैवादेरित्यनेन बाधकल्पनस्य युक्तत्वात्। एतेन नि
र्दिश्यमानपरिभाषां प्रति अलोन्त्यस्येति परिभाषया निरवकाशत्वाद्बाधकत्वमभ्युपेत्य यत्तु न भूसुधियोरिति निषेधस्य ग्रहणकशास्त्रगृही
तानां निर्दिश्यमानकार्यबोधने ज्ञापकत्वमुक्तं तद्भ्रमसादिति केषांचिदुक्तिः परास्ता। नन्वचि श्नुधात्विति सूत्रे इयङुवङोङित्त्वात्पाणार्थमिति
वाच्यं तच्चायुक्तं निर्दिश्यमानपरिभाषया द्योर्निर्दिश्यमानत्वेन तदंतविधावपि तयोरेव सिद्धत्वात्। किंतु निर्दिश्यमानपरिभाषाऽनित्यत्वज्ञाप
नार्थं तदिति व्यक्तिपक्षेप्यस्य चावित्यादावदोषान्न भूसुधियोरिति ज्ञापकाश्रयणमयुक्तमित्यत आह। इयङुवङोङित्त्वं लितीत्यादि। इवर्णोवर्णांत
धातुभ्रुवामित्येव पाठः। भ्र्वर्हितत्वाद्घ्यंतत्वस्य पूर्वनिपातः। इवर्णोवर्णांत श्नुधातुभ्रुवामिति तु न पाठः। अत एवाग्रे धात्वादीनामित्युक्तिः संग २०

तोऽसत्त्वेसौत्रत्वात्तदविवक्षया। स्यात्तरत्वेनतथापयोग इति वाच्यं। नन्वेवमपि ङि राऊङित्त्वं व्यर्थं तत्रापनयैव रीत्या निर्वाहात् इत्यत आह। राऊ
ङिऊर्ङित्त्वं लितिति। न च ययाभ्रुत्तेर्य निर्दिश्यमानपरिभाषया यथाऽतिस इत्यादौ तद्यस्यापि निर्दिश्यमानत्वेप्राप्तोसत्वारणायार्थं ऊतरत्वीकृ
तानुवृत्तत्वपदापि पदस्यापि निर्दिश्यमानत्वस्वीकारस्तथा राऊदिविधावप्यनुवृत्तांगस्येत्यस्य निर्दिश्यमानत्वं दुर्निवारं तयासमुदायस्यानित्य
भ्रावृत्यर्थेऊङित्त्वं चरितार्थमिति वाच्यं। सत्वविधेस्पदादेरनुवृत्या तदंतविधेः सते विशिष्टस्य स्थान्यवयवत्वेपि केवलपदादेरिपि स्थान्यवयवित
स्यारूतत्वान्निर्दिश्यमानपरिभाषया विशिष्टस्य सत्वाप्रवृत्तावपि राऊदिविधावनुवृत्तस्यांगस्येत्यस्य केवलस्यातिप्रसंगेन स्यानित्वासंभवात्त
दंतविधिनावृत्तंकृदंतांगस्यैवस्यानित्वस्य वाच्यतया तत्र निर्दिश्यमानपरिभाषाप्रवृत्त्या निर्दिश्यमानस्यैवादेशसिद्धौ तद्वैयर्थ्यस्य स्पष्टत्वात्। त
थासति निर्दिश्यमानस्येत्यस्य साक्षादनुवृत्त्या वा निर्दिश्यमानस्येत्यर्थो बोध्यः। पादः पदिति सूत्रे एतत्परिभाषायाः अतिस इत्युदाहरणदानपर
भाष्यादयमर्थोऽवसेयः। सो न्याफलांतरं व्यवच्छेदयति। एतेनेनेति। तच्चैव भाष्यविरोधं दर्शयति। ह्वयवरट्सूत्रस्थेनेति। नन्वेतत्परिभाषावत
र्णियदामन्यायमात्रजन्यविशिष्टस्यस्यानित्वबाधकत्वं हिलभ्यते तथा च सुपर्द इत्यसिद्धिप्रसंगः। न च सामान्यतो बाधकत्वमेवास्त्विति वाच्यं

चित्र ।तथासतिनचास्य चाविता युक्तरग्रंथविरोधात्।जातिपक्षाश्रयदीर्घादीनास्थानित्वस्य बाधात्।जातिपक्षे दोषाभावादितिसमाधानासंगत्यापत्ते
२१ रित्यतआह।अनपेति।तया चोपस्थितत्वात्तयोरेकावयवत्वेपि दस्याप्युपलक्षणमिति भावः।अलोंत्यस्येत्यस्येत्यादीनां केषांचिन्निर्दिश्यमानपरि
भाषाबाधकत्वमभिमतं खंडयितुं सिद्धांतमाह।अनयाचेति।समावेशइति।एकवाक्यत्वेनेत्यर्थः।नन्वलोंत्यपरिभाषयांत्यस्य स्थानित्वं आदेः परस्ये
त्यनयाचयस्यागमाइतिन्यायप्राप्तस्य सागमविशिष्टस्यादेः स्थानित्वं अनेकाल्शित्वनया च तदंतविधिलब्धविशिष्टस्य स्थानित्वं निर्दिश्यमानस्येत्यन
यात्तु विपरीतमिति विरोधान्न समावेशो युक्त इति चेन्नात च्छेषपक्षेमजेर्वृद्धिरित्यादावेकवाक्यतया परिभाषाद्वयस्यान्वये विरोधवदत्रतदभा
वइत्याशयात्।ननु विरोधाभावेपि बाध्यबाधकभावाभावेपि अंगांगीभावः कुतो नेत्यत आह।नापीति।गुणानां च परार्थत्वादसंबंधः समत्वात्स्या
दितिन्यायात्।नन्वेवमपि येनविधिस्तदंतस्यागमाइत्युभयबाधितस्यानिनोऽनेकाल्शित्त्वात्सर्वपदेनग्रहणान्निर्दिश्यमानपरिभाषयाविरोध
संभवेन तस्यादः स्यात्संभोरित्यस्य प्रवृत्तिव्यावर्त्तकत्वेन चरितार्थत्वादत्र परत्वादनेकाल्त्वस्य महत्या सुपदेर्निर्जरसे इत्याद्यसिद्धिः स्या
दत आह।अनेकालिति।नन्वेवमपि जरायाजरसित्यस्यांगाधिकारस्थत्वात्तदंतविधौ जगशब्दांतेऽनेकाल्शित्वबाधेनास्याश्चारितार्थ्येनालों २१

त्यस्यादेः परस्येतिपरिभाषाद्वयमनवकाशत्वादस्याबाधकं स्यादिति कस्यचिच्छंकामनुवदति।यत्त्वादेरित्यबाधकत्वेनोपपत्तौ वा धेनन्यायइत्या
शयेन परिहरतितन्नेति।तत्रैव प्रमाणमाह।जरस्यादिति।विंशतेरिति।तत्र हि तिग्रहणं कित्यर्थे विंशतेर्डितिलोपइत्युच्यते।नैवं शकं विंशते
र्डितिलोपइत्युच्यमानेऽत्यस्य प्रसज्येत।सिद्धोऽत्यस्य यस्येतिलोपेनैवातत्रारंभसामर्थ्यात्तिशब्दस्य भविष्यतीति तिशब्दस्य वैयर्थ्यं प्रतिपाद्यापक्रि
यमाणेपि तिग्रहणेंत्यस्य कस्मान्न भवतीत्याशंकानिर्दिश्यमानस्यादेशा भवंतीति समाहितं भाष्ये।तत्र निर्दिश्यमानस्येति प्रतीकमुपादायनानेन पा
रिभाषायाव्यापारः कथ्यते नंहि निर्दिश्यमानपरिभाषाऽलोंत्यस्यादेः परस्येत्येतयोर्बाधिका एतयोर्निर्विषयत्वप्रसंगात्।तस्मात्तिग्रहणसामर्थ्या
दलोंत्यस्यानुपस्थाने सर्वस्यैव लोपो भवतीत्ययमस्य भाष्यस्यार्थ इति केचित्।ननु किमः कइति निधीयमानः कादेशोऽनयपरिभाषयाऽकज्विशिष्ट
स्यनस्यादत आह।अकज्विषयेनेति।अत्र प्रमाणं च अइत्येव वक्तव्ये कादेशविधानमेव।कादेशविधानं हि अकज्विशिष्टस्यादेशार्थं।अकज्वि
षये निर्दिश्यमानपरिभाषाप्रवृत्तौ तु तद्वैयर्थ्यं स्यात्।नचइमकमइत्युक्तेत्यदादीनामित्यस्यानुवृत्तावप्यलोंत्यस्यस्यादितिवाच्यं।किंशब्दस्यदेः प्राक्पवि
ष्पमाणत्वेन त्यदादीनामित्येव सिद्धे एतद्विधानवैयर्थ्यापत्तेः।नचैवमपि कुतिहोरित्यादावर्थं किमइति वक्तव्ये तावन्मात्रप्रयोजनकत्वेनत्वे

ल॰शे॰स॰ २२ ह्रो रित्येव सिद्धेः। यत्तु केयटानुयायिन इत्यादिना पूर्वोक्तमेवार्थमनूद्य इति वदंतः आवृत्त्यासाकं कस्यादेशा इति स्वमतं घातं चापत्रपंत उपेक्ष्या॥ अत्र पक्षे इग्भावित्यादावतिव्याप्तेश्चेति केषांचिदुक्तिरयुक्ता। आवृत्त्या विधाने प्रमाणाभावात्। आवृत्तिसामर्थ्यादेव निर्दिश्यमानपरिभाषाया बाधे तदप्रवृत्तौ ज्ञापकत्वासंभवाच्च। इग्भावित्यादौ किमः क इति सूत्रे विभक्त्यनुवृत्तौ। तस्मिन्निति परिभाषाप्रवृत्त्या पादादीनामिति जायमानस्याकारस्य व्यवधायकत्वेनाव्यवहितविभक्तिपरत्वाभावादिमः अ इत्यस्याप्रवृत्तौ अतिव्याप्तेरसंभव एवेति बोध्यं। नन्वेवं षष्ठ्याः स्थाने निर्धारितसंबंधविशेषे एव प्रवृत्तिरिति तदर्थकत्वेनैतस्या अपि तत्रैव प्रवृत्तौ निर्दिश्यमानावयवरूपमिति द्वितीयार्थस्यायुक्तत्वादतिसङ्गत्यातिप्रसंग इत्यंतत आह। इयं चेति। चशब्दो वाक्यालंकारेऽर्थे वा। किमत्र प्रमाणमिति निरपेक्षस्यानुरोध एवेति सूचयितुं तदर्थफलमाह। अत एवेति। परिभाषायाः सत्वे प्रमाणमाह पादः पदिति। तत्र हि पादस्य पदादेशः स्वत्वं वक्तव्यं। द्विपदः पश्य। आदेशे हि सर्वादेशः प्रसज्येत येन विधिस्तदंतस्येति। तत्तर्हि वक्तव्यं न वा निर्दिश्यमानस्यादेशा भवंतीति निराकर्तेता भाष्यकृतास्य स्वीकृतेयम्। इदानीं स्थान्यादेशभावप्रसंगेन प्रसंगसंगत्या निर्दिश्यमानपरिभाषामूलभूतषष्ठीस्थानेयोगेतिसूत्राव्यवहितोत्तरवृत्तिस्थानेंतरम इति सूत्रोपस्थित्या तद्रूपस्याप्ययत्नेनेति परिभाषामवतारयति। नन्वित्यादिना। आंतर्यमित्यस्य सादृश्यमित्यर्थः। न चात्र प्रमाणं गुणत्वादिरेव तस्य च गुणग्रहणेनैव ग्रहणात् पृथग्युक्तिर्निरर्थकेति वाच्यं। गोबलीवर्दन्यायेन पृथगुक्तेः। गुणशब्दश्चात्रोक्तजातिव्यतिरिक्तधर्ममात्रपरः। तेनांतर्यमेवैतयोरांतर्यमिति स्थानेंतरतम इति सूत्रस्य भाष्येण न विरोधः। ऋकारलृकारयोर्गुणविधावंतरतमाभाव एव सादृश्यं इति तदर्थः। न च बाह्यानां विवारादीनां सादृश्ये हेतित्वाभावेन गुणग्रहणेन ग्रहणं न स्यादिति वाच्यं। तेषां साक्षात्त्वाभावेप्यौपचारिकं तत्त्वमादाय गुणत्वात्। स्पष्टं चेदं तत्र त्यक्त्वा इति रत्ने। तमपूग्रहणमेवेति। यद्येकविधं स्थानकृतमेवांतर्यं स्थानेंतर इत्येव सिद्धे तदेयथ्येस्य स्पष्टमेव। अतिशायिकेर्थे तद्विधानात्। अतिशायस्य च प्रतियोगिसापेक्षत्वेनानेकविधांतर्यसत्त्वे एव तदुपपत्तेरिति भावः। स्थानत इति। आद्यादित्वात्तसिः। तात्तसिः। स्थानेनेत्यर्थः॥१४॥ ननु स्थान तच्चांतर्यस्य प्राबल्यप्रतिपादनेपि शेदवान्न सिध्यतीति तत्सिद्ध्यर्थमर्थवत्परिभाषामवतारयति। नन्विति। परिभाषायां बीजमाह। रूपेति। अयमेवास्यां मूलमतो भाष्ये स्वं रूपमित्यस्य प्रत्याख्यानेपि नदीपद्ध इत्यभिप्रायं सूचयितुं स्वं रूपमिति न पूर्वं लिखितम्। नन्वेवमप्यत्र प्रसिद्धत्वात् लौकिकार्थस्यैव ग्रहणे पटुजातीयायेत्यादावनया। प्रसंग

चित्र वारणंनसिध्येदतआह॥अत्रार्थइति॥शास्त्रीयोपाति॥प्रकृतिप्रत्ययपदविबोधोपात्यर्थः॥अपिशब्दाल्लौकिकार्थश्च॥अत्रभाष्यंप्रमाणयति॥सं
२३ ख्यायाअतीति॥तत्रहिउतेश्चेतिवक्तव्यं॥इहापिस्यात्कंतिभिःकृतंकति॥किंपुनःकारणंनसिध्यति॥त्यंतायानेतिनिषेधःप्राप्नोति॥त्याशंक्याअ
र्थवद्ग्रहणात्सिद्धमितिसमाधाय॥नैषापरिभाषाशक्याविज्ञातुनहिकेवलेनप्रत्ययेनार्थोगम्यतेकेनतर्हिसप्रकृतिकेना॥कतर्हिएषापरिभा
षाभवतियान्येता॥निशाद्यसंघातग्रहणानिइतिवार्त्तिककृतापरिभाषाप्रवृत्तिवारणेनवार्त्तिकेव्यवस्थापितेतत्तर्हिवक्तव्यंनवक्तव्यमर्थव
द्ग्रहणात्सिद्धमितिनिराकृत्य॥ननुचोक्तंकेवलेनापिप्रत्ययेनापिप्रत्ययेनार्थोगम्यते॥कथमुक्तं॥अन्वयव्यतिरेकाभ्यामित्युक्तं॥वर्णग्रह
णेषुनेयंप्रवर्त्ततेइत्याहइयमिति॥तच्चभाष्यंप्रमाणयतिलस्येति॥तत्रहिलादिशाःसर्वस्यलकारस्यप्राप्नुवंती॥त्याशंक्यार्थवद्ग्रहणात्सिद्ध
मितिसमाहितेऽर्थवद्ग्रहणात्सिद्धमितिचेन्न॥वर्णग्रहणेषुवर्णग्रहणमिदं॥नचैतद्वर्णेषुभवत्यर्थवत्ग्रहणेनार्थनैकस्येति॥तस्मादिशि
ष्टस्यलस्यग्रहणकर्त्तव्यमित्युक्तं॥अतएवेति॥वर्णग्रहणेएतदप्रवृत्तेरेवेत्यर्थः॥येनविधिस्तदंतस्येतिसूत्रेअल्ग्रहणेवानर्थकेननान्येनानर्थके
नेतिवक्तव्यं॥किंप्रयोजनं॥हन्ग्रहणेप्लीहघ्नं॥अग्रहणेगर्गभ्रूहणं॥स्त्रीग्रहणे॥शास्त्रीग्रहणंसंग्रहणेप्रायसंकरोती॥तिग्रहणंमान्दित्युक्तं॥इन्ग्रहणे २३

इन्हन्निति सूत्रेइत्यर्थः॥तेनसाहाहानावित्यत्रदीर्घनिषेधोना॥अग्रहणेउदःस्थास्तंभोरितिसूत्रे॥तेनगर्भस्यस्यास्यती॥तिपूर्वसवर्णाभावः॥स्त्रीग्रह
णेस्त्रियाइतिसूत्रे॥तेनशास्त्रावित्यत्रेयङ्॥ना॥संग्रहणेसंपरिभ्यामितिसूत्रे॥तेनप्रायसंकरोती॥तत्रसुट्॥ना॥तथाचयद्यनर्थकेनतदंतविधिस्तर्हि
लेवनान्येनानलाऽनर्थकेना॥अपित्वर्थवतेतिबोधयता॥भाष्यकृताअर्थवद्ग्रहणइतिपरिभाषावर्णग्रहणेनप्रवर्त्ततइतिबोधितं॥॥शास्त्र
कारस्तेतस्वशब्देनभाष्यमतेविशेषणतयाचोपस्थितोयोऽर्थःससतिसंभवेमुख्यएवगृह्यतेनगौणइत्यवसरसंगत्यागौणमुख्यपरिभाषाम
वतारयति॥नन्वेवमिति॥गुणादागतइति॥स्वशब्दार्थनिष्ठगुणसजातीयगुणसजातीयगुणहेतुकारोपविषयधर्मनिमित्तकप्रवृत्त्याश्रयत्रा
द्दनिष्ठजनकतानिरूपितजन्यतावच्छेदकावच्छिन्नबोधीयविषयतानिरूपितविषयताश्रयइत्यर्थः॥इममेवार्थंदर्शयति॥यथेति॥गोश
ब्दनिष्ठशक्ततानिरूपितशक्यताश्रयनिष्ठजाड्यादिगुणसजातीयजाड्यादिगुणहेतुकारोपविषयगोत्वादिनिमित्तकप्रवृत्त्याश्रयशब्दजन्यबो
धीयारोपितगोत्वादिनिष्ठप्रकारतानिरूपितविशेष्यताश्रयइत्यर्थः॥संज्ञादिरपीत्यादिशब्दग्राह्यश्चशक्यसंबंधरूपलक्षणागम्योऽर्थः॥तद्गुणा
रोपादिति॥यश्चचकशब्दप्रयोगस्तीदृशगुणारोपादित्यर्थः॥एतेनाभिव्यक्तपदार्थायेइतिन्यायःसंगृहीतः॥मुख्यपदार्थमाह॥मुख्यमिवेति॥प्रथा

चित्र नत्वादितिसादृश्येहेतुरयंप्रथमइति। प्राथमिकशक्तिजन्यबोधविषयः मुख्यइत्यत्र शाब्दादिन्यायप्रत्ययः। मुख्यार्थारोपेणगौणार्थेप्रयुज्य
२४ मानेनशब्देनमुख्यार्थस्यप्रथमोपस्थापनेनतादृशप्राथमिकोपस्थितिविषयार्थमादायकृतार्थस्यशास्त्रस्यगौणार्थमादायप्रवृत्तिकल्पनेमा
नाभावएवास्माबीजमित्युद्घाटयन्नाहगौणेह्यर्थेइति। उपपादितंचैतत्तृतीयाध्यायस्यद्वितीयपादेप्रथमाधिकरणेमीमांसकैः। तथाहिब
र्हिर्देवसदनंदामीत्याम्नातंलवनप्रकाशकंमंत्रविचारः। लवनप्रकाशनसामर्थ्येनलिंगेनलवनक्रियायांयएतस्यविनियोगःसमुख्यबर्हि
र्लवनक्रियायामुतगौणमुख्यसाधारणबर्हिर्लवनेइतिविकल्प्य। बर्हिर्द्विविधंमुख्यंगौणंच। मुख्यंकुशकाशादिदशविधदर्भरूपंगौणंत
त्सदृशात्तृणान्तरंतस्मिन्बर्हिःशब्दस्यमाणवकेऽग्निशब्दवद्गुणयोगेनप्रवृत्तत्वात्। एवंचोभयोरपिशब्दार्थत्वाविशेषेणदर्भस्येवतृणान्तर
स्यापिलवनेमंत्रस्यविनियोगोनकिंचिद्बाधकमितिप्राप्ते। मुख्यस्यप्राथमिकोपस्थितिविषयत्वेनतत्रमंत्रेविनियुज्यचरितार्थस्यलिंगस्य
लिंगस्यविलंबोपस्थितिविषयेगौणार्थेविनियोजकत्वकल्पनेप्रमाणाभावः। मुख्येनिराकांक्षस्यतस्यान्याकांक्षाविरहात्मुख्यस्यैवलवनेमं
त्रस्यविनियोगइतिसिद्धांतइति। एवंचेति। अप्रसिद्धस्यसंज्ञादेर्गौणलाक्षणिकस्यचोभयोरपिग्रहणयोगाभावेऽणत्वेसतीत्यर्थः। अत्रोभयविध २४

गौणत्वग्रहणेत्वग्रहणेफलमाह। तेनेति। उभयविधगौणत्वातिरिक्तार्थान्तरोपसंक्रान्तत्वरूपगौणत्वस्याग्रहणेनेत्यर्थः। नन्वत्रोभयविधमेव
गौणत्वंगृह्यतइतिवदतांमतेप्रियत्रयाणामित्यत्रदोषाभावेपिगुणएवगौणश्चेत्। विशेषणीभूतइत्युपसर्जनसाधारणेनगौणत्वमभ्युपेय
तांपूर्वोक्तातिप्रसंगस्तदवस्थएवेत्यतआहकिंचेति। नद्यादिति। पदिकार्येइति। तत्रबीजमाह। परिमितस्येति। विशिष्टरूपमित्येवव
क्तंमेवयानेत्यादिविशेषणव्यर्थत्वंदर्शयति। अश्वरश्मेति। धीतायविशेषणस्यापीदमेवकृत्यं। एतदेवप्रतिपादयितुंशंकते। नचे
ति। नन्वेवमोत्सूत्रेभाष्येऽओदंतोनिपातइत्यत्र अंतस्यप्रतिषेधोवक्तव्यः। अनदः। अदः। समभवदसोऽभवदित्यर्थेओतश्चप्रतिषेधइ
तिवार्त्तिकंव्याख्यायनवक्तव्यः। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवंनभविष्यतीतितत्प्रत्याख्यानानंतरमेवमप्योगौः संपद्यतेगो
ऽभवतअत्रप्राप्नोतीत्याशंक्यएवंतर्हिगौणमुख्ययोर्मुख्येसंप्रत्ययइतिसमाहितंभगवतातद्विरुध्येतपदकार्यत्वेप्यतइतिनिर्विशिष्टा
र्थोपस्थापकविशिष्टरूपोपादानाभावात्परिभाषाप्रवृत्तेरसंभवादित्यतआह। निपातपदंत्विति। अग्नेस्तुदितिसूत्रस्थंभाष्यंहि अग्नेर्दीर्घा
त्सोमस्येतिवक्तव्यं। अग्नीषोमौ। इतरथाहिअनिष्टप्रसंगः। अग्निःसोमोमाणवकाविति। तर्हिवक्तव्यंनवक्तव्यंगौणमुख्ययोर्मुख्येसंप्रत्यय

चित्र इतिगांपाठयेत्यादावित्। इदं च प्रयोक्तृणामर्थैकत्वप्रतीतिर्नवेत्यूहणामित्यभिप्रेत्योक्तादवस्तुतस्त्वेषा न संभवति। अर्थवत्त्वाद्वाक्यस्य प्राातिप
२५ दिकसंज्ञा स्यात्प्रतिषेधो वक्तव्य इत्युक्तेरनंतरं नैव पदार्थादन्यस्यार्थस्योपस्थितिर्भवतीवाक्ये इत्याशंकिते पदार्थानिसंबंधस्योपलब्धिर्भ
वतीवाक्येइत्युक्त्वा। इह देवदत्त इत्युक्ते कर्त्ता निर्दिष्टः कर्म क्रियागुणौ चानिर्दिष्टौ गामित्युक्ते कर्म निर्दिष्टं कर्त्ता क्रियागुणौ चानिर्दिष्टौ अभ्याज
त्युक्ते क्रियानिर्दिष्टा कर्तृकर्मणी गुणश्चानिर्दिष्टः शुक्लामित्युक्ते गुणो निर्दिष्टः कर्तृकर्मणी क्रिया चात्रानिर्दिष्टा। इह इदानीं गामभ्याज शुक्लां देव
दत्तेत्युक्ते सर्वं निर्दिष्टं गामेव कर्म देवदत्त एव कर्त्ता अभ्याजेव शुक्लामेव न कृष्णामित्येषां पदानां सामान्ये वर्त्तमानानां यद्विशिष्टेऽवस्थानं स वा
क्यार्थ इति क्रियाकारकसंबंधरूपवाक्यार्थव्यवस्थापयता भाष्यकृता विभक्त्युत्पत्तिवेलायां प्रयोक्तॄणामपि गौणार्थत्वप्रतीतिर्नैव भवतीत्य
भिप्रायस्य सूचितत्वादित्याह किं चेत्यादिना। अभिव्यक्तपदार्था येइत्यस्य परिभाषांतरत्वमिति भ्रमं निराकरोति। एनमिति। प्रकृतन्यायेप्रमा
णांतरमाह। ध्वनितं चेदमिति। ननु श्रोत्रसूत्रे भाष्ये कथं तर्हि वाहीके वर्त्तमानस्य वृष्यात्वे भवतः। गौस्तिष्ठति गामानयेत्याशंक्य। अर्थाश्रयेएत
देवत्तियं छितुश्चा ह्याश्रयश्च द्रमात्रमेतत् भवतिश्च ह्याश्रये च कृष्यात्वेइतिसमाहितं। एतन्भाष्यविरोधाद्विशिष्यार्थोपस्थापकं विशिष्टरूपं यत्त २५

त्रपरिभाषाप्रवृत्तिरास्तां नाम तत्रापदकार्ये एवेति नियमः परं न संभवति। अन्यथा तथैव भाष्यकारः समादध्यात्। तस्मात्परिभाषायाः पदकार्य
विषयकत्वकल्पनमप्रामाणिकं। न चास्त्वं त्वं संपद्यते इत्यादिभाष्यानुपपत्तिरेव प्रमाणं। भाष्यप्रयोगाणां परिभाषाऽनित्यत्वेनाप्युपपत्तेः न चानि
त्यत्वे प्रमाणाभावो दत्तोत्तरत्वात् इत्यत आह। अर्थाश्रयेइत्यादि। लौकिकार्थेति। पदजन्यप्रतीतिविषयार्थेत्यर्थः। भाष्यस्य तथार्थकत्वकल्पनेन विरो
धाभावइति भावः। तद्रहितश्चाह्याश्रये चेति। पूर्वोक्तार्थरहितश्चाह्याश्रये चेत्यर्थः। अत एव श्चाह्याश्रये चेति प्रतीकमुपादाय स्वार्थे वृत्तात्प्रातिपदिका
द्विभक्त्युत्पत्त्या कार्येषु कृतेषु श्चाह्यांतरसंनिधानात्ज्ञोणत्वं प्रतीयत इत्यादिकैयटोक्तिरपि संगच्छते। ननु श्चाह्याश्रये चेत्यस्यार्थरहितवर्णमात्राश्रये
इति प्रतीयमानएवार्थः कुतो नेत्यत आह। गोत इति यथाश्रुते तिगकाराद्विवक्षायामसत्यामिति भावः। युक्तं चैतत्। वा अस्यैव मतस्य सिद्धांतभूतत्वा
त्तस्यष्टं चेदं तन्त्रे वर्श ह्रेदुश्चोस्तरेषु। रधा। अर्थवद्ग्रहणपरिभाषांगभूतगौणमुख्यन्यायमुक्त्वा तत्परिभाषापवादभूतां परिभाषामवतारयति। अर्थव
दिति। सामाइत्यादावित्। नन्वत्राभ्रोपोन इति सूत्रे वर्णग्रहणादर्थवत्परिभाषायाः प्रवृत्त्यैव ह्यसिद्धेरस्यापादानं निरर्थकमिति चेन्न। वर्णग्रह
णेइत्यस्य वर्णमात्रग्रहणे इत्यर्थात्। अत एवो दिति सूत्रे गोऽभवदित्यादिप्रगृह्यसंज्ञाप्रवृत्तिमाशंक्य निपातपदानुवृत्त्या विशिष्टस्यादेशत्वादर्थवद्ग्र

हणपरिभाषामूलकगौणमुख्यन्यायेनसमाहितंभाष्ये।सुस्रोता।इति।सुरीभ्यांतुड्चेतिसूत्रेणसुन्प्रत्ययस्यतुडागमेनसिद्धमिदं।नन्वत्रासःप्रत्ययत्वे
नार्थवत्त्वात्कथमिदमुदाहरणंसंभवेदितिचेदत्राहुः।अनार्षमेकाआदेशाइत्याश्रयणेनात्रासआनकत्वात्।अर्थवेति।आगमइतिन्यायाश्रयणेनत्वर्थव
त्वासत्राद्यन्तवदेवमुदाहरणंचिंत्यमितिकेचित्।आगमसंनिधावागमविशिष्टस्यैवार्थवत्तयान्याय्यत्वेनपक्षांतरप्यत्राद्यस्यानर्थकसंभवात्समीची
नमेवेदमुदाहरणमितिपरेस्पष्टंचेदंत्रित्रेवोयोतेप्राचीनमतंखंडयितुमुपन्यसति।अन्येत्विति।परिपूर्वाद्धिपूर्धातोर्विध्यर्थकत्वसिद्धाविप्सोदित्वे
णिजांत्रयाणामित्यभ्यासस्यगुणेचवेविषा धैमित्यत्रवेवीतीणः परत्वात्षाधर्मोगग्रहणभावेदत्वमापद्येतसतितुतस्मिन्नेवात्यस्यैणंतागत्वाभावान्न
दत्वं।अर्थवत्परिभाषायाअसार्वत्रिकत्वमूलकमेवेदंनापूर्वमितितेषामाशयः।आद्रुरित्यनेनसूचितामसत्त्विंतापनविघटनद्वाराप्रकटयति।विभा
षेटइत्यत्रेति।आगमसंनिधौतद्विशिष्टस्यैवार्थवत्त्वेनेटिसतिविभाषेटइत्युत्तरसूत्रेऽनर्थकस्येवषाधर्मःसंभवाद्धर्मोधिकारानुरोधादिणःषाधर्ममिति
सूत्रेपितस्यैवग्रहणंस्यादितिनव्यमतनिष्कर्षः॥१५॥नन्वर्थवत्परिभाषानुरोधेनविभाषेटइत्यत्रषाधर्मोऽसंबंधएवेतिप्राचीनोक्तमंगग्रहणस्यप्रा
पकत्वंसम्यगेवेत्याशंकांपरिहरन्तत्संबंधस्यावश्यकतांवक्तुंपरिभाषामवतारयति।नन्वस्येति।वाशंबद्धइति।नचपरिभाषायांवाशब्दस्यसत्वादे

५लिङ्ःसलोपइतिसोद्भवःसस्यलोपइतिशेषः।५

कवचनमयुक्तमितिवाच्यं।जातावेकवचनमित्याशयात्।वाशब्दवित्यैवार्थः।वास्यादिकल्पोपमयोरेवार्थेपिसमुच्चयेइतिकाशादितिभावः।अस्यलो
कन्यायसिद्धत्वमाह।एककार्येति।कस्यचिन्मतंदूषयति।यत्वित्यादिना।नत्रोनिवृत्तिस्त्विति।इष्टानुरोधेनेतन्यायस्यन्यायांतरेणबाधइतिभावः।
नेड्वशीतिसूत्रेभाष्येइति।तत्रहिकमर्थंपुरस्तात्प्रतिषेधउच्यतेनविप्रत्युत्तरकालःप्रतिषेधःक्रियतेइतिपुरस्तात्प्रतिषेधेअंशोषिप्ते।तत्राप्ययम
र्थःद्विरिड्ग्रहणंनकर्त्तव्यंभवतीतिविप्रत्युत्तरकालप्रतिषेधेप्रयोजनमुपपाद्यकिंचिद्विचारांतरंकृत्वाग्रेगत्वापुरस्तादपिप्रतिषेधेसतितन्नकरि
ष्यते।कथमिदमस्ति।नेड्वशीतितत्रोवक्ष्यामिआर्द्धधातुकस्यवलादेरिति।इडितिवर्त्ततेनेतिनिवृत्तमित्युक्त्वातत्सूत्रस्थमिड्ग्रहणंप्रत्याख्यात।इदि
पूर्वोक्तपरिभाषापवादभूतांपरिभाषामवतारयतिनन्वेवमिति।संदेहेवप्रवृत्तिनिवृत्त्यंगाकारेचेत्यर्थः।अनुपपन्नमितिपुनरुक्तिर्मदबुद्धिबोध
नार्था।पक्षात्विरितिसूत्रेकेपठइति।नचहिम्लइतिवक्तव्यं।पक्षस्यमूलंपक्षाति।तत्रहिंवक्तव्यंनवक्तव्यं।म्लइतिप्रकृतंवर्त्तकप्रकृतं।तस्यपाक
मूलेपील्वादिकर्णादिभ्यःकुणजाहचावितियदितदनुवर्त्ततेपाकेपिप्राप्नोति।त्याशंकाम्लइतिवर्त्ततेपाकेतिनिवृत्तमितिसिद्धांतिनोक्तं।ततए
कदेश्याहकथंपुनरेकयोगनिर्दिष्टयोरेकदेशोनुवर्त्ततेएकदेशोवानिवर्त्ततेइतितत्रेकयोगनिर्दिष्टयोरितिप्रतीकमुपादायकैमटेनतयोक्तांके

चित्
२७

यदपदस्य चिंतारुचिबीजं त्वोतोम्शसोरितिसूत्रस्थ भाष्यविरोध एवेति सूचयन् प्रकृतपरिभाषयोर्भाष्यारूढत्वमाह। स्पष्टं चेयमित्यादि। तत्र दाम
हायनांतादितिसूत्रे तत्तु हि संख्यादेरिति वक्तव्यं न वक्तव्यं संख्याव्ययादेरित्यतः संख्यादेरित्यनुवर्त्तते अव्ययादेरिति निवृत्तं क्वचिदेकदेशोप्यनुव
र्त्तत इत्युक्तं। ओतोम्शसोरिति सूत्रे तु। ओत इति ङिप्रतिषेध इति वार्तिकप्रयोजनान्यथासिद्धये सुब्धिकारात्सिद्धं सुपीति प्रकृतं वर्त्तते कथं प्रकृ
तं वा सुप्यापिशलेरिति। यद्यनुवर्त्तते इहापि विभाषा प्राप्नोति। त्वाशंक्यानेन न्यायेना लुगुत्तरपदे इति दृष्टांतेन सुपीति निवृत्तमित्युक्तं। अर्थाधिकार
पक्षे द्वंद्वस्य तत्तदर्थस्यैकत्वेन विच्छेदाभावान्नास्यैकदेशानुवृत्तिरित्याशयेन पक्षात्तिरितिसूत्रस्थ कथं पुनरिति पूर्वपक्षभाष्यं प्रवृत्तं। शब्दाधि
कारपक्षे यस्यैव शब्दस्य स्वरितत्वं प्रतिज्ञातं तस्य शब्दांतरसंनिधानं योगांतरे प्रतीयत इति हि सिद्धांतिभाष्याशयः। तत्रापि शब्दं प्रयुंजानेन भा
ष्यकृतैकसमासेपि तथा वृत्तौ किंतु वाच्यमसमासे इत्याशयः सूचनान्नोतोम्शसोरितिसूत्रस्थ भाष्यविरोध इति विभावयंतु सुधियः॥१७॥ न
न्वार्धधातुकस्येडिति सूत्रस्थ उग्रहणस्य गुणरूपविकाराभावार्थं वर्णग्रहणप्राप्तदीर्घाभावार्थत्वमपि स्यात्तथा सति दीधीवेवीटामिति सूत्रस्थ
प्रत्याख्यानपरं भाष्यमसंगतं स्यादित्यतोऽवसरप्राप्तां भाव्यमानेनेति परिभाषामवतारयति। नन्वित्यादिना। नन्वप्रत्यय इत्यस्यैकदेशानुमतिः। २७

त्। एतत्परिभाषाज्ञापकत्वमयुक्तं। योगेन प्रत्यय इत्यस्य भाव्यमानार्थकत्वेनेष्टसिद्धेरित्यरुचेराह। किंचेति। वस्तुतस्तु न्यायादादिति सूत्रस्थ भाष्यस्या
पि कृत्रिमाकृत्रिमन्यायबाधेन प्रत्यय इत्यस्य यौगिकार्थबोधनद्वारा परिभाषाज्ञापनपरत्वं। न चैवमणुदित्सूत्रस्थाप्रत्ययादेशादित्स्थितमिति इ
ति वार्त्तिकस्यैवं तर्हि सिद्धे यदप्रत्यय इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा भाव्यमानेन सवर्णानां ग्रहणं नेति। इति भाष्यस्य चानु
पपत्तिरिति वाच्यं। प्रत्ययपदेनैतच्छास्त्रसंकेतितप्रत्ययमादाय वार्त्तिकस्य यौगिकप्रत्ययपदमादाय भाष्यस्य च प्रवृत्तेः। उपायस्योपायांतरा
दूषकत्वेनाविरोधाच्च। तस्माद्भाव्यमानेनेति प्रतीकमुपादाय प्रतीयते विधीयत इति यौगिकस्यात्र प्रत्ययस्य ग्रहणमिति कैयटोक्तिः संगतैव।
एतेन पूर्वपक्षसिद्धांतभाष्ययोर्निर्देशत्वाप्रत्ययप्रतीयत इत्यस्य विधीयत इत्यर्थस्तु न युक्त इत्यपास्तं॥१८॥ पूर्वोक्तपरिभाषापवादमाह। नन्वे
वमित्यादिना। नन्वत्र तद्इति समाहारद्वंद्वेनैव निर्वाहे परिभाषाकल्पनमयुक्तमिति चेन्न। वस्तुतः स्वद्इति द्वंद्वे सुलोपे घ्यंतत्वात्तस्य पूर्वनि
पातेन प्रसक्तह्रस्वसवर्णदीर्घयोः प्राप्तयोर्दीर्घस्य शब्दांतरप्राप्त्याऽनित्यत्वेनानित्यत्वाद्परनिमित्तकत्वेनांतरंगत्वाच्च ह्रस्वे ततः सवर्णदी
र्घे वह्वितरूपासिद्धेरिति शेखरे स्पष्टं। एतस्याप्रामाणिकत्वं सूचयन् भाष्यारूढत्वं दर्शयति तित्स्वरितमिति। न। त्रहिति तिप्रत्ययग्रहणं क

चित्. र्त्वमिदमाभूत्॥ऋत इद्धातोः॥किरतिगिरतीति।वार्त्तिकंनेषत्तकारःकस्तर्हिइकार इति प्रत्याख्यायमत्तत्रदकारस्तर्ह्योनर्थकोदीर्घ
२८ स्यदीर्घःप्राप्नोतीत्याशंक्यभाव्यमानेनसवर्णानांग्रहणंनेतिसमाधायपुनर्यदिभाव्यमानेनसवर्णानांग्रहणंनेत्युच्यतेअदसोसे
रित्यमूभ्यामित्यत्रदीर्घोनप्राप्नोतीत्याशंक्यभाव्यमानेनाप्युकारेणसवर्णानांग्रहणमित्याचार्यप्रवृत्तिर्ज्ञापयतियदयंदिवउदित्यु
कारांतरपरंकरोतीत्युक्तं।वस्तुतस्तुअदसोसेर्दादुदोमइत्यत्रसमाहारद्वंद्वएवन्याय्यः।सूत्राक्षरेणनिर्वाहेसंभवतिज्ञापकसिद्ध
वचनकल्पनस्यान्याय्यत्वात्।फलांतराणुपलब्धेश्च।नित्यत्वादंतरंगत्वाच्चस्वेवइतिरूपासिद्धेरितितुनसूक्तं।उभयोर्नित्ययोरेक
त्रविरोधप्राप्तेपरत्वात्परस्यैवप्रवृत्तेर्न्याय्यत्वात्।सत्यपिद्वस्वस्यांतरंगत्वेधर्मिकल्पनापेक्षयाधर्मकल्पनस्यौचित्येनैतन्निर्देशसा
मर्थ्यादसिद्धंबहिरंगमितिपरिभाषायाश्चानित्यत्वकल्पनेनादोषाच्च।अंतरांतरप्राप्त्याऽनित्यत्वकंस्यव्याघातापत्त्या।क्वाचित्कंसतिग
मकं।तित्स्वरितमितिसूत्रस्थंभाष्यंतुसमाधानोपायांतरपरतयानप्रतिकूलतामावहतीति।उपायस्योपायांतरादूषकत्वात्।नचैवं
दिवउदित्यत्रतपरणंव्यर्थमितिवाच्यं।संप्रसारणसंज्ञासूत्रस्थकैयटोक्तरीत्याहलइतिमाविदीर्घव्यावृत्तिरूपफलस्यसत्वात्।ऋत २८

उदित्यत्रतपरकरणंतुस्पष्टार्थं।मास्तुयवमित्यवधेयं।१९॥सवर्णप्रसंगान्प्रसंगत्वावर्णाश्रयइतिपरिभाषामवतारयति।नन्विति।वर्णप्राधा
न्येति।नन्वविनिगमनाविरहेकथंप्राधान्यएवेतिनियमइत्यतस्तन्निरूपयति।तत्वंचेत्यादिना।अयंभावः।वार्तिकमतेविशेषणतयाला
श्रयणे।नल्विधावितिनिषेधात्स्थानिवत्वाप्राप्त्यातत्रप्रवृत्यर्थंप्रत्ययलक्षणसूत्रंविधायकं।तेनात्यणेडित्यादिसिद्धिः।नत्रस्थानिवदि
त्यनुवृत्त्यैवसिद्धेप्रत्ययलक्षणग्रहणसामर्थ्यात्प्रत्ययत्वव्याप्यधर्माश्रयणेनयत्रप्रत्ययनिमित्तकमेवकार्यंनतुवर्णनिमित्तकमित्यर्थे
यत्रप्रत्ययःप्राधान्येनाश्रीयतेतत्राल्विधावपिविध्यर्थमिदमितिफलति।तथासतिप्राधान्येनवर्णाश्रयेनास्तिप्रत्ययलक्षणमितिसिद्धंभ
वति।केचित्तुप्रत्ययलोपेतल्लक्षणमित्येवसिद्धेद्वितीयप्रत्ययग्रहणात्तल्लक्ष्ममिदं।उपपादितंचैतत्भगवतैव।अथद्वितीयप्रत्ययग्रहणंकि
मर्थंप्रत्ययलक्षणंयथास्याद्वर्णलक्षणंमाभूत्।दिद्गिगवेहितंगोहितंरायइकर्त्तरैकुलमिति।तत्रैववर्णलक्षणमितिप्रतीकमुपादायकैयटेनो
क्तं।प्रत्ययलोपेतल्लक्षणमित्युच्यमानेप्रत्ययस्ययत्रकार्येनिमित्तभावःप्रत्ययत्वरूपाश्रयेणवर्णरूपाश्रयेणवातत्सर्वस्मात्सर्वनाम्नोवस्तुमा
त्रपरामर्शकत्वात्।प्रत्ययग्रहणेतुसतिप्रत्ययनिमित्तमेवकार्यंप्रत्ययलोपेभवतिनवर्णरूपनिमित्तमितिचेत्।इडः।विवक्षितंवर्णप्राधान्यमुपपा

चित इयति। वर्णेषा धान्यं चेति। उभयफलं दर्शयति तेनेत्यादिना। नतु वार्त्तिकोक्तप्रयोजनानामन्यथासिद्धिं प्रतिपाद्य तदनंतरं नतस्मी सनीमयं योगो वक्त-
२९ व्य इति तेन चोदिते वक्तव्यश्च किं प्रयोजनं प्रत्ययग्रहणात्ययदुच्यते तत्प्रत्ययलक्षणेन यथा स्यात् लक्षणं ग्रहणात्मा यदुच्यते तत्प्रत्ययलक्षणे तथा मा भूदि
ति। किं प्रयोजनं। शोभना दृषदोऽस्य सुदृषत्प्रासाद इति सूत्रशेष भाष्ये त्वानियमार्थमिदमिति भाष्यमते नियमस्यानिवक्षत्रस्यानलि धाविति
निषेधेन वर्णविषये प्रवृत्ताप्रत्ययलोप इति नियमशास्त्रस्यापि तत्राप्रवृत्तेरियं व्यर्थेत्यतोऽकुर्वन्नाह इयमिति। तथा च विशेषणतयालाश्रयणे
विध्यर्थमिदमिति वार्त्तिकमते नेयं। भाष्यमते तु नारूपेवेति भावः॥२०॥ प्रत्ययप्रसंगाद् उणादिप्रत्ययांतत्वेनाभिमतानि प्रातिपदिकानि व्युत्प
त्तिकार्याभाववंतीत्यव्युत्पन्नानि व्युत्पन्नानि वेति विचारे आदावव्युत्पन्नानात्पवनारयितुमाह नन्विति। अतः कृकमीत्यत्रेति। विसर्गदेवयोरिति
सूत्रस्याप्रत्ययग्रहणमर्थ्यादन्यत्र धातुग्रहणे तदादिविधिरिति कमिग्रहणेन कंसग्रहणसिद्धिरिति भावः। इदमेवेति। कंसग्रहणमेवेत्यर्थः
। अर्थवत्सूत्रं तु न ज्ञापकं बहुपटवइत्याद्यर्थत्वेन तस्यावश्यकत्वात्। अनभिधानादिति। तत्र प्रमाणं च प्रत्ययस्य लुक्श्लुलुप इति सूत्रस्थं ना
ध्यं तत्र हि कंसीयपरशव्ययोर्यञञौ लुक् चेति प्रकृतेरपि लुक्प्राप्नोतीति तन्निवृत्त्यर्थं प्रत्ययग्रहणमित्युपपादितं तत्प्रयोजननिराकरणापकं २९

सीयपरशव्ययोर्यञञौ भवतस्तच्छ्रयतेश्च लुग्भवतीति विशिष्टनिर्देशमंगीकृत्य विपक्षे दोषोद्भावनद्वारा विशिष्टनिर्देशस्यावश्यकतां द
र्शयति। स चावश्यकं कि विशिष्टनिर्देशः कर्त्तव्यः क्रियमाणेऽपि वै प्रत्ययग्रहणे अयं कारस इयोर्मा भूदिति। कमेः सः कंसः परान्स्पृणोतीति परशु
रित्युक्तं भाष्यकृता। कंसेरमिता इत्यप्रयोगः सत्त्वेऽपि तु तद्विषये दोषोद्भावनद्वारा तदुक्तविशिष्टनिर्देशस्यावश्यकर्त्तव्यताया आनर्थक्यं स्या
त्। तस्मादनभिधानमिति कल्प्यते। अस्याः प्रमाणिकत्वं सूचयन्नस्थलं दर्शयति। प्रत्ययस्येति। तत्र हि। पूर्वोक्तभाष्यसमनंतरमेव वैनेषरे
षः उणादयोऽव्युत्पन्नानि प्रातिपदिकानीत्युक्तं। अत्रादिशा इत्यग्रहणं चायनेयातिसूत्रं। एवुव्यतचावितिसूत्रे तच्च अकारस्य स्वरार्थत्वं निरा
कृत्य तर्हि विशेषणार्थः अप्रत्ययजिति। न इत्युच्यमाने मातरौ मातरः अत्रापि प्राप्नोतीति चकारग्रहणस्य प्रयोजनमापाद्य तत्र सन न त्य
हणं नियमार्थं भविष्यति। एतयोरेव योनिसंबंधवाचिनोर्नान्येषामिति नत्रग्रहणस्य नियमार्थत्वभंगीकृत्य तन्निराकृतं भाष्ये यद्यव्युत्पन्नानि
तेव सिद्धांतः स्यात्तर्हि तस्य तत्प्रत्ययांतत्वाभावात्तइत्युच्यमाने दीर्घप्राप्त्यानियमार्थत्वमनुपपन्नं स्यात् तस्माद्व्युत्पन्नानीत्यप्युपेयमित्याह॥
एवुव्यतचावित्यादाविवित्यादाविति। तथा सति प्रत्ययस्य लुगिति सूत्रस्थस्य एवुव्यतचाविति सूत्रस्थ च भाष्यस्य परस्परविरोधः वस्तुतस्तु नायं सि

पीजपि

चित् वांतः॥ एवं च तच्चाविति सूत्रस्य भाष्यसम्मतांतरेणापि दृष्टं शास्त्रत्वात्॥ अत एव न विरोधोपात्याह॥ इदमिति॥ व्युत्पन्नानामित्युक्तमित्यर्थः॥ कः पुनः पा
३० णिनिसंमत इत्यत आह पाणिनेस्त्विति॥ शब्देंदुशेखरे इति॥ उणादयो बहुलमिति सूत्रे इत्यर्थः॥ तत्र हि उणादिशब्देन व्याकरणांतरप्रसिद्धपंच
पाद्युक्ता एव नाष्टाध्यायीस्थाः॥ तथा सकृद्युक्त इत्यत्र रोगाख्यायामित्यत्र च बहुलग्रहणवैयर्थ्यापत्तेः॥ एवं चात्र निर्णीतत्वात् नामन्यत्रेत्य
त्रापि पंचपाद्युक्तानामेव ग्रहणमित्युक्तं॥ तथा च व्याकरणांतरेण व्युत्पादितानां शब्दानां बहुलमेतावत्तेवल्लशास्त्रे(?) साधुत्वबोधनं पाणिनिनाकृ
तं॥ न तु प्रकृतिप्रत्ययादिकल्पना द्वारेति पाणिनेस्तत्पक्षे व्युत्पत्तिरेवेत्याशयः॥ स्तोकोक्त्यायनेयानीति सूत्रस्य भाष्यसंमतिमाह॥ आयनेयीनीति॥ त
त्र हि शंखः षंढ इत्यत्रोणादिप्रत्ययविषये आयनेयानीति सूत्रेणादेशा वारणाय तत्रोणादिप्रतिषेध इति वचनं धातोर्वेयङ्वचनात्॥ अ
थवा यद्यंकुतेरीयङिति धातोरिङ् शास्ति नन्वापयताचार्येन धातुप्रत्ययानामायन्नादयो भवंति॥ यदि हि स्युस्तर्हि कुतेर्छ ङित्वे च ब्रूयादितिज्ञा
पकं चान्यरात्याश्रित्याग्रे प्रातिपदिकविज्ञानाच्च भगवतः सिद्धमुणादयो व्युत्पन्नानि प्रातिपदिकानीत्युक्तोणादिविषये पाणिनिसंमतो व्युत्प
त्तिपक्ष एवेति स्फुटमुक्तं भगवता भाष्यकृता॥ २॥ प्रत्ययप्रसंगादेवेदानीं प्रत्ययग्रहणपरिभाषामवतारयति नन्वित्यादिना॥ यस्मात्प्रत्यय ३०

विधिस्तदादि प्रत्यये तदंतांगमिति योगविभागमूलकत्वमेतस्याः साधयति॥ यस्मादित्यादिना॥ प्रत्ययः स्वप्रकृत्यव्यभिचारित्वेन प्रकृतिमंतां नुपप
न्नत्वामाक्षिपति॥ अत एवांगस्येति सूत्रे तत्रान्यतरस्मिन्नुपादीयमाने व्यभिचारादितरस्याक्षेपरतिके यदः॥ एवं स्वप्रकृत्यवयवकसमुदायाक्षे
पेतं समुदायं विशेष्यमादाय प्रत्यय इत्यस्य विशेषणत्वेन तदंतविधौ तदंतादांशस्य लाभ इति प्राचीनमतनिष्कर्षः॥ तथा च विशेष्यांतरासत्वेतरास
यतत्कल्पनमयुक्तमित्यतः प्राचीनोक्तिं यत्त्वित्यादिना अनुवादपूर्वकं दूषयति॥ तन्नेत्यादि प्रत्ययः स्वप्रकृत्यव्यभिचारस्यात्तदात्तदातामाक्षिपन्नत
त्समुदायमाक्षिपति॥ नैवं संभवति यानित्यादौ स्वप्रकृतिमंतरापि केवलप्रत्ययप्रयोगदर्शनात्॥ वस्तुतस्तु प्रत्ययस्य स्वप्रकृत्यव्यभिचारि
त्वमस्त्येव न हि यानित्यादावपि प्रकृतिमंतरोपपन्नः सः॥ उत्पन्ने तस्मिन् शास्त्रवशात्तल्लोपे तथापि न हि तस्य तद्व्यभिचारित्वमिति विदुषां बुद्धिपथ
मारोहति॥ न हि वन्ध्यासुतः कदाचिदुत्पन्नो धूमो आकाशगतः सन्तद्व्यभिचारीति व्यवहारः॥ अन्यथा तस्य तद्व्यभिचारित्वेन तद्धेतुकानुमितिर्न स्या
त्॥ न चानवच्छिन्नमूलस्य तद्धेतुमितिजनकत्वं नाकाशस्य मात्रस्येति वाच्यं॥ विचारासहत्वात्॥ तथा हि स किं ज्ञातानवच्छिन्नमूलो हेतुमितिज
नक उतानवच्छिन्नमूलो नाद्यः॥ न हि ज्ञातानवच्छिन्नमूलत्वस्य ज्ञातत्वे वन्हेरपि ज्ञातत्वेन तस्मादनुमित्यनापत्तेः॥ नांत्यः अज्ञातविशेषणस्य व्य

चित् भिचाराचारकत्वेनवैयर्थ्यापत्तेः। तस्मात्तद्वन्नत्वेनतरव्यभिचारित्वज्ञानादेवाङ्गमिति भवतीतिवक्तव्यं। नचवन्हेरज्ञातत्वेपिसत्किमधस्था
३१ दुपरिपर्यंतानवच्छिन्नमलत्वंज्ञातमेवेतिवाच्यं। प्रकृतेपितथाप्रकृतेरज्ञातसजातीयत्वेपिप्रत्ययस्यानवच्छिन्नमूलसजातीयत्वस्याश्रुतत्वा
त्। तस्मादियानित्यादौप्रकृतेरक्षावेपिप्रत्ययेनैवभूतपूर्वप्रकृतेरनुमानान्नव्यभिचारइतिदिक्। निमित्तत्वेनेति। यथासुपिचेत्यादौ। यत्रत
स्यकार्यित्वेनाश्रीयतेतत्रतदंतग्रहणं। यथासन्यङोरित्यादौ। तथाचहेएतेभ्यापेइतितद्दाशयः। नन्वत्रप्रमाणाभावइत्यतआहांगस्येति
ति। तत्रहिकानिचुनरंगाधिकारस्यप्रयोजनानीतिप्रश्ने। निरुतंदुरुतं। दधिसुनोतिमधुसुनोति। निर्याते निर्वाताः। ब्राह्मणभिस्साश्री। प्राक
रोतः। अग्नेविहितः। स्वयंभ्वयं। सुष्मत्सांअस्मत्सां। पचहितावत्पचतुतावत्त्वं। कुमारीश्चामित्याह। कुमारीकायती। निकुमारीकः। दधियानंम
धुयानं। अपस्पृधः। इत्येतेषुहलइतिनामातिभ्रुजस्तनगमामितिदीर्घत्वंवान्यस्येतिलिङ्केत्वं। अतोभिसैसित्यैस्त्वं। कुआदिषुआटू। अचिश्नुति
इयुङ्वङौसामश्चाकम्। तुह्योस्तातङ्। ह्रस्वनद्यन्तेत्यामिनुट्। आनेमुक्। केणइतिह्रस्वः। यिदीर्घः। अयोभिरितितत्वं। एतेषांक्रमेणव्यावृत्तिरु
पंप्रयोजनमुपपाद्यैतानिसंतिप्रयोजनानिकथमर्थवत्वग्रहणप्रत्ययग्रहणाभ्यांसिद्धमितिपूर्वोक्तप्रयोजनानिनिराकृत्यांगाधिकारः ३१

प्रत्याख्यातः। अनंतरंचायवाप्रत्ययेइतिप्रत्ययेंगकार्यमध्येष्येइत्यंगाधिकारप्रत्याख्यानापत्तेप्रत्ययाधिकाररूपप्रकारांतरेआश्रितेतत्रय
दिप्रत्ययइतिप्रकृत्यांगकार्यमधीषोप्राकरोतउपेहिइत्युपसर्गात्स्वैमउवेयप्रभृतिहूयणमुन्याव्यसिद्धंतुप्रत्ययग्रहणेयस्मात्सवि
हितस्तदादितदंतविज्ञानात्। प्रत्ययग्रहणेयस्मात्सविहितस्तदादेस्तदंतस्यग्रहणंभवतीत्युक्तंभाष्यकृता। तत्रसिद्धत्वितिप्रती
कमुपादायप्रत्ययोनिमित्तत्वेनोपादीयतेतत्रपूर्वःकार्यित्वेनगृह्यमाणोयस्मात्सविहितस्तदादिर्गृह्यतेयत्रतुप्रत्ययएवका
र्यित्वेनोपादीयतेतत्रतदंतग्रहणमितिहेएतेपरिभाषेइतिकैयटः। एवंचभाष्यकैयटाभ्यांस्पष्टमेवपूर्वोक्तमुक्तंभवति। नन्वेव
मेङ्ह्रस्वात्संबुद्धेरित्याभ्यांनिष्ठातोनइत्यादौप्रत्ययस्यकार्यित्वेनाश्रयणात्तत्रतदंतग्रहणंस्यादित्यतआह। एवमिति। आश्रीयतेय
थाकथंचिन्निमित्तत्वेनकार्यित्वेनवेत्यर्थः। ननुकार्यित्वनिमित्तत्वोभयपर्यायापिआश्रयणेतदादिग्रहणमात्रोपस्थितौनविशेषइत्यतः
कंचनविशेषमाह। परंत्विति। अयंभावः। पंचम्यंतातिरिक्तस्थलेयत्रप्रत्ययोनिमित्तत्वेनैवाश्रीयतेतत्रैवतदादिग्रहणमात्रोपस्थितिः।
तत्रैवयत्रकार्यित्वेनाश्रीयतेतत्रतदंतग्रहणं। यत्रतुपंचम्यंतात्परःप्रत्ययोयथाकथंचित्कार्यित्वेननिमित्तत्वेनवाश्रीयतेतत्रापितदादि

चित
३२ रित्यंशस्योपस्थितिः।तस्मात्कार्यिनिमित्तं त्वोभयथाश्रयणेपि तदा षंशमात्रोपस्थितौ पंचम्यंतत्वरूपविशेषस्य सत्वान्नविशेषाभावइ
ति।एतस्य पूर्वोक्तमेव फलं स्पष्टयन्नाह अत एवेति।पंचम्यंतातिरिक्तस्थलेउत्तरउत्तमकृत्तद्धितेत्यादौ प्रत्ययः कार्यित्वेनाश्रीयतेतत्र
तदादितदंतसंघातग्रहणंइति ध्वनयितुमाह अस्याइति।समुदितस्याइत्यर्थः।भाष्येवक्तमिति।येनविधिरित्यस्य प्रयोजनपरिगणना
वसरेप्रत्ययग्रहणेचापंचम्याः प्रयोजनं।यञिञोः फक् भवतिगार्ग्यायणोवात्स्यायनइतितत्रोक्तं।प्रत्ययग्रहणइतिवार्तिकार्थस्तु
पंचम्यंतात्स्मै प्रत्ययः कार्यांतरविधानायानूद्यते नस्तेन्नस्य लेप्रत्ययग्रहणेतदंतविधेः प्रयोजनमिति।ननुसमनंतरभाष्यगार्ग्यायण
इतितदंतविधेः प्रयोजनमुक्तंतत्परमगार्ग्यस्यापत्यमितिविग्रहेयञंतस्यगार्ग्यशब्दस्य परमशब्दसांकांक्षत्वेन प्रत्ययार्थेनसामर्थ्या
भावात्कथं संगच्छतइत्यतआह परमगार्ग्यायणइति।स्पष्टंचेदं भाष्यप्रदीपोद्योते।अनुपसर्जनादितिसूत्रेलघुशब्देन्दुशेखरेचेत्या
द्यइत्यन्यत्रेति।प्रत्ययमात्रग्रहणेऽस्याः प्रवृत्तौप्रमाणमाह।उगितश्चेति।तत्रहि।अतिभवतीअतिमहतीनिर्यवमतीत्यादौदोषं प्र
त्ययग्रहणपरिभाषयोभ्यावोक्तंनेतत्प्रत्ययग्रहणंप्रत्ययाप्रत्यययोरि।तद्ग्रहणं कथंवर्णोप्युगित्प्रत्ययोप्युगित्प्रातिपदिकमप्युगि ३२

दिति।एवंचप्रत्ययमात्रग्रहणेएषानतुप्रत्ययसाधारणग्रहणेइतिस्पष्टमेवोक्तं॥२१॥इदानीमपूर्वोक्तापवादमाह।एतच्छटकेति।अ
स्याश्चोक्त एवार्थः।यत्रेति।उक्तार्थस्य फलितत्वेनास्यापिफलितत्वान्नैतदुक्तेरसंगतिरिति भावः।यद्यपि प्रत्यासत्त्यापंचम्यंतनिर्दिष्टप्र
त्ययाद्यत्र प्रत्ययविधिस्तत्रनेत्यर्थः संभवति।नचसमासप्रत्ययविधावित्यनेनास्यगतार्थतेतिवाच्यं।सौत्रस्यैवतेननिषेधात्।तथापि
ञितश्चतत्प्रत्ययादित्यस्य पंचम्यंतनिर्दिष्टत्वेन प्रत्यासत्तिलभ्यार्थमूलकतदंतविधिनिषेधेविकारावर्हैर्वितप्रत्ययादेवेत्यर्थादे
ष्टुअंतादञिञश्चएवांगसंज्ञानांवृध्यापत्यात्तथार्थः कल्पयितुमशक्तः।एतत्फलं दर्शयथेत्यादिनानुस्यतासीलृलुटोरित्यादौ पंच
म्यंतविशेषणाभावादस्याअप्रवृत्त्या लृलुडंतयोरित्याद्यर्थापत्तिरतआह स्यतासीति।तथाचात्रानुवर्तमानस्यधातोरितिपंचम्यंतद
स्यप्रकृतित्वेनस्यतासीतिप्रत्ययविशेषणत्वेपिलृलुटोः परयोरित्यर्थेनियमेनावश्याकांक्षायामुपस्थितत्वाद्धातोरित्यस्यैवपंचम्यं
तस्याविधित्वेनान्वयाल्लृलुटोरपिपंचम्यंतस्यविशेषणसत्वात्तत्कृतपरिभाषाप्रवृत्तौनतदंतविधिरितिभावः॥२३॥आक्षेपसंगत्या
तरपदाधिकारेतिमप्रवृत्तिमन्वेचमिति।तत्रज्ञापकमाह।हृदयस्येति।ननुलेखेतिघञंतमपिसंभवतीतितदंतविधावप्यग्रहणेनाग्रहण

चित
३३ कथंतद्ग्रहणंज्ञापकंभवेदतआह।तत्रेति॥२४॥इदानीमपवादसंगत्यैवप्रत्ययग्रहणपरिभाषोक्तेस्तदादिनियमापवादस्त्रीप्रत्ययेचानु
पसर्जनेनेतिपरिभाषामवतारयति।नन्वेवमिति।अत्रेवशब्दोभिन्नक्रमःपुत्रपत्योरित्यस्यानंतरंद्रष्टव्यः।एवंचयथाप्रत्ययग्रहणनि
यमिनष्यङःसंप्रसारणंपुत्रपत्योरितिनप्रवर्त्तेततथापरमकारीषगंधीपुत्रइत्यत्रापिनस्यादित्याशयः।ननुप्रत्ययग्रहणपरिभाषातो
ऽपिग्रहणपदानुवृत्त्याऽनुपसर्जनस्त्रीप्रत्ययग्रहणइत्यर्थःस्यान्नचेष्टःसः।एकत्रैवसूत्रेलक्ष्यभेदेनएतत्प्रवृत्त्यप्रवृत्त्योरिष्टत्वेनत
स्यानिष्टत्वादतआह।विषयइति।तथाचयस्मिन्लक्ष्येऽनुपसर्जनस्त्रीप्रत्ययस्तद्विषयकेशास्त्रेइयं।तद्विषयकेशास्त्रेऽनुतत्रैवसाने
त्येकत्रैवविषयसंभवासंभवाभ्यांतस्याःप्रवृत्तिफलतइतिभावः।अतिराजकुमारीत्यत्रातिशब्दार्थंप्रतिराजकुमारीतिस्त्रीप्रत्ययस्योप
सर्जनत्वादनुपसर्जनइतिनिषेधेनप्रकृतपरिभाषायाअप्रवृत्तौप्रतिप्रसवन्यायेनप्रत्ययग्रहणइत्युत्सर्गप्रवृत्त्याराजकुमारीत्य
स्यप्रत्ययांतत्वाभावाद्गोस्त्रियोरितिह्रस्वोनस्यादतआह।प्रत्यासत्त्येति।तदर्थंप्रतिराजकुमारीशब्दार्थंप्रति।तात्पर्यतःअनुपसर्जनत्वात्स्त्री
प्रत्ययस्येतिशेषः।नन्वेवमपिराजकुमारीत्यस्यानियतविभक्तित्वेनैकविभक्तीत्यनेनोपसर्जनत्वस्यसत्त्वात्पूर्वोक्तदोषतादवस्थ्यमतआ ३४

ह।अतएवेतिप्रत्यासत्त्यंगीकारादेवेत्यर्थः।असंभवादिति।एकविभक्तीतिशास्त्रेविशिष्टनिष्ठोपसर्जनत्वस्यपरिभाषापेक्षितस्त्रीप्रत्ययमनि
ष्ठोपसर्जनत्वस्यचैकाधिकरणवृत्तित्वासंभवादित्यर्थः।एतस्याःप्रवृत्तिस्थलंदर्शयति।नन्वत्रविषयसप्तम्यंगीकारमद्ग्रहणपदसंबंधःप्र
वैनांगीकृतस्तथाचपूर्वोक्ताविरोधइतिचेन्नासत्यपिग्रहणपदसंबंधेगृह्यमाणेस्त्रीप्रत्ययेसत्यनुपसर्जनस्त्रीप्रत्ययविषयेतदादिनि
यमोन।अन्यत्रतुतत्रैवास्येवेत्यर्थेनदोषात्।विषयसप्तमीत्वनुपसर्जनइत्येवनन्तुस्त्रीप्रत्ययेत्वंशेऽपीतिभावः।ध्वनितंचेदमिति।अर्थव
दितिप्रातिपदिकसंज्ञायामनेकस्यापिपदस्यप्रातिपदिकसंज्ञाप्राप्नोति।दशदाडिमानिषडपूपाःकुंडमजाजिनंपललपिंडःइत्याशंक्या
र्थवत्समुदायानांसमासग्रहणंनियमार्थमितिनिराकृतं।तत्रसमासग्रहणस्यनियमार्थत्वंवदताभाष्यकृतातद्ध्वनितं।अन्यथाराजकुमा-
रीत्यत्रराजन्ङकुमारीसुइत्यलौकिकविग्रहावस्थायामंतरंगत्वाल्लुक्यादिलोपेस्त्रीप्रत्ययेचानुपसर्जनेनेतितदादिनियमाभावेनत
स्यसमुदायस्यप्रत्ययांतत्वादप्रत्ययइतिनिषेधेनाप्राप्तप्रातिपदिकसंज्ञानार्थत्वेनसमासग्रहणस्योपपत्तौनियमार्थत्वमनुपपन्नंस्यात्।तथा
चेत्यर्थवत्सूत्रेऽप्रत्ययइत्यत्रनिषेध्यसमर्पकप्रत्ययपदस्यस्त्रीप्रत्ययाप्रत्ययसाधारणत्वेनतत्परिभाषायाअप्रवृत्तौतदादिनियमेनतस्य

चित्	प्रत्ययांतत्वाभावादप्रत्ययइतिनिषेधासंभवेनार्थवत्सूत्रेणैवप्रातिपदिकसंज्ञायाःप्राप्तौसमासग्रहणस्यनियमार्थत्वमुपपन्नंभवति।अं
३५	तरंगानपिविधीन्बहिरंगोलुग्बाधतेइतिपरिभाषात्वकृतव्यूहपरिभाषायाःप्रपंचभूतत्वान्नास्त्येवेतितदाशयः।गोमत्प्रियइत्यादीनांसि
द्धित्वांतरंगपरिभाषानित्यत्वेनबोध्या।तदनित्यत्वेज्ञापकंत्वेतत्परिभाषाज्ञापकमेवेतिभावः।अस्याज्ञापकसिद्धत्वंनास्तीत्याहाइयंचेति
।ष्यङइति।तत्रहि।कौमुदगंध्याःपरमपुत्रइत्यत्रतदंतेसंप्रसारणमाशंक्यसिद्धंतूत्तरवचनादितिसमाहितंतत्तर्हिपक्षकंवंनवक्तव्यं।पू
र्वपदमुत्तरपदमितिसंबंधिशब्दावेतौसतिपूर्वपदेउत्तरपदंभवतिसतिचोत्तरपदेपूर्वपूर्वपदं।ष्यङंतमेतत्पूर्वपदंकथंप्रत्ययग्रहणे
यस्मात्सतदादेर्ग्रहणंभवतीत्यनेनेतेपरमकारीषगंधीपुत्रइतिनसिध्यतिइत्याशंक्यस्त्रीप्रत्ययेचानुपसर्जनेनेतिसमाहितं॥३५॥नन्वे
वंतरसमपोषइत्यादौप्रत्ययग्रहणपरिभाषयातरबंतादेःसंज्ञायांगौरीचासौब्राह्मणितरेतिविग्रहेगौरब्राह्मणितरेतितरबंतेउत्तर
पदेगौरीशब्दस्यपुंवत्कर्मधारयइतिप्राप्तपुंवद्भावस्यपरत्वाद्ध्रस्वेनबाधेगौरिब्राह्मणितरेतिस्यादितितुगौरब्राह्मणितरेत्यतःप्रत्ययग्र
हणपरिभाषापवादभूतांतामवतारयति।नन्वेवमिति।गौरीब्राह्मणितरेति।विग्रहवाक्यप्रदर्शनमेतत्।नचात्रोत्तरपदाधिकारेप्रत्यय ३५

ग्रहणेइतिपरिभाषाबलेनैवतरसमपोषइत्यत्रतदंतविधिर्नभविष्यति।अन्यथोत्तरपदेतिपरीभाषायावैयर्थ्यापत्तेरितिवाच्यं।रूपवा
दौतस्याश्चारितार्थ्यात्।अत्रसंज्ञाविधावित्यत्रभावक्तिप्रत्ययांतविधिशब्देनकर्मषष्ठ्यासमासःसंज्ञाकर्मकविधावित्यर्थः।नचसंज्ञा
कर्मकविधौतरसमपोषइत्यत्रतदंतविधिनिषेधेपिघरूपेत्यत्रसंज्ञयाह्रस्वविधौपूर्वोक्तनिषेधाभावात्तदंतविधिर्दुर्वारइतिवाच्यं
।एतन्निषेधसामर्थ्यादेवप्रदेशेष्वपिनतदंतविधिरित्याशयात्।स्पष्टंचैतच्छब्देंदुशेखरेकरणतृतीययातुनसमासः।तरसमपोषइ
त्यादौसंज्ञयाऽन्यस्यविधेरभावेननिषेधाप्रवृत्यातरबंतादीनांसंज्ञायांप्रदेशेषुकृत्वापिप्रत्ययग्रहणाभावादेतन्निषेधवैयर्थ्यापत्तेः
।संबंधसामान्यषष्ठ्यापिन।संज्ञायाविधौनिषेधांगीकारेणप्रागुक्तदोषनिरासेपिहतकृत्यइत्यादौबहुव्रीहौनिष्ठेतिनिष्ठांतस्यविधी
यमानपूर्वनिपातानापत्तेः।निष्ठामात्रस्यपूर्वनियामकप्रसंगात्।केचित्तुएतन्निषेधसामर्थ्यादितिशेखरमन्यप्रदूषयंति।एतत्परिभा
षाभाषाभावेसंज्ञायाविधौसंज्ञयाचविधावित्युभयत्रापितदंतविधौगौरीपरमब्राह्मणितरेत्यत्रतरबंतेपरतोह्रस्ववारणायेयंप॰
रिभाषासत्यांत्वस्यांकर्मषष्ठ्यासमाससंज्ञाकर्मकविधानेएवतदंतविधिनिषेधेनसंज्ञयाविधौतुतदंतविधिसत्वेनतरबंतेपरतोगौरी

चि॰ ब्राह्मणितरेत्यादौ ह्रस्वार्थे निषेधस्य सार्थक्येन सामर्थ्यविरहात्। संज्ञाकर्मकविधानेन तदंतविधिप्रतिषेधे तरबंतेनोत्तरपदे ह्रस्वं तु घरूपे

३६ परसप्तमीनिर्देशेन योगपंचम्यंतविधिमाक्षिप्य प्रत्ययग्रहणे चापंचम्याइति निषेधापत्तेर्वारयंति। उत्तरपदाधिकारे इतिनिषेधस्तु तेषा

मेतन्निषेधैकदेशस्यैवानुवादइत्यभिमतं। यदि तु परसप्तमीनिर्देशो षष्ठीनिर्दिष्टकार्यिणैवाकांक्षानिवृत्तेः पंचम्यंतावधेरासंभवा

त्तदाघरूपेत्यत्रोत्तरपदाधिकारे तदंतग्रहणं नास्त्येव तदंतविधिनिषेधः। अतएव लेखग्रहणेन ज्ञापकेन भगवतायं पृथगेवायं साधि

तः। नन्वेवं सुपिचेत्यादौ तदंतविधिः स्यादिति वाच्यं। अत्रांगस्येत्यनेनान्वयानुपपत्त्यैव तदंतविधिविरहस्य कल्पनात्। प्रत्ययग्रहणे चापंच

म्याइति निषेधस्य तु रदाभ्यामित्यादावेव प्रयोजनमित्यपि तेषां प्रकारांतरं। अत्र केचित्। तदंतस्य संज्ञायामिति विधिप्रदेशे तदुपस्थितौ वि

शेषणविशेष्यभावे कामचारादुत्तरपदरूपे तरबंते इत्यर्थात् पूर्वोक्तोदाहरणे प्राप्तेरेवाभावेन न संज्ञायामित्यस्य सार्थक्यमित्यतस्तद्वैयर्थ्यमस्य

मेवेति शेखरग्रंथस्तु जीवयंतः एतेनेत्यादिना पूर्वोक्तिमनूद्य कल्पनाद्वयनिरासः कैयटस्पष्टचराश्रुतानां पदवैप्राप्तिताइति खंडयंति तेषां तु

साहसमात्रं नह्यसति विनिगमके विशेष्यविशेषणभावव्यत्यासेन तदंतविधिविरहः शक्यते कल्पयितुं। अन्यथा सर्वमपि तदंतविधिनिषे ३६

धकं वचनं स्यात् जन्माजलिस्यात्। तस्मात्तदंतविधिनिषेधबोधकवचनानुरोधेन तत्तद्विषय एव विशेषणविशेष्यभाव

व्यत्यासकल्पनौचित्यात्। क्वचित्तु चित्तस्ति न प्रमाणमन्वेष्यं। शेखरस्तु एतन्निषेधसामर्थ्यादित्यस्य कुमारीतरेत्युदाहरणे

गौरीतरस्य भाष्यकृतैतन्निषेधस्य ह्रस्ववारणरूपफलस्य दानसामर्थ्यात्तस्य संज्ञायामपि प्रदेशेन तदंतविधभावकल्पनेन फला

भावे सत्येतन्निषेधसामर्थ्यादित्यर्थे परिकल्प्यो ज्ञावनिपइतिदिक्॥२६॥ ज्ञापकमुपपादयति। तद्धीति। अन्यकृतमि

ति। अत्र पृतश्रृंगेन कांतेनोच्चह्रस्यकुगतौ निसमासे समासस्येति प्राप्तमंतोदात्तं बाधित्वा तत्पुरुषे तुल्यार्थेति सूत्रेण पूर्व

पदप्रकृतिस्वरः प्राप्तस्तमपि बाधित्वा थाथघञ्क्ताजबित्रक एतदंतानां गतिकारकोपपदात्परेषामंतउदात्तइत्यर्थक

थाथादिसूत्रेणांतोदात्तं प्रासंगतिरनंतरइति प्रकृतिस्वरो वाधते। उतिस्वरक्रमेण प्रकृतेरुच्चह्रस्यो दात्तत्वं पर्यवस्यति। एवं च

उच्चतशब्दस्य समासे पूर्वोक्तक्रमेण गतिस्वरः प्राप्तस्तद्वारणाय प्रकृतस्सूत्रे ऽनंतर इति। कृद्ग्रहणपरिभाषाभावे तु प्रत्ययग्र

हणपरिभाषयोऽपतस्य क्तांतत्वाभावादेवाभिशब्दस्य स्वराप्राप्तौ तद्वारणाय तत्कृद्ग्रहणं व्यर्थं सत्स्या ज्ञापकमिति भावः। नन्वभु

चित कृतमित्यत्रगतिरनंतरइतिप्रकृतिस्वरःप्राप्नोतिगतिर्गतावितिचानंतरपुरोहितोऽस्तुकृतइत्यादावन्यत्रचरितार्थयोस्तयोर्वि
३२ प्रतिषेधेपरत्वान्निगतिर्गतावित्यनेनप्रकृतिस्वरंबाधित्वानिघातएवप्राप्नोतीतिप्रकृतिस्वराप्राप्त्यातद्धारणायकृतस्यानं
तरग्रहणस्यज्ञापितेपितस्मिन्वैयर्थ्यमेवेतिज्ञापकत्वासंभवइत्याशंकते।नचेति।पादादिस्थत्वेइति।पदस्यपदादित्यधि
कारेतस्यसत्वादितिभावः।स्वांशेचारितार्थ्यमाह।अनंतरग्रहणकृतेत्विति।नन्वाद्युदात्तोऽकृत्स्वराद्वृत्स्याभिन्नासमासेतन्नानंत
रग्रहणाभावेबहुव्रीहौप्रकृत्येत्यतःपूर्वपदग्रहणानुवृत्त्याकर्मक्तांतेपूरेपूर्वपदभूतोगतिःप्रकृत्येत्यर्थेनंदःपूर्वपदत्वाभावेनत
दप्राप्त्यासतिशिष्टथाथादिस्वरेणांतोदात्तत्वापत्तिस्तन्निवारणार्थमनंतरग्रहणं।कृतेतुतस्मिन्सामर्थ्यात्पूर्वपदानुवृत्त्याऽनंतर
मात्रंकर्मक्तांतेपरतःप्रकृत्येत्यर्थेनोच्चकृत्स्यप्रकृतिस्वरःसिध्यातीत्येतावतैतावतैवानंतरग्रहणस्यचारितार्थ्यान्नकथंज्ञापकत्व
मितिपुनराशंकतेनचेति।एवमपिकारकाद्दत्तश्रुतयोरितिसूत्रेकारकादितियोगंविभज्ययोगविभागस्येष्टसिध्यर्थत्वात्ग
तिग्रहणमनुवर्त्यक्तग्रहणंचाकारकादेवपरंगतिपूर्वपदंक्तांतमंतोदात्तमितिनियमार्थत्वंकारकादित्यस्यकल्प्यते।एवंच ३२

थाथादिस्वरापोऽएतत्परिभाषयोःकृत्तस्यकृदंतत्वाऽतिकारकोपपदात्कृदित्यनेनतस्याद्युदात्तसिद्धौपूर्वपदग्रहणानुवृत्तावपिनानं
तरग्रहणंतदर्थंसार्थकंतस्मादनंतरग्रहणस्यव्यवहितनिवृत्त्यर्थत्वेनसाफल्यस्यावश्यंवाच्यतयाज्ञापकत्वमेवसंभवतीत्या।
शयेनाह।कारकादित्यादि।अत्रार्थेपुंयोगादितिसूत्रस्थभाष्यमेवोपष्टंभकमाह।अतएवेति।तत्रगतिकारकोपपदानामिति
परिभाषाप्रयोजनगणनावसरेसांकुटिनंव्यावक्रोशी।अत्रावयवादुत्पत्तिःप्रसज्येत।गतिकारकोपपदानांकृद्भिःसहसमासो
भवतीतिनदोषइत्युक्त्वासत्यामप्येतस्यामवयवादुत्पत्तिःप्राप्नोति।किंकारणंप्रत्ययग्रहणेयस्मात्सतदादेर्ग्रहणंभवतीत्याशंक्य
कृद्ग्रहणापरिभाषयासंघातादुत्पत्तिर्भवतीत्युक्तंयदिगतिकारकसमभिव्याहारेकेवलस्यापिग्रहणंस्यात्तदाकेवलकुटिनशब्दा
त्पणिसंकोटिनमितिपाक्षिकदोषःस्यादेवेतितद्भावः।चुरादंतात्कुटधातोरवणाद्इत्यस्मादभिविधौभावइनुणिसंपूर्वकात्तस्माद
णिनुणइत्यणिसांकुटिनमितिरूपंस्यष्टंचेदमिति।तत्रहिस्नात्वाकालकादिषुप्रतिषेधोवक्तव्यइतिस्नात्वाकालकःपीत्वास्थिरक
इत्यादिमयूरव्यंसकादित्वात्समासेसमासेऽनञ्पूर्वेइत्यनेनल्यबापादनपूर्वकंप्रतिषेधकर्तव्यतामापाद्यअत्रसमासेइतिनिर्धार्ये। ३

चित
३९

सप्तमी सामान्यापेक्षं चैकवचनं सौत्रत्वात्प्रत्ययेन वा। निर्धारणं च समानजातीयस्य भवतीति प्रत्ययग्रहणपरिभाषया त्कांतसमासस्य
ग्रहणात्समासानां मध्ये कृतः समास इत्यर्थेनात्र न भविष्यतीत्याशयेन तदंतनिर्देशात्सिद्धमिति समाधाय ततोऽभ्रेः नञः परस्य स्पा भवि
तव्यमिति समाधानांतरमुक्तं तस्यायमाशयः। अनञ्चतत्पूर्वे चेति समासः निपातनात्पूर्वशब्दस्य परनिपातः। अनञिति तु सप्तमी
कं पृथक्पदं वा। तथा चानञि पूर्वे सति क्त्वो ल्यबित्यर्थो न्वदोष इति। अनंतरं च नञ् धातुरेवानञित्याशंकितेन धातोः परस्या भवितव्यं क्तं
कारणं नञि वस्तुक्तमन्यसदृशाधिकरणे तथाहार्थे गतिरिनञ्भिन्नं नञ्सदृशं ग्राह्यमिति समाहितेऽथवा प्रत्ययग्रहणे यस्मात्स प्र
स्मात्तदादेर्ग्रहणं भवतीत्येवं धातुरपि त्वाग्रहणेन ग्राहिष्यते इति शंकानन्वेयमपि परिभाषास्ति कृद्ग्रहणे गतिकारकपूर्वस्या
पि ग्रहणं भवतीति सापीहोपतिष्ठेत। तत्र को दोषः। इह न स्यात् प्रकृत्य प्रहृत्य इह तर्हि स्यात् परमकृत्वोत्तमकृत्वा इत्याशंकितेन वात्रेष्यते
गतिकारकपूर्वस्यैवेष्यत इति सिद्धांतिनोक्तं। अनंतरं च कृतोऽनुरवल्वेतलक्ष्योः परिभाषयोः सार्वकाशयोः समवास्थितयोरियमिह
परिभाषा भवति न पुनः कृद्ग्रहणपरिभाषेति पूर्वपक्षिणाचोदिते आचार्यप्रवृत्तिर्ज्ञापयति इयमिह परिभाषा भवति प्रत्ययग्रहण ३९

१ गतिरनंतर इ
१ तच्च ज्ञापितत्वेनेयमेव परत्वात्प्रवृत्तिः २ औपगवः सांकूटिनमित्यादौ क्रमेण प्रत्ययग्रहणपरिभाषा यत्र इति तांतता। १ अंगसंज्ञासूत्रे योगविभागेन व्यवस्थापितापूर्वा
२ सांतिपरिकिल्वा कृद्ग्रहणपरिभाषया विशिष्टाहरण इत्यत्र इति भाष्याशय २

इति। इयं च न भवति कृद्ग्रहण इति यदयमनञ् इति प्रतिषेधं शास्ति इति सिद्धांतिनोक्तं। न वात्रेष्यत इति प्रतीकमुपादाय नाश्रीयत
इत्युक्तं। गतिकारकपूर्वस्यैवेष्यत इत्यत्र च प्रकृत्य पार्श्वतः कृत्येत्यादौ स्यवादेश इष्यते कृद्ग्रहणपरिभाषोपस्थाने च न सिध्यतीति नासा
वाश्रीयत इति कैयटेनोक्तं। एवं चैवं वदन्भाष्यकैयटाभ्यां पूर्वोक्तं सर्वं स्पष्टीकृतमेवेति बोध्यं। भाष्ये स्पष्टमिति। अनुपसर्जनाधिका
र प्रयोजन प्रस्तावे इदं तर्हि प्रयोजनं प्रधानेन तदंतविधिर्यथा स्यात् कुंभकारीनगरी। अत्र हि प्रत्ययग्रहणे यस्मात्स विहितस्तदादेर्ग्रहणं
भवतीति। अवयवादुत्पत्तिः प्राप्नोति। कृद्ग्रहणपरिभाषया संघातादुत्पत्तिर्भविष्यतीति चोदिते। कृद्ग्रहण इत्युच्यते न चैतत्कृद्ग्रहणं
कृद्ग्रहणमेतत्। कृदप्ययमण् एतर्हि नोपात्तिः सिद्धांत्युक्त्या स्पष्टीकृतं॥२७॥ नन्वेवमिष्टकचितमित्यादाविव पक्वेष्टकमित्यादौ ह्रस्वो न स्या
दिष्टकेषीकेत्यत्र प्रत्ययग्रहण नाविन पूर्वोक्त परिभाषाया अप्रवृत्त्या विशिष्टाग्रहणादित्यत आह। पदांगाधिकारे तस्य च तदंतस्य चेति
पदमंगं चेति। अयमस्यार्थः। नन्वत्र पदशब्देनोत्तरपदैकदेशलोपात्। अन्यथेष्टकेषीकिवलपदाधिकारे पावात्पक्वेष्टकचितमित्या
घस्याः प्रयोजनं न सिध्येत्। उत्तरपदग्रहणेनाक्षिप्तपूर्वपदस्येष्टकादिभिर्विशेषणात्तदंतविधौ प्रयोजनं सिध्यतीति सति तु तथा वा पदांतस्ये

चित ततः पदग्रहणमनुवर्त्तनादुदःस्थास्तंभोरिति पूर्वसवर्णस्य केवलपदाधिकारे विधानादुत्थास्यतात्पत्र पदांगाधिकारे तस्याप्रवृत्त्या कथ
३९ मनेन प्रयोजनान्यथासिद्धिरित्यत आह। अत्र पदशब्देनेति। नन्वेवं पदाधिकारे तदंतविधौ पादिनोपदेशे पदत्वमित्यत्रैव दिग्धपादोपदत
मित्यत्रापि पादस्य पदाज्याताति प्राप्नोतीत्यत आह। पादस्य पदेति॥ २८॥ इदानीं पूर्वपक्षेण व्यपदेशिवदेकस्मिन्निति परिभाषामवतारयति
। नन्वेवमिति। तत्र व्यपदेशिवद्भिति पदघटकीभूत व्यपदेशपदार्थमाह। विशिष्टोपदेश इति। पदार्थं निरूप्य समस्तार्थं दर्शयति। यस्ये
ति। तत्फलमाह तेनेति। एवं च येन विधिरिति सूत्रे तस्य चेति वक्तव्यमिति वार्त्तिकं नापूर्वमिति फलितं। लोके पीति। एतेन नियमपूर्वो ना
पिताप कसिद्धेत्यपि सूचितं। लोकसिद्धत्वेनानयायेत्यादावशास्त्रीयस्यापि एकाच्त्वस्यातिदेशेन द्वित्वसिद्धिः। अन्यथास्या नित्यत्रवद
नयापि शास्त्रीयस्यैवातिदेशे द्वित्वानापत्तिरित्याह अनेन चेति। तेन भवतीत्यादावशास्त्रीयतदादित्वनिबंधनांगत्वसिध्या गुणः सेदित्यादे
तिउंतत्वनिबंधनं पदत्वं इयानित्यादेरेयथोद्देशपक्षे पूर्वप्रवृत्तप्रातिपदिकसंज्ञायां लुप्तायामपि प्रकृतावेकदेशविकृतन्यायेनाक्षततत्त्वे
पिकार्यकालपक्षे तद्धितांतत्वनिबंधनं प्रातिपदिकत्वं च सिध्यतीति भावः। फलांतरमप्याह पत एवेति। तत्रैव पक्षे बाधकमाह। अन्यथेति ३९

। आद्यंतवदेकस्मिन्निति सूत्रे आतिष्ठामाभ्यामित्यादावेकस्मिन्नाद्यंतव्यपदिष्टकार्यसिद्धिः प्रयोजनमुपपादितं। तत्र चेयाय आरित्यादाव
काच्त्वव्यपदेशार्थमव्यपदेशिवदेशिवदेकस्मिन्व्यपदेशिवत्कार्यं भवतीत्यापाद्यानंतरं सतर्हि व्यपदेशिवन्न्यायो वक्तव्यो न वक्तव्यः। अ
वचनाल्लोकविज्ञानात्सिद्धमित्युक्तं भाष्यकृता। तत्रावचनादिति प्रतीकमुपादाय अवन्वनं वचनरहितं यल्लोकविज्ञानं तस्माल्लोकव्यवहा
रादित्यर्थ इत्युपपाद्य इहतावदिए धातुः प्रयोगश्चैदाबद्धरूपस्तस्यायमेकोवयव इव लक्ष्यते अर्थवतो धातोरयं वर्णरूप एकोजिति। अर्थ
सत्यागोपादानाभ्यां भवति व्यपदेश एकोजिप्रकारांतरेणोपपादनपरतादृशकैयटोक्तिं यत्वित्यादिना न्यूधरखंडयति तन्नेत्यादिना। असुखव
हारसत्वादिति। अयं भावः। अवचनादित्येतत्समनंतरं यथा तर्हि वर्णसमुदायः पदं पदसमुदायश्च वाक्यं सत्युदायः सक्तमित्युच्यते भवति चैतदे
कस्मिन्नप्येकवर्णे पदमेकपदाश्च वाक्यं चेत्सक्तमिति तादृशलोकव्यवहारे दृष्टांतमुपपाद्य तद्विघटनाय अत्राप्यर्थेन युक्तो व्यपदेशः। पदं ना
मार्थः कृत्नामार्थोः सक्तं नामार्थ इति वदता भाष्यकृता यायेत्यादावचनाल्लोकविज्ञानादित्यनेन वचनमंतरेणापि तथा व्यवहारो मुख्य एवे
संगाकृतमिति प्रतीयते। तथासति तत्प्रतीकमुपादाय इयायेत्यादावर्थवतो धातोरित्यादिना मुख्यव्यवहारम मुख्य व्यवहाराभिप्रायकं भाष्ये

चित ४० उपपादयन् कैयटो व्याहतः। अन्यथाऽत्राप्यर्थोनमुक्त इत्यादिनामुख्यव्यवहाराश्रयणेन दृष्टांतयिघटनं भाष्यकृतमसंगतं स्यादिति। यद्य
प्यत्रनादित्यमुख्यव्यवहाराभिप्रायकं भाष्यं इतो हि वदिएधातुः प्रयोगभेदात्कुंरूपद्वनिर्व्याख्यायतदनंतरमथ्यंवेतिप्रसांतरेणवर्ण
यटस्य यथाऽत्राप्यर्थेन मुक्त इत्यादिनाऽर्थस्य त्यागोपादानाभ्यामेकपदारूगिता दैमुख्यव्यवहार आश्रितस्तथैयायेत्यादावपिमु
ख्यव्यवहारेणैवोपपत्तौ किमित्यमुख्यव्यवहाराश्रयणं कर्त्तव्यमित्याशयस्तथापि स भाष्यसंमतो नैव भवतीति विभावनीयं। इदानी
मर्थेन युक्तो व्यपदेश इति भाष्याशयं वर्णयति कृकलादेरिति। तत्राप्यर्थेनेति भाष्यमुपादाय पदादीनां योर्थः सोन्यपदार्थ इत्यर्थः। अभेदो
पचाराच्चार्थ एव पदादिभिरभिधीयत इति कैयट आह। पदं नामार्थ इत्यादिशब्दाः शब्दार्थयोस्तादात्म्यात्स्ववाच्यार्थपरास्तथा चैकोवर्णो
यस्मिन् स्ववाच्योर्थ इत्यन्यपदार्थः अर्थात्मकः सिध्यतीत्यर्थयुक्तव्यपदेशमादायैकवर्णपदमित्यादिव्यवहारः सिध्यतीति तदाशय इति बो
ध्यं। शिलापुत्रकस्य शरीरमिति। अनेकक्रियाविषयस्यावस्थातुरिमिकावस्थायुक्तं शरीरमित्यर्थ इति कैयटः।। २९।। ननु पदांगाधिकारे
इति परिभाषायामसंज्ञाद्वयं तस्य तदंतस्य चेति तत्र तस्येत्यंशस्य प्रथमोपात्तत्वादतिव्याप्तिवारणाय व्यपदेशिवदिति परिभाषामुक्त्वा तदं ४०

तविधिसिद्धस्य द्वितीयांशस्यातिव्याप्तिवारणायेदानीं ग्रहणवतेति परिभाषामवतारयति। नन्विति। पदांगाधिकार एव तस्य च तदंतस्य चेत्यु
क्तो तदतिरिक्ताधिकारे तद्भित्यत्र तदंतस्यैव प्रसक्तौ तस्य चेत्यंशस्यासंभवस्तदतिरिक्ताधिकारे तदंतमात्रस्येति फलितेप्यतद्भित्यादावि
वगर्गादिभ्यो यञित्यादावपि तदंतस्येत्यंशस्य तस्य चेत्यंशस्यातिव्याप्तिश्चेति विवेक्तव्यं। एतेन पदांगाधिकार इत्यस्य येन विधिरित्येतत्स्व
पंचम्यतत्वात्तद्वादग्रहणमूलेत्यव प्रथमं वक्तुमुचितामव्यपदेशिवदेकेत्यपास्तं। प्रत्ययांशानुवाद इति। एवं च नात्र ज्ञापकान्वेषणं का
र्यमिति भावः। ध्वनितं चेदमिति। तत्र हि निष्कादिष्वसमासग्रहणं ज्ञापकेन ग्रहणवतेति तदंतविधिनिषेधाभावं ज्ञापयित्वा किमेतस्य ज्ञा
पने प्रयोजनमिति पृष्टे प्रागवतेष्ठञित्यत्र तदंतविधिः सिद्धो भवतीत्युक्त्वा तदनंतरं चनैतदस्ति प्रयोजनं ग्रहणवता प्रातिपदिकेन तदंतवि
धिः प्रतिषिध्यते। न च वत्र विधौ काचित्क्षतिर्गृह्यत इति प्रयोजनं निराकुर्वता भाष्यकृता ध्वनितमेतत्। तथा हि। यदीयं परिभाषा प्रातिपदि
कमात्रग्रहणे प्रवर्त्तेत दा न च वत्र विधौ कादिति भाष्योक्तिरयुक्ता स्यात्तत्रापि ङ्याप्प्रातिपदिकादित्यधिकारात्प्रातिपदिकमात्रस्य प्रकृ
तित्वेना त्रपणत्वात्तस्माद्विशिष्य तद्रूपेण यत्र प्रातिपदिकं गृह्यते तत्रैवेयं प्रवर्त्तत इत्यभ्युपेयमित्यवधेयम्।। ३०।। इदानीं पदांगाधिका

चित रेइतिपरिभाषास्थांशः इत्यस्य क्रमेणाव्याप्त्यतिव्याप्ती परिभाषाद्वयेन निराकृत्य तत्र तस्येत्यस्य क्रमप्राप्तातिव्याप्तिनिरासाय प
४१ रिभाषामवतारयति। नन्वेवमिति। अत्र ज्ञापकमाह। पूर्वादिति। नन्वेवं समुदितस्य पूर्वोत्तरपूर्वादित्यस्य इष्टादिभ्य इत्यत्रानुवृ
त्तावनिष्ठीत्याद्यसिद्धिप्रसंगः। न चेष्टादिभ्यो गणपठितेभ्य एव प्रत्ययविधानसामर्थ्यादेव न समुदितस्यानुवृत्तिर्भविष्यत्यपि तु सपू
र्वादित्यस्यैवेति वाच्यं। समुदितस्यानुवृत्तावपि विद्यमानपूर्वात्पूर्ववयसिद्धात्परेभ्य इष्टादिभ्य इत्यर्थेनापूर्वेष्टीत्यादिसिद्ध्येतस्या चा
रितार्थ्यादित्याशंकतेन चेति। एतज्ज्ञापकपरभाष्यवदनुवृत्त्यभावकल्पनेनानिष्ठीत्यादेरनभिधानमिति परिहरति। ज्ञापके
ति। न चैकयोगेप्येतज्ज्ञापकपरभाष्यप्रामाण्यात्सपूर्वादित्यत्रैव स्वरितत्वप्रतिज्ञाकल्पनेन तदनतदनभिधाने प्रमाणाभाव इ
त्यरुचेराह। एकयोगेपीति। नन्वनयोरपि प्रत्ययविधिविषयत्वस्य वक्ष्यमाणत्वेन नांतादसंख्यादेरित्यस्यागमविधायकत्वे
न प्रत्ययविधित्वाभावात्प्रकृतपरिभाषासंचारेणाऽसंख्यादेरित्यस्य चारितार्थ्योपपादनमयुक्तं। प्रत्ययविधिविषय इत्यस्य
प्रत्ययोद्देश्यकविधिविषय इत्यर्थस्तु न। तथार्थेन प्रकृते प्रत्ययोद्देश्यकविधेः सत्त्वात्प्रकृतदोषोद्धारे पिगर्गादिभ्यो यञित्यादौ सा ४२

त्प्रत्ययविधित्वेन प्रत्ययोद्देश्यकविधानाभावादुभयोरेकविषयत्वेन पूर्वपरिभाषाया अप्रवृत्त्या तदंतविधेर्दुर्वारत्वात्। + प्रकृतपरि
भाषायां समनंतरोक्तकार्यकत्वमिति न पूर्वोक्तदोष इति वाच्यं। + न च पूर्वपरिभाषाविषये प्रत्ययविधिविषय इत्यस्य यथाश्रुतार्थकत्वमे
व कल्प्यते। ससजुषो रुरित्यस्यापि प्रत्ययोद्देश्यकविधित्वेन तत्रैतत्परिभाषाऽप्रवृत्तौ व्यपदेशिवद्भावेन सजूरित्यादौ सत्वानापत्तेः
। न च प्रत्ययत्वसामान्यधर्मेण तद्व्याप्यधर्मेण वोद्देश्यतायामेव प्रत्ययोद्देश्यकविधित्वं ससजुषो रुरित्यादौ तु तत्सामान्यधर्मेण तद्व्या
प्यधर्मेण वोद्देश्यताया अभावेन प्रत्ययोद्देश्यकविधित्वाभावादेतत्परिभाषया रुत्वं भवत्येवेति वाच्यं। तथा सति तिङ्गितश्चेत्यत्र प्र
त्ययत्वसामान्यधर्मेण तद्व्याप्यधर्मेण वोद्देश्यताया अभावात्प्रत्ययविधित्वाभावेनैवैतत्परिभाषाप्रवृत्त्यभावसिद्धौ तत्सिद्ध्यर्थं यंच
प्रातिपदिकग्रहणेवेतिमत्वग्रंथवैयर्थ्यात्। न च प्रत्ययस्योद्देश्यत्वं विधेयत्वं वास्तूभयत्रापि प्रवृत्तिः स्वीक्रियत इति वाच्यं। ससजु
षो रुरित्यादावेव दोषध्रौव्यात्। न च तत्र प्रतिलक्ष्यं लक्षणोपप्लवात्सजुष्शब्दविषयकोपप्लुतस्य लक्षणवाक्ये प्रत्ययस्योद्देश्यत्व
विधेयत्वोभयाभावेन तदप्रवृत्तिरुक्ता युक्तैवेति वाच्यं। एतत्परिभाषाज्ञापकस्य सजातीयापेक्षत्वेन यत्र प्रत्ययस्य विधेयत्वं तत्रै

वित॰ वेयमित्यभ्युपगमाद्भूयसा भारमेन प्रवृत्तिकल्पनस्यायुक्तत्वात्। नचव्रश्चप्रत्ययेनगितश्चेतिसूत्रे भवती तिप्रतीकमुपादायभ्यपदे
४२ शिवम्स्वावोऽश्वातिपदिकेनेतिनिषेधसूत्रञ्जोपात्तांता दिव्राड्विषयक इतिशेखरग्रंथानुरोधेन नांतादसंख्या। देरितिसूत्रस्यासंख्या
देरितिग्रहणमेवैतत्परिभाषाज्ञापकं। अन्यथापंचमइत्यादावपिव्यपदेशिवद्भावेनसंख्यादित्वेतत्प्रवृत्तिःस्यात्। तत्रचप्रत्ययस्यो
देशपत्वेननदोषः। पूर्वादिनिरितिज्ञापकभाचामनुरोधेवेतितदन्नायइतिवाच्यं। विनिगमनाविरहेणास्यैवभाचामनुरोधित्वस्य
वक्तुमशक्यत्वात्। आप्रत्ययस्यशेखरस्तुपरिभाषाप्रत्याख्यानफलितार्थप्रदर्शकइतिचेन्न। भट्टांप्रत्ययत्वाभ्युपगमेनप्रत्ययवि
धिविषयत्वस्यसत्वात्परिभाषाप्रवृत्त्याचारितार्थ्योपपादनस्यायुक्तत्वात्। नचमडादिष्वयस्यादित्तम्विदेशः कर्तव्यइतिनांतादसंख्या
देरितिसूत्रस्यवार्त्तिकानुरोधेनागमत्वमेवास्यास्त्वीतिप्रतीयते। प्रत्ययत्वंतुप्रमाणपराहतमितिवाच्यं। तत्रकोदोषइत्युक्ताप्रत्ययां
तरस्वरेदोषःस्या। द्विंशतितमइतितदग्रिमभाष्येमडुग्युकोःऽनुदाहृत्वविंशतितइतितमडुमाद्योसहरणेनतेषांप्रत्ययत्वेपिनदोषइ
तिसूचनेनतद्विसूचनेनतद्विरोधाभावात्। अतएवात्रैवमड्डुकामागमत्वप्रत्यययोर्नविशेषःतमडुतुप्रत्ययत्वेसत्याद्युदात्तः। आग ४२

मत्वेत्वनुदात्तोभवतीतिउडुस्वरेणविंशतितमइत्यंतोदात्तत्वंभवतीतिकैयटोक्तिःसंगच्छते। मडादिष्वकारस्योच्चारणार्थत्वेनाविवक्षितत्वे
हलमात्रेमकारादावागमत्वप्रयुक्तस्वराभावादुडुस्वरएवभवति। प्रत्ययेत्वकारस्यविवक्षिततात्प्रत्ययस्वरोभवतीतिनतयोःकश्चिद्वि
शेषोस्ति। तमटितुतकाराकारस्यपक्षद्वयेपिविवक्षितत्वाद्विशेषोस्तीतितदाशयः। नचमडादिष्वागमत्वप्रत्ययत्वयोर्विशेषाभावेप्या
गमप्रकरणपाठादेवागमत्वं। अन्यथाप्रकरणविरोधइतिवाच्यं। वेस्तीयःस्त्रेःसंप्रसारणंचेत्यत्रउटसंबंधेनागमवादिनोपिप्रकरण
विरोधस्यसोढव्यत्वात्। नचैवमडादिष्वागमलिंगटित्त्वादिकरणंव्यर्थमितिवाच्यं। नांतादसंख्यादेर्मटःथयडुक्ष्वसिषट्कतिकतिपयच
तुर्भ्यइतिन्यासानामत्रानिमतत्वेनेष्टापत्तेः। षष्ठीत्यादौटित्वप्रयुक्तकार्येतुउटश्टित्वमादायवोध्यं। सार्वधातुकेपरतोविकरणविधान
वत्तेषांडटिपरतोविधानमितिभाष्याशयः। एतेनथुकःप्रत्ययत्वेनकिंनिष्फलोविशेषत्वादागमत्वप्रत्ययत्वयोर्विशेषाभावइतिकैयट
ग्रंथासंगतिरपिपरास्ता। नन्वेवंपंचथइत्यत्रथकारेपरतःस्वादिष्विति पदत्वमादायनलोपइवषष्ठइत्यत्रषस्यजश्त्वंचतुर्थइत्यत्ररे
फस्यविसर्गश्चस्यात्। ततश्चथडुथुकोःपृथक्करणंपदांतविधिप्रतिषेधार्थमितिवार्त्तिकंतन्माष्यंचविरुध्येतेतिचेन्न। षष्टाष्टमाभ्यांच

चित० तुर्यं तुर्याणां त्वादिनिर्देशैरेव तद्धारणात्। भाष्यवार्त्तिकं तु यथाश्रुतागमपक्षमादायैव प्रवृत्तमिति न तद्विरोध इति दिक्। वस्तुतस्तु नायं प
४३ क्षो युक्तः। तथाहि नान्तादसंख्यादेरिति सूत्रे भाष्ये तमडादिषु यस्यादित्वं निर्देशः कर्त्तव्य इत्युक्त्वा क्रियमाणे प्रत्ययाधिकारात्प्रत्यया
यं विज्ञायेतेति विपक्षे बाधकं वदता भाष्यकृताऽऽगमपक्ष एवाभ्युपगतः। तदग्रिमभाष्ये विंशतितमड इत्युदाहरणं तु एतदन्यत्रागमप्रयु
क्तस्वरविशेषाभावपरं नेताचतात्तदुदाहरणेनान्यत्र तत्प्रयुक्तस्वरविशेषाभावसूचनेन तद्व्यतिरिक्तेषु प्रत्ययत्वमभ्युपगमत्वमिति
प्रतीयते। प्रत्ययपक्षसिद्धमागमत्वं परित्यज्यानुमितप्रत्ययत्वमभ्युपेत्य तेषु विशेषान्तरापादने प्रकारान्तरेण तन्निर्देशो वा वारणं कर्त्त
तोऽमर्थोऽप्रामाणिकप्रवृत्तिपत्तिगौरवग्रस्तश्च प्रयासो भवेत्। भाष्यकृतां चैषु प्रत्ययत्वव्यवहारो न क्वापि दृष्टः। प्रत्युत षट्कतीति सूत्रेथ
टुकोरिति वार्त्तिकेन भाष्ये च तदिडागमत्वपक्षस्यैवोपलब्धेः। किंच नान्तादसंख्यादेरिति सूत्रस्थडटित्यनुवृत्तस्य नान्तादिति पंचम्या
षष्ठ्या कल्प्यते इत्येतद्ग्रंथकृदुक्तिरप्यागमत्वप्रदर्शिकैव। तस्याः प्राचामनुयायित्वकल्पनं तु स्वानभिमतत्वमूलकमेव। तस्मान्मडादिषु
प्रत्ययत्वपक्षो निर्युक्तिकत्वान्निर्मूलत्वाच्च न श्रद्धेयः। एवं च मटः प्रत्ययत्वाभावात्प्रत्ययविषयत्वाभावेन प्रकृतपरिभाषायाश्चाप्रवृत्तौ नान्तादसं ४३

ख्यादेरित्यत्रासंख्यादेरित्यस्य चारितार्थ्योपपादनं ग्रंथकृतां न युक्तिपथमारोहतीति पूर्वपक्षस्तदवस्थ एवेति चेदत्रेयं योजना। ननु नान्तादसंख्या
देरित्यत्र प्रत्ययविधित्वाभावेन प्रकृतनिषेधाप्रवृत्तौ व्यपदेशिवदेकस्मिन्नित्यनेन पंचमडित्यादावप्यसंख्यादेरिति निषेधः स्यादत आह। अत एवे
ति। सर्वनाम्नां बुद्धिस्थपरामर्शकत्वेनात एवेत्यस्यासंख्यादेरिति निषेधसामर्थ्यादेतद्विषये व्यपदेशिवद्भावानाश्रयणादेवेत्यर्थः। अन्यथा व्यप
देशिवद्भावो यदि प्रवर्त्तेत तदा केवलेऽपि निषेधे उदाहरणासंभवे विरुद्ध एवेयर्थ्यमित्याशयः। अन्यथेत्यस्योक्तरीत्या व्यपदेशिवद्भावाप्रवृत्तसौक
र्य इत्यर्थ इति। यद्वा प्राचीनमतानुरोधि ज्ञापकं पूर्वमुपपाद्य स्वमते नान्तादसंख्यादेरिति सूत्रस्थासंख्यादेरित्येवात्र ज्ञापकमिति दर्शयितुमाह। अ
त एवेति। एवं च स्वाप्रत्ययेऽपि गतत्वेऽति सूत्रस्थशेखरग्रंथोऽप्यनुकूल एवेति न विरोधमावहति। इयं चेत्यादिग्रंथस्तु पूर्वज्ञापकानुरोधेनैवेति न द
पद्मलम्। प्रसक्तानुप्रसक्त्या प्रकृतमनुसरामः। परिभाषाप्रवृत्तिस्थलमाह। इयमिति। असमासे निष्कादिभ्य इतीति। तत्र हि निष्कादिषु समा
सग्रहणं ज्ञापकं पूर्वत्र तदंताप्रतिषेधस्येत्यस्य प्रयोजनपरीक्षायामिदं तदंतविधिप्रयोजनमार्हादगोपुच्छसंख्यापरिमाणट्ठक्। परमगोपुच्छेन क्रीतं
पारमगोपुच्छिकमिति प्रयोजनमुपपाद्य एतदपि नास्ति प्रयोजनं विधौ प्रतिषेधः प्रतिषेधश्चायमिति तन्निराकृतं। तत्र विधौ प्रतिषेध इति प्र

चित०
४४

ताकमुपादायपूर्वोदिनिः सपूर्वश्चेतिप्रत्ययविधौग्रहणंवतेत्स्याः परिभाषायाज्ञापितत्वाद्यत्रप्रत्ययोविधीयतेतत्रैवानयातदंतविधिःप्र
तिषिध्यते।गोत्रुच्चसंख्यापरिमाणादिसनेनतुवक्ष्यतिषिध्यतइतितदंतविधिप्रतिषेधेनापिव्यपदेशिवद्भावप्रतिषेधइतिकैयटः॥३१॥विशे
षणविशेष्यभावस्थलेसर्वत्रबाधकासत्वात्तदंतविधेः सत्वेनवांतोयात्यादौयांतेप्रत्ययेइत्यर्थःस्यादतस्तद्वारणायपरिभाषामवतारयतिन
न्विति।अत्रज्ञापकाकांक्षांवारयन्नेतस्याः स्थलंदर्शयतिवाचनिकीति।नन्वत्रपरिभाषायांयस्मिन्नितिसप्तम्यंतोपलक्षणं।तस्यचाल्ग्रहणे
इत्यनेनविशेषणत्तयासंबंधः।अलितितुयेनविधिरित्युत्सर्गानुरोधेनविशेषणमेवग्राह्यं।तथाचसप्तम्यंतेविशेषणे।नचैवमल्ग्रहणेतद
शेपरतः कार्येनतुतदंतेइतिपरिभाषार्थः एवंचतस्मिन्नितिनिर्दिष्टेइतिसूत्रस्थतस्मिन्नित्यनेनार्थस्वरूपोभयतः सप्तम्यंतग्रहणवदत्रा
प्युभयतोग्रहणेनेन्दुशेखरेकृतात्यादौस्वरूपतः सप्तम्यंतत्वेप्यर्थतस्तदभावादेतत्परिभाषायाअप्रवृत्तौवक्ष्यादेरित्यर्थोनस्यादितिसतआह।
अस्याश्चेति।तस्मिन्नितिसूत्रेइतिशेषोपादानात्तथाग्रहणेपिप्रकृतेतदनुपादानात्तेननतद्ग्रहणमितिविशेषः।एवंचपरिभाषायांत
स्यादावितितदादेरित्यस्याप्युपलक्षणं।नन्वेतत्परिभाषायांस्वरूपतस्तद्ग्रहणेङःसिधुडित्यादावप्येतत्प्रवृत्तिःस्यात्तदंतआस्वद्यपंचेति॥ ४४

ननुतापसहसेऽसिचात्यादावार्द्धधातुकस्यसंबंधेनलब्धस्यविशेष्यस्यषष्ठ्यंतत्वाद्विशेष्यविशेषणयोः सप्तम्यंतत्वाभावादेतस्याअप्रवृत्तौतादे
रित्यर्थोनापद्यतेरित्यतआह।तापसहेति।निरूपितमिति।तत्रहितादेरितिप्रतीकमुपादायवक्ष्यमाणेतादेरित्यर्थोऽङ्गस्येभः।वलादेरित्यादिग्रह
णसामर्थ्येनविशेष्यविशेषणयोरुभयोरपिसप्तम्यंतत्वएवयस्मिन्विधिरित्यस्यप्रवृत्तेः।अतएवङःसिधुडित्यादौसादेःपदस्येतिनार्थः।इति
चेन्नासत्त्वात्तवलादेरित्यत्रहृतविशेषणे।भूतवत्पदार्थस्यतकारेणविशेषणात्तकाररूपवलादेरितिवाच्योर्थः।एवंसेऽसिचीत्या
दावपिबोध्यं।सप्तमीतुप्रथमार्थएवेत्यलमिति॥३२॥प्रकृतप्रपंचतदंतविधिनिरूपणेव्यपदेशिवदेकस्मिन्नित्यतिदेशप्रसंगादतिदे
शात्मिकांसर्वोद्वंद्वइतिपरिभाषामवतारयति।घटपटमिति।अस्यान्यायसिद्धत्वंव्यवस्थापयति।चार्थेद्वंद्वइति।न्यायसिद्धेर्ज्ञापक
मप्याह।तिष्येति।तदेवोपपादयतितद्धीति।तथाचतिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वेबहुवचनस्यतिबहुत्वानुवादेनद्वित्ववदित्यतिदिश्यते॥
तत्रद्विवचनमित्येववक्तव्येबहुवचनस्यत्वनुवादएकत्वेद्वित्वातिदेशवारणाय।सचैतन्न्यायाभावेसर्वत्रैवेतरेतरयोगेबहुत्वस्यैकस्वं
वसंभवेनव्यावर्त्याभावापत्त्यर्थःस्यादतस्तत्सामर्थ्यादेतन्न्यायांगीकारेत्वसंभवेनकदाचित्समासारेएकसंभवस्तद्व्यावृत्तयेबहुवचनस्ये

चित्० त्यनुवादश्चरितार्थइति भावः।तदेकस्मिकत्वस्यापाति।भावत्।विनाभस्यानुपपत्तिस्तत्सर्वेतेनज्ञाप्यमितिन्यायादिति भावः।३३।विक
४५ ल्पप्रसंगात्परिभाषांतरमाह।सर्वेविधयइति।नन्वेकेनैवयोगविभागेनप्रयोगसिद्धावपरोव्यर्थइतिचेत्सत्यं।उक्तंचैतत्षष्ठीयुक्तश्छंदसी
तिसूत्रेयोगविभागइतिप्रतीकमुपादायकैयटेन।तेनपरिभाषासंपद्यतेयावदिष्टशास्त्रेकार्यंतच्छंदसिवा भवति।तत्रानंयेवसिद्धत्वा
द्बहुलंछंदसीत्यादिनवक्तव्यं।एतदर्थंचप्रत्ययोबहुलमित्यत्रयोगविभागोपिनकार्यइति।एतदेवध्वनयितुंवेतियोगविभाग
स्यांतेलेखइत्यवधेयं॥३४॥प्रसंगेविकल्पप्रसंगंपरिसमाप्यपुनःपूर्वोक्तातिदेशप्रसंगात्प्रकृतिवदनुकरणमितिपरिभाषामवतार
यति।नन्विति।तत्रज्ञापकंदर्शयति।इष्टयेंऽशेनतस्याःसत्वंज्ञापयित्वातस्याअसार्वत्रिकत्वेप्रमाणमाह।तत्रेवेति।स्त्रियइतिनिर्दे
शएवेत्यर्थः॥३५॥अतिदेशप्रसंगादेवतन्निषेधोपिवक्तव्यइतिसूचयितुंएकदेशविकृतमितिपरिभाषामवतारयति।नन्विति।रामा
वित्यादौयथोत्यादौयथा।देशपक्षेजातस्यपदत्वस्याप्यतिदेशेनैववाच्यत्वेनात्रकार्यकालपक्षइतियथोद्देशपक्षस्याप्युपलक्षणंबोध्यं
।नन्वाकडारीयभपदसंज्ञाविषयेयथोद्देशपक्षस्यैवसिद्धांतितत्वेनकार्यकालपक्षइत्युक्तिरसंगतेतिचेन्न।आकडारीयसंज्ञासूत्रप्रसक्तं ४५
तादृशं

तद्विषयेएवपूर्वोक्तसिद्धांतस्यसत्वेनादोषात्।नचैवमप्यपादानमुत्तराणिकारकाणिबाधंतेइत्याकडारसूत्रस्थभाष्यविरोधइतिवाच्यं।तस्या
पितत्रतत्रसंज्ञाद्वयोद्देश्योदाहरणदानेनविशेषविषयत्वेनविरोधाभावात्।केचित्तुयथाईदूदेद्द्विवचनमितिसूत्रेकार्यकालपक्षमाश्रित्य
एवमपियत्सिद्धेप्रगृह्यकार्यंतुतस्यनप्राप्नोतित्र्यणोप्रगृह्यस्यानुनासिकइत्याद्यं।किंतुएवंतर्हिकिंनैतेनकार्यकालंसंज्ञापरिभाषमिति
यथोद्देशमेवसंज्ञापरिभाषमितिलक्ष्यानुसारियथोद्देशपक्षाश्रयणेनसमाहितं।समाहितंतथाप्रकृतेपितस्यतथैवांगी।कारादाकडा
रीयभपदसंज्ञाविषयेयथोद्देशपक्षएवेत्यत्रप्रमाणाभावः।अतएवांतादिवच्चेतिसूत्रेभ्यथादिवत्वेकानिप्रयोजनानीत्युपक्रम्यसुप्ति
ङ्विधिषुप्रयोजनमितिवार्त्तिकव्याख्यावसरेसत्वषुषोरेकादेशःसुप्त्वादिवन्न भवतियथाद्राक्षीतकर्तृसुबंतंपदमितीतिकालपक्षेप
दत्वप्रतिपादकभाष्यंसंगच्छते।मत्वग्रंथलापनाग्रेहस्तुयथोद्देशपक्षएवेत्यत्रैवकारोभिन्नक्रमइतिलाक्षणिकत्वाकडारीयभपदसंज्ञासू
त्रयप्रसक्ताविवेतिलापनायइत्याहुः।नन्वेवमनेनैवसर्वत्रनिर्वाहेस्थानिवत्सूत्रंव्यर्थमितिचेत्तत्राह।यत्रत्विति।अन्यत्रविस्तरइति।अ
भायादित्यत्रोभयतइतिप्रतीकमुपादायघुवाहंइशेखरइत्यर्थः॥३६॥निषेधप्रसंगादेवपर्यवसितनिषेधार्थिकांसंग्रहवाक्यरूपां

चित्०	परिभाषामाह। पूर्वपरेति। अत्र पूर्वापेक्षयोत्तरस्य बलवत्त्वे बोधिते पूर्वस्य निषेधः पर्यवसितः। इतस्त्वारभ्यपदजनिष्यमाणनिमित्तोऽप्य
४६	पवाद इत्येतत्पर्यंतं सर्वमस्यैव प्रपंचः। तत्र पुनः प्रसंगविज्ञानात् सिद्धमिति परिभाषामवतारयति। नन्वेवमिति। एतत्फलं त्ववतरणे
क्रमेव बोध्यं। अत्र केचित्। एतत्परिभाषावतरणे भिंधात्यत्र परत्वात्तत्र अबाधिर्नेस्यादिति ग्रंथोऽचश्चेतिसूत्रस्थभाष्यकैयटविरोधा
दयुक्तः। तत्र हि पूर्वस्मिन्योगेऽच्ग्रहणस्य किं प्रयोजनमिति पृष्टेऽच्ग्रहणं संयोगाच्समुदायनिवृत्त्यर्थमित्युक्त्वा प्रतक्ष्य प्रक्ष्येत्यादौ
संयोगनिवृत्तिप्रयोजनमुपपाद्याच्समुदायनिवृत्तिप्रयोजनोपपादनाय तितउं छत्रं तितउच्छायादीर्घात्पदांतादिति विभाषानुज्ञा। न हि
त्युक्तं भाष्यकृता। तत्र तितउच्छत्रमिति प्रतीकमुपादाय परत्वाद्दीर्घलक्षणे तुकि सकृद्गतिन्यायाद्ध्रस्वलक्षणः पुनर्न प्रवर्त्तते। न चैवंविधे
विषये पुनः प्रसंगविज्ञानमस्ति। नित्यविकल्पयोर्विरोधात्परेण पूर्वस्य बाधप्रसंगात्। यत्र हि पूर्वो विधिः परं न बाधते तत्र पुनः प्रसंग
विज्ञानं कदाश्रीयते। समुदाये वा कार्यं प्रति व्याप्रियमाणेऽवयवानां पारतंत्र्याद्व्यापारान्नैव ह्रस्वलक्षणो लुक्प्रसंग इति
कैयटः। एवं च तन्मते कैयटानुरोधेन परत्वलक्षणनित्यबाधकविकल्पविधिविषये तद्वैयर्थ्यापत्त्या नित्यस्य बाध एवेति न पुनः प्रसंग ४६

विज्ञानन्यायस्य प्रवृत्तिः। अन्यथा पूर्वोक्तविकल्पापादनपरं भाष्यं तत्रत्यकैयटश्च विरुध्येत। तस्माद्यत्र पूर्वो विधिः परं न बाधते तत्रैव
भिंधकीत्यादौ क्वचित्पुनः प्रसंगविज्ञानन्यायाश्रयणे विरोधाभावात्। न हि तत्र अधिना परत्वाद्बाधितस्याप्यकचः पुनः प्रवृत्तौ कश्चि
द्विरोध इत्याहुः। अपरे तु साक्षात्वन्ततातिसूत्रस्थभाष्यविरोधात्तद्विरोधाच्चाच्श्चेतिसूत्रस्थकैयटोऽयुक्तः। तत्र हि च्व्यंतस्य प्रतिषेधो
वक्तव्यः। लवणीकृत्येत्युक्त्वा न वा पूर्वेण कृतत्वादुक्तव्यः। अस्त्वनेन विभाषा पूर्वेण नित्यो भविष्यतीत्युक्तं भाष्यकृता। तत्र पूर्वेणेति प्रती
कमुपादाय पुनः प्रसंगविज्ञानादिति भाव इति कैयटः। यद्येतद्विषये पुनः प्रसंगविज्ञानन्यायेन प्रवर्त्तेत तदेदं भाष्यं तत्रत्यस्वोक्तिश्चेत्युभा
वपि विरुध्येयातां। अत्र भाष्ये पूर्वेणेत्यूर्यादिच्विडाचश्चेति ग्राह्यं। तत्रैवास्त्वनेन विभाषेत्यत्र परत्वादिति शेषः। तस्मादेतदन्यतरन्यायाश्रय
णे लक्ष्यानुरोध एव बीजं। अतो न पूर्वोक्तभाष्ययोः परस्परविरोधः। इदमेव ध्वनयितुमग्रे वक्ष्यति मूलकारः लक्ष्यानुरोधादिति। यत्र ही
ति कैयटप्रतीकमुपादाय यथा भिंधकीत्यत्र परत्वाद्धौ कृते तेन प्रसंगविज्ञानादकजिति तत्रत्योद्योतस्तु कैयटानुरोधीति न प्रतिन प्रतिकू
लतामावहतीत्याहुः। ३८। सकृद्गतिन्यायमवतारयति नन्वेवमिति। अनया चरस्य प्रवृत्तेः पूर्वमुत्तरं वा सर्वथा पूर्वशास्त्रप्रवृत्तिप्रतिबंध

वित्त॰ कलरूपंबलवत्वंबोध्यतेपरशास्त्रस्य। पूर्वेपरिभाषयानुत्वस्यपूर्वप्रवृत्तिरित्येवत्वंबोध्यते। उक्तपरिभाषाद्वयेमूलंवक्तुंविप्रतिषेधसूत्रभा
४७ ष्यपर्यंतग्रपनिबध्नाति। तत्रेत्यादिना। यत्त्वित्यादिना केयटोक्तिमर्थतोनूद्य खंडयतितत्रेत्यादिना। अत्रेदंबोध्यंकेचिदाचार्याजातिःशब्दा
र्थइत्याहुः। अयंहितेषामाशयः। व्यक्तीनामानंत्यात्संबंधग्रहणासंभवाद्यस्यांकस्यांचिद्व्यक्तौसंबंधग्रहणेपिव्यभिचाराच्चनव्यक्तिःशब्देनप्रतेः
पितुजातिरेवासाचसर्वव्यक्तिषुएकाकारप्रत्ययदर्शनादरूपेवेति। व्यक्तिमानंत्यमुपलक्षणतयेति। केचित्त्वाचार्याव्यक्तिःशब्दार्थइत्याहुः। तेषां
त्वयमाशयः। शब्देनतत्तज्जात्युपलक्षितव्यक्तेरभिधानान्नानंत्यव्यभिचारौदोषौ। तस्माद्व्यक्तिरेवशब्दार्थोनजातिः। तत्कार्यस्यव्यक्तावेवदर्शना
च्च। जातिमानंत्वत्रोपलक्षणतयेति। पाणिनिस्तूभयमित्याह। अतएवपस्पशाह्निकेभगवताभाष्यकृता। किंपुनराकृतिःपदार्थआहोस्वि
द्द्रव्यमितिविप्रतिपद्योभयमित्याह। कथंविज्ञायते। उभयथाह्याचार्येणसूत्राणिपठितानि। आकृतिपदार्थंमत्वाजात्याख्यायामेकस्मि
न्बहुवचनमन्यतरस्यामित्युच्यते। द्रव्यंपदार्थंमत्वासरूपाणामेकशेषइत्यारभ्यतेइत्युक्तं। अन्यथाजातिरेवशब्दार्थइत्यंगीकृतेतस्या
श्चैकत्वेनतद्देशप्रवृत्तस्यापिलक्ष्येएकदेशप्रवृत्तौप्रतिव्यक्तिनावृत्तिः। किंतुतत्रयथाऽग्निरानीयतांनिपतामित्युक्तेयोग्यपात्रद्वारैवाग्न्यानयने ४७

प्रवर्त्ततेनायोग्यजात्वादिपात्रद्वारातेषांतत्रबाधितत्वात्तथाशास्त्रमपियोग्यव्यक्तिद्वारैवप्रवर्त्ततेनायोगपद्युगपद्भयासंभवरू
पबाधरूपबाधस्थलेयल्लक्ष्यरूपव्यक्तिद्वारेत्ययोग्यव्यक्त्याप्रवृत्तिरेव। तथासतितदितरव्यक्तिषुचरितार्थयोःशास्त्रयोर्नयुग
पद्भयासंभयासंभवस्थलेतद्यथाद्व्योरितिभाष्यदृष्टांतेनाप्रवृत्तिपक्षौविप्रतिषेधशास्त्रस्यविषयत्वेनशिशादिनसिध्येत्। व्यक्तिरेवप
दार्थइत्यंगीकारेतुतत्रानुगतधर्माभावात्तेनानुगतानेकव्यक्त्युपस्थितौव्यक्त्युद्देशेनप्रवृत्तस्यशास्त्रस्यलक्ष्येप्रतिव्यक्त्यावृत्तौयुगप
दसंभवस्थलेसामर्थ्यात्तृजादिष्टंतेनपर्यायेणप्रसक्तौविप्रतिषेधशास्त्रंपरमेवेतिनियमार्थमतोभिंधकीतिचनसिध्येत्तस्माच्छब्दस्या
नुरोधाद्द्वयमप्यंगीकुर्तव्यमुक्तं। एवंचशिष्टादित्यादिसिध्यर्थंव्यक्तिपक्षेंग। कृतेपूर्वोक्तन्यायेनैवविप्रतिषेधशास्त्रस्यनियमार्थत्वात्स
कृद्गतिन्यायसिद्धिः। एवंचव्यक्तिपक्षेसर्वलक्ष्यंशास्त्रंप्राप्नोतिनजातिपक्षेइत्यत्रमानाभावादित्युक्तिर्नयुक्ता। व्यक्तिपक्षेऽनभिधेयायाजा
तेरुपलक्षणत्वेनाश्रयणात्तत्तज्जात्युपलक्षितसर्वव्यक्त्युपस्थितौतत्तल्लक्ष्यव्यक्तिविषयेशास्त्रोपस्थितौसर्वलक्ष्यंशास्त्रंव्याप्नोति। जातिप
क्षेतुतत्रप्रवर्त्तमानंशास्त्रंयोग्यव्यक्तिद्वारैवोपस्थितलक्ष्यंव्याप्नोतीतिप्रक्रियैवमानत्वात्। सरूपसूत्रस्थंभाष्यंतुतत्रासर्वंद्रव्यगतिःशाब्दो

चित०
४९

ति॥ अस्य सर्वेद्व्यागतौ को दोषः। गौरवं ब्रूमो ऽग्नीषोमीयमित्येकाः श्रुतौ। उक्तं कुर्वीतापरो ऽश्रुतौ। के कर्मणि विगुणं कर्म भवति विगुणे च कर्मणि फ
लानवाप्तिरिति स्फुट एव। तत्र निधानपक्षमाश्रित्य प्रवृत्तेन जात्युपलक्षिततत्पक्षमाश्रयेतिनिनन्दिरोधः। ननु एकत्र विरुद्धकार्यद्वयप्रयोगे हि वि
प्रतिषेधेन च शिशादित्वादौ तथास्तिप्रकृतेर्हेत्वाश्रदिश्यः प्रत्ययस्य च तातङादेशाद्ध्रस्वतश्चाद्वयोरिति। केयंटस्यष्टमिति। नावश्यमेक
स्य कार्यद्वयप्रयोग एव विप्रतिषेधः किं तर्हि असंभवोपीति। इकोगुणेति सूत्रभाष्यस्थनावश्यमिति प्रतीकमुपादाय द्विकार्ययोगत्वाभावे के
वलासंभवोपि विप्रतिषेध इति तेनोक्तम्। एवं चैकस्य द्विकार्ययोगेप्यसंभव एव विप्रवृत्तौ नियामको न त्वेकस्य द्विकार्ययोगमात्रं तस्यान्यथा
सिद्धत्वादिति ध्येयं॥ ३९॥ पूर्वापेक्षया परस्य बलवत्त्वे व्यवस्थापिते पाघ्राध्माधेट्दृशः शइति शप्रत्ययेपि बद्ध्यादौ चरितार्थस्य विकरणस्य
लिडादेशे चरितार्थस्यानुदात्तङित इत्यादेश्च एधते इत्यादौ युगपत्प्राप्तौ परत्वाद्विकरणे तद्व्यवधानादनुदात्तङित इत्यादिन स्यादित्याक्षेपेण विक
रणेभ्यो नियमो बलीयानिति परिभाषामवतारयति नन्वेवमिति। विषयसप्तमीति। एतदर्थज्ञापनात्पूर्वं तु सतिसप्तमीति भावः। हृद्भ्यः स्यस
नोरिति स्येवि भाषातङ्विधानाद्यथा विकरणेभ्यो नियमस्य बलीयस्त्वं कल्प्यते तथा सत्यपि विकरणव्यवधाने नियमः प्रवर्तते इत्यपि कल्प्य ४९
यितुं शक्यं। किं चैवं सति न विप्रतिषेधशास्त्रबाधः स्वार्थकार्थकपरिभाषास्वीकारे तु शास्त्रबाधः स्यादेव तस्माद्विकरणव्यवधानेपि नियमप्रवृत्तिरित्येव कल्पयितुं युक्तमिति

केचित्तन्मतेनाह विकरणेति। नन्वेवमनुदात्तङित इति सूत्रस्थभाष्यविरुद्धमत आह शपः श्यन इति। तत्र ह्युपसर्गस्य निर्गमय्य णिचोपसंख्यानं कर्तव्यम्। न विशतेर्विकरणेति।
किं पुनः कारणं न सिध्यति। अथाव्यवहितत्वादित्युक्तं। यदि पूर्वोक्तमयुक्तं स्यात्तदा विकरणेभ्यो नियमो बलीयानिति न्यायेन
प्रागेव विकरणोत्पत्तेर्नियमस्य सिद्धौ तदनंतरं विकरणडागमयोः प्रसक्तौ नित्यत्वात्पूर्वं विकरणे ततो ऽडागमे चेत्तदानीं किमर्थं
स्यादतः सत्यपि विकरणव्यवधाने पूर्वोक्तज्ञापकान्नियमः प्रवर्तत इति ध्वनितं। नन्विदं वास्तिकवचन्नाभादिति सूत्रस्थभा
ष्यस्याम अडिति भाष्योक्तसिद्धांतासंगतम्। एकदेश्युक्तिरियं। सरूपेयदि पुनरियं परिभाषा विज्ञायेते स्यनुदात्तङित इति सूत्र
स्य सिद्धांतिभाष्यरीत्याह। यस्तु नइति। शाबादिभ्यस्तु इति। तेषां कर्त्रर्थसार्वधातुके परतो विधानादादेशानंतरमेव प्रवृत्तेरि
ति भावः। इदं च स्यतासीतिसूत्रे आयादिभ्य आर्धधातुके इत्यत आर्धधातुक इत्यनुवृत्त्यार्धधातुकयोर्लृलुटोः परतः स्यतासी इत्य
भिप्रायक एवास्थायामेव स्यादस्मइति स्यतासी लृलुटोरिति सूत्रस्थभाष्योक्तरीत्या स्यादीनामंतरंगत्वमाश्रित्य भानोरितिवि
हितयोगपंचम्यंतसामानाधिकरण्येनानुदात्तङित इत्यस्यार्धविहितविशेषणं चाश्रित्योक्तं। इदानीं स्यतासी स्यचार्धधातुक इस

विव० नुवृत्तावपि अनुदात्तङित इत्यस्याविहितविशेषणत्वानाश्रयणेपि न दोष इत्याह। यद्वेति। अत्र लमात्रापेक्षत्वादित्यस्य शब्दरूपप
४८ रनिमित्तकत्वाभावादित्यर्थः। अन्यथा वक्ष्यमाणबहिरंगपरिभाषास्थकैयटग्रंथखंडनपरस्य ग्रंथविरोधः स्यात्। तस्माद्यथाश्रुतं न यु
क्तं। भाविसंज्ञेति। स्पष्टं चैतदनुदात्तङित इति सूत्रे भाष्ये। तर्ह्यन्योन्याश्रयमाशंक्य भाविनी संज्ञा विज्ञास्यते। सूत्रशाटकवत्। तद्य
था कश्चित्तंतुवायमाह। अस्य सूत्रस्य शाटकं वयेति। स पश्यति। यदि शाटको न वातव्यो अथ वातव्यो न शाटकः शाटको वातव्यश्चेति भाविनी खल्वस्य
संज्ञाभिप्रेता यस्मिन्नुते शाटक इत्येषा संज्ञा भवतीति। एवमिहापि सलस्यानेकर्त्तयोगस्याभिनिर्वृत्तस्यात्मनेपदमित्येषा संज्ञा
भवतीत्युक्तं। नन्वनुदात्तङित इति सूत्रे भाष्यकृता अथवा पुनरस्तु नियम इत्यादिना नियमपक्षस्यापि सिद्धांतितत्वात्सावयपक्षोः
कुतो नांगीक्रियत इत्यत आह। भिन्नवाक्यतयेत्यारंभगौरवमिसंतं। नन्वेकस्याः प्रकृतेरनेकप्रत्ययानामव्यवहितत्वमेव दुर्लभं
किमुत जातानां नियमेन निवृत्तिरित्यत आह। सामान्येति। अन्यत्रेति। उद्योतादावित्यर्थः॥ ६०॥ नित्यस्य बलवत्त्वमाह। परादिति। ४८

तत्र बीजमाह। तत्राकृतमिति। कृताकृतेति। लक्ष्यदर्शनमेव प्रमाणं दर्शयन् तदुदाहरणमेव सूचयति। अत एवेति। इदानीं कृताकृ
तेति परिभाषापरिभाषात्वतद्विपरीतमनित्यमित्यंशं प्रपंचयितुं शब्दांतरस्य प्राप्नुवन् विधिरनित्य इति परिभाषामवतारयति। यद्य
क्तीति। एतदुदाहरणानि भेध्याम्युक्तानीति तत एव द्रष्टव्यानि॥ ६१॥ एकदेशिन इति। नित्यादिषु विप्रतिषेधासंभवेन विप्रतिषेधशा
स्त्राव्यापारादिति भावः। अत्र कैयटसंमतिमाह। स्पष्टं चेदमिति। अंतरंगं चांतरंगाद्बलीयो भवतीत्याद्यवसरे कार्यमित्यर्थे
कृत्यः करणार्हं कार्यं तुल्यबलं च करणार्हमिति नित्यान्तर्गतपदांतरंगबहिरंगेष्वस्य सूत्रस्याव्यापार इत्युक्तं। तथा च नित्यादिषु वि
प्रतिषेधसूत्रस्याव्यापारं वदन्कैयटस्तत्र परत्वादिसूक्तिरयुक्तेति स्पष्टमेवोक्तवान्। ननु नित्यत्वांतरंगत्वोभयसंभवे किमुत्कर्षमि
त्यपेक्षायामाह। णौ चङीति। भाष्ये उक्तमिति। माभवानटिटदित्यत्र द्विर्वचनं क्रियतां ह्रस्वत्वं वा। परत्वात् ह्रस्वत्वं नित्यत्वात् द्विर्वचनमि
त्युक्तं। तत्र द्वित्वस्य सत्यप्यंतरंगत्वे नित्यत्वादिसूक्त्या प्रथमस्यागमानाभावान्नित्यत्वादिसंख्येयो क्षेत्रवडचितइति ध्वनितं॥ असिद्धं बहिरं

चि॰ गमंतरंगेइतिपरिभाषामवतारयतिनित्यादिति। अस्माभिमता। भापेक्षत्वबह्वपेक्षत्वरूपांतरंगबहिरंगभावस्यनशब्दमर्यादयालभ्यत्वमि
५० तिध्वनयितुंशब्दमर्यादयालभ्यांतरंगबहिरंगपदार्थमाह। अंतर्मध्येइति। एवंतदीयेति। अंतरंगबहिरंगशब्दयोरेतादृशार्थकत्वेभाष्य
संमतिमाह। एतच्चेति। भाष्येनवाबहिरंगलक्षणत्वादितिवार्त्तिकेद्वितीये आरभ्यमाणेत्वस्मिन्योगेसिद्धंवस्तुसंप्रसारणमुच्चेधोइति
वार्त्तिकेपपुषइत्यादौबहिरंगमंतरंगमितिचप्रतिद्वंद्वीभाविनावेतावर्थावित्युक्तं। नन्वंगशब्दस्यार्थशब्दोभयपरत्वंविनिगमना
विरहादेवंचार्थनिमित्तकस्यापिबहिरंगत्वंदुर्वारमित्यतआह। अत्रांगशब्देनेति। तत्समाह। तेनेति। अतएवेति। अर्थनिमित्तक
स्यबहिरंगत्वाभावादेवेत्यर्थः। भाष्यवार्त्तिकसंमतंचैतदित्याह। अतएवेति। अत्रकेचित्। अर्थनिमित्तकस्यबहिरंगत्वानाश्रयणेन
तिस्त्रितिनिषेधोनज्ञापकः। तस्यत्रिशब्दार्थसमवेतसंख्यासमर्पके आमित्रयादेशइत्यर्थकस्यत्रेस्त्रयइत्यस्यमाभवमतसिद्धौ
णेप्रियतिसृणामित्यादावामस्तदर्थसमवेतसंख्यासमर्पकत्वाभावादप्रवृत्त्यानिषेधस्यचरितार्थत्वात्। किंच। बहिरंगापेक्षयां ५०

तरंगस्यपूर्वंप्रवृत्तिकत्वेनबलीयस्त्वेपितत्प्रवृत्त्युत्तरंबहिरंगप्रवृत्तौबाधकाभावात्कृतेपित्रयादेशेपुनःस्थानिवद्भावेनतिस्त्रादे
शप्राप्तदीर्घवारणायतिस्त्रितिनिषेधस्यचरितार्थत्वादप्यसंभवदुक्तिकंज्ञापकमित्याहुः। अन्येतुकेचिदिदंज्ञापकंनस्वत्रीत्यासंभ
वति। एतत्स्वारंभसामर्थ्यादेवबहिरंगपरिभाषायाअनित्यत्वकल्पनेनाप्युपपत्तेः। नापिवार्त्तिकरीत्यावार्त्तिककृताहिनुमचिर
तृज्वद्भावगुणेभ्योनुट्पूर्वविप्रतिषेधेनेत्यचिरनुटोःपूर्वविप्रतिषेधप्रतिपादनेनैतदभ्युपगमात्। अन्यथातिस्त्रादेशाभावेरादेशा
स्यवाप्रवृत्तेःपूर्वविप्रतिषेधोयुक्तःस्यात्। नापिभाष्यरीत्याःचिरकृतइत्यत्रबाध्यविशेषचिंतायांमध्येपवादन्यायेनतिस्त्रःपरस्येत्स
त्रपूर्वसवर्णदीर्घस्यप्रियतिस्त्रःस्वमित्यत्रऋतउदित्युत्वस्यचबाधःस्यान्ननुतिस्त्रस्तिष्ठंतीत्यत्रऋतोङीतिगुणस्येत्यत्रयपबाधसा
मान्यचिंताआश्रयणीयातथाचाविशेषात्त्वविषयेप्राप्तनुटोपिबाधेवार्त्तिकेरादेशनुटोःपूर्वविप्रतिषेधोयुक्तः। अपवादविषये।
विप्रतिषेधाःप्रवृत्तेरित्याशंक्यनतिसृइतिज्ञापकाद्रादेशोनुड्विषयेनेतिवदताभाष्यकृतातदनित्यत्वाभ्युपगमात्। अतएवत्रयादे

चिन्त्०
५१ शेत्वंनस्यप्रतिषेधइतिस्थानिवत्सूत्रस्थभाष्यवार्त्तिकविरोधोपिनेत्यापाद्यांगशब्देनेत्यस्यानंतरंप्राप्तइतिशेषयोजनेनसर्वस्या
मंजस्यांतेनेत्यस्यायःशब्दरूपनिमित्तत्वाश्रयणेनेत्यर्थः। अर्थनिमित्त"स्येत्यस्यसर्ववाक्यंसावधारणमितित्याशयेनार्थनिमित्तक
स्यैवेत्यर्थइतिमूलग्रंथोपपत्तिःकृता। अंगत्वाएतेनेत्यादिना। अत्रकेचिदित्याद्युक्तंसर्वमेवग्रंथमनुपभाष्यानारूढमार्गमवलंब्यग्रं
थार्थंचाविज्ञायदूषणगणावभासंप्रयुंजाना आधुनिकतराःप्रत्युक्ताइत्याहुः। अत्रेदंबोध्यं। पूर्वोक्तसूत्रभाष्यवार्त्तिकप्रामाण्येनार्थ
कृतबहिरंगत्वमाश्रित्यतदनित्यत्वकल्पनापेक्षयाः अर्थकृतबहिरंगत्वंनास्त्येवेतिकल्पनंयुक्तं। तदाश्रयणेदृष्टतरफलाभावात्। नच
वर्णाद्वर्णेनेतिसूत्रेभाष्ये आतिशायनिकाद्बहुव्रीहिर्नयतिप्रतिषेधेनेतिसूक्ष्मवस्त्रतरस्त्तीत्यंगनरइत्यत्रतत्प्रयोजनमुपपाद्यनेष
युक्तोविप्रतिषेधः। विप्रतिषेधेपरमित्युच्यतेपूर्वश्चबहुव्रीहिपरः आतिशायनिकाइत्याशंक्यतेइष्टवाचीपरशब्दोविप्रतिषेधेपरं
यदिष्टंतद्भवतीतिसमाधायानंतरं। एवमप्ययुक्तं। अंतरंगआतिशायनिकः कांतरंगताप्रातिपदिकादातिशायनिकःसुबंता ५१

नोबहुव्रीहिरितिशंकितेआतिशायनिकोपिनांतरंगःसमर्थात्तद्धितउत्पद्यतेसामर्थ्यंचसुबंतेनेतिसमाधायएवमप्यंतरंगःकथंस्वपदा
र्थेआतिशायनिकोऽन्यपदार्थेबहुव्रीहिरित्युक्तं। एतद्भाष्यानुरोधेनार्थकृतबहिरंगत्वमाश्रयणीयमेव। अन्यथातद्विरोधःस्यादिति
वाच्यं। अस्यभाष्यस्यपूर्वपक्ष्युक्तित्वेनासाधकत्वात्। एतदनंतरमेवध्वमपिनांतरंगःकथंसन्नीयामातिशायनिकोनचांतरंगप्र
तियोगिनंस्पृशतीत्युक्त्याएवमपीत्यनेनेवार्थकृतबहिरंगत्वंनास्तीत्येवध्वनितत्वाच्च। अर्थकृतबहिरंगत्वमाश्रित्यमूलग्रंथोप
पत्तिःकृतासापिनयुक्ता। तदर्थस्यमूलकृताशयात्तोप्यस्पष्टत्वात्। अतएवमूवादस्यइतिसूत्रेशब्दरत्नेऽर्थनिमित्तकबहिरंगत्वाभावा
द्वेत्युक्तिः प्रथमचरमेतिसूत्रेऽर्थकृतबहिरंगत्वानाश्रयणाद्वेत्युक्तिश्चसंगच्छते। एवमन्यत्रापिबहुशस्तथोक्तिरन्वेषणीया। अर्थकृतब
हिरंगत्वाश्रयणेंतरंगप्रवृत्त्युत्तरंजातेपित्वादेशोतस्यस्वार्थनिमित्तकत्वेनबहिरंगत्वान्नामीतिदीर्घाप्राप्त्याज्ञापकत्वमितितदाश
यइत्यपिनांतेः संज्ञाकृतबहिरंगत्वस्यापिस्वीकारेणनामीत्यस्यांगसंज्ञानिमित्तत्वेनबहिरंगत्वाविशेषात्। नामीतिदीर्घविधायकेऽच्छ

चि॰ त्सुपस्थितत्वात्तस्याचूकारत्वेन नाजानंतर्य इति निषेधाच्चेति दिक्॥ गुणेनेनेति॥ अर्थसंज्ञाकृतबहिरंगत्वानाश्रयणेनेत्यर्थः॥ तेन बलिजोपेकर्न्येषे
५२ बहिरंगपरिभाषाया अनित्यत्वान्न प्रवृत्तिरिति कल्पनमनुचितमेवेति भावः॥ एतदग्रे स्फुटीभविष्यति॥ तुष्यतु दुर्जनन्यायेनेदमंतरमाह॥ ए
यादेशादेरिति॥ यथाधीयतीत्यादौ प्रक्रियाक्रमेण लघूपधगुणस्य पूर्वोपस्थितनिमित्तकत्वरूपांतरंगत्वेपि तदनादृत्य प्रयोगी यो च्चारण
क्रमेण पूर्वोपस्थितनिमित्तकत्वरूपांतरंगमादाय यान्विश्रुधाविति॥ ती यङ्तथा कृतेपी यादेशादेः संज्ञाकृतबहिरंगत्वेपि तदनादृत्य परनि
मित्तकत्वरूपांतरंगत्वमादाय यैवेष्टसिद्धौ तदनित्यत्वकल्पनमनुचितमेवेति भावः॥ ननु दीर्घो किति इति सूत्रे किति इति किमर्थं यमन्यते इत्या
दिप्रयोजनमुपपाद्य किद्ग्रहणे क्रियमाणे तु कस्मान्न भवतीयं यम्यते रंरम्यते॥ नुक्कृते नंजंतत्वादित्याशंक्याकिद्ग्रहणमनर्थकं दंतस्या
जोसनिवृत्त्यर्थमिति समाहितं॥ दीर्घश्रुत्या लब्धेनाच इत्यनेनाभ्यासस्य विशेषणादजंताभ्यासस्य दीर्घविधानेनाजोंत्यस्येसंस्थानश्चः
त्यादिति शंका यथाशयः॥ यद्यचाभ्यासो विशेष्येत तदा॥ किति इति प्रतिषेधोऽनर्थक एव स्यात् तस्तत्सामर्थ्यादभ्यासेनाचो विशेषणे॥ मा ५२

सावयवीभूताच इत्यर्थेस्यानषष्ठ्यभावादजोंत्यस्येति परिभाषा न प्रवर्त्तते इति ज्ञाप्यते इति समाधानयंथाशयः॥ अनंतरं किमेतस्य ज्ञापने
प्रयोजनमिति पृष्टे चकतुश्चिच्छादयिषति चेच्छिद्यते इत्येतेषु क्रमेण तुक्कृते नंसं वा कृत्यत्वेत्स गुणविधयो न प्राप्नुवंतीति प्रयोजनमु
पपाद्यनेनानित्यत्वेति प्रयोजनानि विप्रतिषेधेनाप्येतानि सिद्धानि तु क्रियतामेते विधय इति किमत्र कर्त्तव्यं परत्वादेते विधय इति तन्निरा
कृत्य कृत्यादीनामभ्याससंज्ञासापेक्षत्वेन बहिरंगत्वात्तु कश्च वर्णाश्रयत्वेनांतरंगत्वादयुक्तोयं विप्रतिषेध इत्याशयेन तदंतग्र
हणात् अर्थवानेवं विज्ञायते अभ्यासस्याजंतस्य ऋकारांतस्यादंतस्येगंतस्येति॥ कथं तर्हि अभ्यासे योचू अभ्यासे य ऋकारः अभ्यासे
योऽकारः अभ्यासे य इगिती निपक्षांतरमाश्रित्य तन्निराकृतं भाष्यकृता॥ अवतारितं चैतज्ज्ञाप्यं तु कोंतरंगत्वेन विप्रतिषेधात्सिद्धमित्य
युक्तं कृत्यादीनामांगत्वेन बहिरंगत्वादित्याशयेन तदंतग्रहणाद्धेति वार्त्तिकं॥ तद्व्याचष्टे भाष्यकारः॥ अर्थवानेवेति निविपरण कृतान
भावे तदाशायक भाष्यविवरणानुरोधेन संज्ञानिमित्तकबहिरंगत्वमभ्युपेयते तदनाश्रयणमयुक्तमिति चेन्नाता द्व्याभाष्याशय

चिन्० कविधरणस्य कैयटानुरोधित्वेनासाधकत्वात्। परत्वादेते विधय इति प्रतीकमुपादाय न ह्येते ष्व उदाहरणेषु तु गंतरंगः प्रसमविगोषनिमि
५३ त्तकत्वादभ्यासस्याभ्यासाश्रयत्वात् तु कृरुस्वत्वादीनामिति तत्रस्सः कैयटः। स च नन्वंतरंगस्य तु कौ बहिरंगरुस्वादीनां च विप्र
तिषेधोऽयुक्त इत्यत आह न ह्येते द्विती स्यवनारितस्तदनुरोधेनैव विवरणं कृतम्। अनंतरंगत्वं तु णिविभाव अभ्यासस्यानाश्रयणेऽपि प्र
कृतलक्ष्येऽभ्याससापेक्षत्वं तु क इति निदानमनुपपाद्य तदनाश्रयणेन भाष्यं तदनुरोधेनैव न तथा च नारितं विवरणं कृतमिति न त
द्विरोधमावहति तस्मान्नत्वं संज्ञाकृतबहिरंगत्वाश्रयणे साधकं। भाष्ये तु संज्ञाकृतं बहिरंगत्वं नाश्रितमत इति अनुत्वासमाधा
नाय पक्षांतराश्रयणमुपायांतराभिप्रायेण तु यत्तु दुर्जनन्यायेन। रुस्वत्वात्वे गुणविषये तु कौ निमित्ते न विप्रतिषेधासंभवाद्वि
तिबोध्यं। कुत्रचिदिदं ज्ञानीयत्रोत्वरोपि कैयटानुसारिसूत्रयंथानुसारेण बोध्यः। यथा रुत्वः। एइ रुत्वाल्वंबुद्धेः। उरत् परत्वादि
त्यादित्सूत्रे। इदानीं येन विधिरिति सूत्रस्थकैयटोक्तं न त्विसादिना यं क्षपरिहरति। नेत्यादिना। तत्र तावत् गुणस्य कैयटोक्तबहिरंगत्वे ५३

मासाय भाष्यासंगतिमापादयति। तदंतविधावपीति। यदि हि कैयटोक्तविधया गुणस्य बहिरंगत्वं स्यात्तदा तस्यापि तदंतविधौ तद्वि
त्तायगादेशापेक्षया गुणस्य बहिरंगत्वात् क्षेत्ते स्यवगादेशो न तथा धासंभवात्तज्ज्ञाप्यमसंगतं स्यादिति भावः। नन्वेवमपि शब्द
निमित्तकांतरंगबहिरंगभावे संभवति न संज्ञाकृतः स आश्रयणीयः शब्दशास्त्रे शब्दस्य प्राधान्यादिति न तन्मतेपि भाष्यासं
गतिः। ऊङ्गुणयोस्तु शब्दरूपनिमित्तस्याभ्यां न तत्कृतांतरंगबहिरंगभावासंभवात्तदृगेवांगीकृत इत्यरुचेराह। बहिरंगेति। न
नु परिभाषास्यांतर्बहिःशब्दयोरप्याधिकार्थत्वमादाय शब्दमर्यादयैव तादृशार्थो लभ्यत इत्यत आह। तथा सतीति। अच्कृमा
र्थकस्य नापेक्षया स्वकृतार्थस्यैव माप्यत्वादिति भावः। ननु यथांगशब्दस्यापि निमित्तार्थकत्वमस्त्वनमेवांगीक्रियते तथैवाल्कृतो
पि सोऽर्थो गृह्यते। न च लक्ष्यानुरोधादंगशब्दस्य तदर्थकत्वकल्पनं युक्तमिति वाच्यं। लक्ष्यानुरोधस्योभयत्रापि तुल्यत्वादित्यत आह।
अत एवेति। अंतरंगं चांतरंगं बलीयो भवतीति वक्तव्यमिति सूत्रवाचा किं प्रयोजनमिति पृष्ठे यणो कादेशो वो त्वनिगुणवृद्धिद्विर्वचना

चित्० धोपस्त्वरित्याइत्विसामान्यतउपपाद्यगुणाभेष्ठयायणादेशस्यांतरंगत्वेकिमुदाहरणमितिविशेषाकांक्षायांगुणाद्यणादेशः स्योनः स्यो
५४ नेत्युक्तं। यदिपरिभाषायाः पूर्वोक्तार्थः स्यात्तर्हिगुणाद्दृढंतरंगइत्यपिवक्तव्यं। तस्यचानुक्त्याभाष्यकाराणांनायमर्थोऽभिमतइत्यव
गम्यतइतिभावः। ननुप्रकृतसूत्रेभाष्येऽन्तरंगंचेत्यस्यप्रयोजनपेटिकायांगुणाद्दृढंतरंगत्वादित्यस्यानुक्तिमात्रेणनायमर्थः परिभाषा
र्थोनभवतीतिकथमित्यतआह। मयुक्तं। उदाहरणानुदाहरणमात्रस्यार्थसाधकत्वतदसाधकत्वाभावात्। उपलक्षणतयापितदुक्तिसंभवाच्च। अत्र
नएवश्चैवेतिवार्त्तिकेऽन्तरंगशास्त्रविषयकपूर्वविप्रतिषेधस्यप्रियक्रोष्टुनेश्वारंण्यायेतिभाष्योदाहरणमात्रान्नैकस्मिन्नंतरंगशास्त्राप
मात्रविषयकत्वमित्यतआह। प्राथम्यादिति। तदंतरान्तदसंभवादितिभावः। एवंतर्हिप्रकृतपरिभाषायावाद्यशार्थानंगीकारेऽस्यंभा
व्यसंक्षयंनवेद्वृद्धौतरंगत्वाभावेपरत्वाद्गुणापत्तिरतआह। किंचेति। येनविधिस्तदंतस्येतिसूत्रेस्योनेत्यस्यव्याख्यानावसरेउपसंहारे
यदिचैकोयणश्चीसत्रतदादितदंतविधीस्यातांतदायणादेशस्यांतरंगाभावात्परत्वाद्गुणः स्यादितिकैयटोक्तिन्नन्वयखंडयतीत्यर्थःसा ५४

दिना। गोधेरइत्यादौबहिरंगपरिभाषयाएयादेशस्यासिद्धत्वाद्धोपोव्योर्वलीतिलोपोनस्यादतस्तत्सिध्यर्थंवलिलोपेंऽतरंगपरिभाषा
नप्रवर्ततइतिस्वीकारात्स्योनइत्यादावपितल्लोपविषयतायाः सत्वादंतरंगपरिभाषायाअप्रवृत्तेः कैयटोक्तिश्चिंत्येतिकेषांचिदुक्तिंलो
पोव्योर्वलीतिसूत्रस्थभाष्यविरोधेनखंडयति। वलिलोपइत्यादिना। गोधेरइत्यादौवलिलोपस्यएयादेशंप्रत्यंतरंगत्वंबहिरंगत्वंचास्त्येव
वलिलोपेंऽतरंगपरिभाषानप्रवर्ततइत्युक्त्वारोतिः स्योनइत्यत्रकैयटेनऊठ्गुणयोरंतरंगबहिरंगभावस्योपपादितत्वान्नह्यूठ्वलिलोप
योरितिग्रंथमात्रसंभवतीतितादृशाशंकायांकैयटोक्तिखंडनंनिर्युक्तिकमितिसूचयन्नाह। नयुक्तमिति। वलिलोपेंऽतरंगपरिभाषायाअ
प्रवृत्तौभाष्यविरोधमुद्भावयति। तत्सूत्रस्थेति। ननुनलोपः सुप्स्वरेतिसूत्रेभसंज्ञाविधौकिमुदाहरणमितिशंकायांचस्येतिप्रयोजनमु
पपादयताकृतायांबहुसंज्ञायांजश्शसोर्लुकिकृतेचाहत्यलुकिपदसंज्ञानचपदसंज्ञायामकृतायांनलोपः प्राप्नोतीतितदेतदानुपूर्व्यासिद्धं
भवतीत्युक्तंभाष्यकृता। तद्व्याख्यावसरेअत्रान्येआहुः। स्त्रीसमानाधिकरणपक्षः स्त्रियामितिसूत्रेनाश्रितः किंतुप्रकृत्यर्थविशेषणप

चि॰ अत एवेति पंचाद्यानामर्थलिंगत्वात्तल्लीप्रसमस्य प्राप्तिरेव नास्तीति नार्थस्तन्निषेधेनेत्युक्त्वाः थापि तत्प्राप्तिः स्यात्तथापि न लोपस्य बहिरंग
५५ त्वादंतरंगे टापि कर्तव्ये असिद्धत्वान्नास्ति टाप्प्राप्तिः सत्यामपि टाप्प्राप्त्यामंतरंगायां बहुसंज्ञायां न लोपस्यासिद्धत्वात्सिद्ध एव तत्प्रतिबं
धइति कैयटोक्तिं यत्विस्मारादिना नूपस्वं दूषयति। तच्चिंत्यमिति। अत एवेति। नलोपे संज्ञा कृतन बहिरंगत्वस्य नाश्रयणादेवेत्यर्थः। न मानमिति।
अस्यात्रेति शेषः। अन्यथा यथाश्रुतस्वीकारेण तत्र परिभाषाज्ञापनपरभाष्यविरोधः स्यादिति भावः। न च ज्ञापनपरभाष्यप्रामाण्यात्
र्वत्र परंपरयापि बहिरंगत्वं सतिसंभवे आश्रयणीयमिति वाच्यं। नलुमतेति सूत्रे च अश्वेत्युदाहरणपरभाष्यप्रामाण्येनांगवृत्तस्कंपारंप
र्याश्रयणे मानाभावात् ज्ञापकपरभाष्यस्य विशेषविषयत्वाच्च ध्वनितं चेदमिति। तत्र हि तुग्विधौ किमुदाहरणं विवृश्च इत्यादेर्वृश्चः इति। नलो
पे कृते हृस्वस्य पिति कृति तुगसिद्धत्वान्न प्राप्नोतीत्युक्त्वा तद्विधौ चोक्तं किमुक्तं संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति तत्प्रयोज
नं निराकुर्वता भाष्यकारेण परंपरया निमित्तत्वमादाय बहिरंगत्वं नास्तीति ध्वनितं। अन्यथा तेनैव सिद्धे संनिपातपरिभाषया तन्निराकर ५५

णं व्यर्थं स्यात्। पदार्थमुक्त्वा वाक्यार्थमाह। अंतरंगेति। नन्वेवं लोपो व्योरिति सूत्रेण अश्वादिषु वातिप्रसंगो भवति। इहापि प्राप्नोति अश्वनं ओह
यः अग्नेंद्रनीत्या शंक्योपदेशसामर्थ्याद्वृश्च्यादिषु लोपो न भवतीति समाधाय। अस्मिन्नुपदेशे प्रयोजनं संप्रसारणकृतादिशेषेषु कृतेषु च
कारश्रवणं स्यात् वृक्णवृक्णवान्वृश्चतीति चारितार्थ्योपपादनेन तत्सामर्थ्यविघटनाशंकायां न वा बहिरंगलक्षणत्वादिति समाधिं भा
ष्यकृतानभ्युपविरुध्येत जातस्य तत्कालप्राप्तिकस्य चाभावात्। उपदेशावस्थायामेव तत्सत्त्वं कैरत आह। वृश्च्यादिष्विति। एतेनेति। पूर्वोक्तार्थ
प्रतिपादनेनानन्यथार्थद्वयस्य कोटीकारेणेत्यर्थः। न तु नानयार्थद्वयस्य कोटीकारः संभावयितुं शक्यः भूम्यनुसारेण अंतरंगे कर्तव्ये जातत्व ब
हिरंगमसिद्धमिति संस्पेवलाभादित्यत आह। एनामिति। इयं कार्यकालपक्षेपि त्रिपाद्यां न प्रवर्तते इति स्वसिद्धांतव्यवस्थापनाया स्याउप
देशांश्चाह। सपादसप्ताध्यायस्थेति। विपक्षे बाधकं दर्शयन् ज्ञापकमुपपादयति। अन्यथेति। ननु तदनभिधाने पि वार्षूहेत्यादि सिद्ध
यं ऊठग्रहणमावश्यकमेवेत्यत आह। ऊठ इति। छिपातीति। नन्वेवमप्यर्थासंगतिरित्यत आह। धातूनामिति। ननु प्रौढ इत्यादिनामप्येवमेव सि

चि॰र॰ द्धिः कुतो नेत्यत आह। असाधुत्वेति। नन्वत्र प्राप्ते हि तिपा त्रिकोक्तवृद्धिर्दुर्वारैवेत्यत आह। अस्येति। तस्याः प्रकार इति त्रिप इत्यस्यार्थः। अनर्थ

५६ क्यादिति। एतं तस्येवार्थवत्त्वमिति भावः। ननु यथोद्देशपक्षे तत्प्रवृत्तसभावेपि कार्यकालपक्षे स्ववृत्तिलिंगाचिद्धित्वपरिभाषायास्त्रिपादस्यसिद्धत्वे

पात्तस्य च निरस्तत्वे तत्किं परसिद्धांतेनेत्यत आदिना शंकां परिहरति। पूर्वं प्रतीति। किंचेति। यथासत्प्रतिपक्षस्थले परस्परं प्रतिबंधप्रतिबं

धकभावादुभयहेतुकानुमितिर्न भवति तथात्रापि तथाविधयोरप्रवृत्तिर्वाच्या न सा युक्ता। सत्प्रतिपक्षस्थले उभयोर्हेत्वोः समत्वा

त्तथाकल्पनेपि प्रकृते पूर्वत्रेति सूत्रस्य बहिरंगपरिभाषायाश्च क्रमेण प्रत्यक्षसिद्धत्वादानुमानिकत्वाच्चातुल्यबलत्वेन तथा पादनस्यादुर्घ

टत्वादिति भावः। उपसंहरति। अत इति। ननु खरवसानयोरिति सूत्रे भाष्ये विसर्जनीयोनुत्तरपदे इति वक्तव्यं। इहमा भूत्। नार्कुटो नार्पत्यः। न

नह्ययं वक्तव्यं विसर्जनीयोनुत्तरपदे इति। न वा बहिरंगलक्षणत्वात्। अंतरंगो रेफो बहिरंगो विसर्जनीयः। असिद्धं बहिरंगमंतरंग इत्युक्तत्रि

पाद्यामप्यंतरंगपरिभाषासंचारस्य स्पष्टमुक्तत्वेन प्रत्यक्षसिद्धस्यापि शास्त्रस्यापूर्ववचनविरहसंकुचत्वलक्षसिद्धिसंपादकत्वेन बलवत्वा ५६

दनुमानिकत्वात्यंतरंगपरिभाषया बाधइत्यभिमतं भाष्यकृतामतः कार्यकालपक्षेपि त्रिपाद्यामस्या अनुपस्थितिरेवेत्ययुक्तमित्यत आह। अ

तएवेति। अत यथापि त्रिपाद्यामेतदनुपस्थितिरेवेत्यर्थः। सिद्धांतिनेति। पूर्वपक्षिणा तथोक्तत्वेप्यग्रे गत्या सिद्धांतिना मदुक्तार्थस्यैव प्रतिपाद

नात्सत्त्वेपि त्रिपाद्यामेतदनुपस्थितिरेवेति भावः। वचनमिति। विसर्जनीयोनुत्तरपदे इति पूर्वोक्तमित्यर्थः। तदर्थस्तु उत्तरपदनिमित्त

करेफस्य न विसर्ग इति। सर्पिष्पात्रमित्यादावुत्तरपदत्वाभावादेव न दोषः। दास्याःपुत्र इत्यलुक्समासेनुपुत्रस्योत्तरपदत्वेपि न रेफ

स्तन्निमित्तकः किंतु पदनिमित्तकः। नार्कुटादौ तु उकारस्य तद्धितकृद्वृद्ध्यावयवत्वापेक्षणेन च कुटावयवत्वापेक्षयैवेति रेफ उत्तरपदनिमित्त

क इति बोध्यं। येपाति। क्रियरादयः। विसर्जनीयस्यसत्रोपेक्ष्यैनयपरानुलक्ष्यदर्शनवशाद्बहिरंगपरिभाषाश्रीयते यथा रामस्तिष्ठतीत्यादौ

रुत्वविसर्गसत्वानां च क्रमेणेस्तो व्यवस्था। तदयुक्तपरिहारो न वा बहिरंगलक्षणत्वादित्युक्तं। लक्षणैकचक्षुर्भिरिति। ननु भाष्यकारस्य

लक्ष्यचक्षुष्कत्वेन तन्मते युक्तस्तथा परिहार इति चेन्न। नास्त्येवाकर्तव्यमितिपंक्तिविंशतिस्तत्रत्यभाष्येण लक्ष्यानुरोधस्य सर्वत्राप्रयोज

चित्०

५७ कत्वेबाधनात्।अत्रतुभगवतावार्त्तिककारेणैवानुगमस्यकृतत्वाच्चेतिभावः।यस्तुतस्तुसमासेनत्रपूर्वोक्तेर्नविवितिस्तत्रस्यप्रसययह
णकद्रहणविषयकभाष्यवशात्रापिकार्यकालपक्षेस्वरवसानयोरितिस्त्रैकवाक्यतयापूर्वत्रासिद्धमित्येतदपेक्षयापरत्वाद्विप्रति
परमितिव्यवस्था।नचपूर्वत्रासिद्धेनास्तिविप्रतिषेधइतिवाच्यं।पूर्वत्रासिद्धमित्यनेनस्वेतरपूर्वापेक्षयास्वेतरपरस्यासिद्धत्वप्रति
पादनेपिस्वापेक्षयापरस्यपूर्वापेक्षयास्वस्यासिद्धत्वप्रतिपादनेआत्माश्रयान्मानाभावाच्च।तुल्यास्यप्रयत्नमित्यादौनुलोकसिद्ध
स्वघटपदार्थबोधमात्रेणवाक्यार्थबुद्धौनस्वापेक्षा।नेहनानास्तिकिंचनेत्यादौचसर्वमिथ्यात्वप्रतिपादनान्यथानुपपत्त्यास्वत्वमिथ्या
त्वप्रतिपादनेपिनदोषः।अन्यथास्वातिरिक्तत्वेनश्रुतिःसंकोचनीयास्यात्।संकोचेचप्रमाणाभावः।नैवंतथाविधान्यथानुपप
त्तिरत्रास्ति।किंचश्रुत्यनुग्राहकदृश्यत्वेनहेतुनामिथ्यात्वंसाधयतोदृश्यत्वविशेषाच्छ्रुतेरपिमिथ्यात्वेबाधकाभावान्नकिंचिदत्र
वक्तव्यमस्ति।इमामेवपरबाह्यवस्थांमनसिनिधायकुतोनुखल्वेतदित्याद्युक्ताः।ततःकिमितिपृष्टेअतःयुक्तःपरिहारोनवाबाधि ५७

तंगजश्रण।त्वादित्याद्युक्तं।अतइत्यस्यपरत्वादित्यर्थः।अयुक्तइतियदुक्तंतत्तुप्रमाणाभावमात्रहतः।प्रत्यक्षसिद्धत्वात्तस्यानुमा
निकवचनेनबाधोनन्याय्यइतितुनयुक्तं।नहिप्रत्यक्षसिद्धत्वाच्छ्रौत्रेणबाधेपिकृत्स्नवचनेनैवोपपत्तौऔदुंबरीन्यायेनतत्परित्यागवच
नांतरमपिन्याय्यं।शिष्टाकोपेविरुद्धमितिन्यायेनानुमानिकवचनस्यबलवत्त्वस्फुरितयौदुंबरीन्यायावतारात्प्रत्यक्षसिद्धस्या
प्यानुमानिकेनवचनेनबाधस्यन्याय्यत्वात्।स्पष्टश्चायंन्यायःप्रथमाध्यायतृतीयपादेपूर्वमीमांसायां।तत्रहि।आचांतेनकर्त्तव्य
मितिस्मृत्युक्ताचमनादयःपदार्थावेदंकृत्वावेदिंकरोतीत्यादिश्रुत्युक्तक्रमादिभिर्बाध्यंतेनवेतिविचारेप्रसक्तेप्रमाणबलाबलविचा
रेप्रक्रियमाणेश्रुतिरूपप्रमाणस्यनिरपेक्षत्वेनसापेक्षस्मृत्यपेक्षयाबलवत्त्वेनश्रुत्युक्तक्रमादिभिःस्मृत्युक्ताचमनादयोबाध्यंतां
इतिप्राप्तेप्रमाणबलाबलात्प्रमेयबलाबलस्यन्याय्यत्वात्प्रमेयबलाबलविचारेस्मृत्युक्ताचमनादीनांस्वयंपदार्थभूतत्वात्पदार्थ
धर्मरूपश्रुत्युक्तक्रमाद्यपेक्षयाबलवत्त्वेनसापेक्षायाअपिस्मृतेर्बलवत्त्वंप्रमेयभूतपदार्थाश्रितत्वेनबलवत्त्वान्निरपेक्षायाअपि

चि० श्रुतेश्च दुर्बलपदार्थधर्मकमाद्याश्रितत्वेन दुर्बलत्वान्न स्मृत्युक्ताचमनादीनां श्रुत्युक्तक्रमादिभिर्बाधः किंतु स्मृत्युक्ताचमनादि
५८ भिरेव श्रुत्युक्तक्रमादिबाध इति सिद्धांतः ॥ शिष्टाकोपेविरुद्धमिति त्वधिकरणपूर्वपक्षसूत्रं। तदर्थस्तु शिष्टायाः श्रुतेरकोपे अविरो
धे विरुद्धस्मृत्युक्तमाचमनादिकं कर्त्तव्यमिति। एवं प्रकृतेप्यपूर्ववचनविरहकल्पनात्त्वेमात्रायत्तबलवल्लक्ष्याश्रितत्वेनानुमा
निकस्यापि वचनस्यापूर्ववचनसहकारेण सिद्धत्वाद्दुर्बललक्ष्याश्रितत्वेन दुर्बलमस्यलक्ष्यसिद्ध्यास्त्रापेक्षया बलवत्त्वं बोध्यं। एवं
च त्रिपाद्यामप्यस्याः प्रवृत्तिरारूढैव कार्यकालपक्षेऽस्त्येवेति सिद्धांतः। अन्यथास्तं योगांतस्त्वत्रस्थं बहिरंगलक्षणत्वादिति वार्त्तिकं न
ज्ञाप्यं चाथमादुपधायाश्चेति सूत्रेण मतोपसंख्यानार्थं तद्धसूत्रवक्तव्यावृत्त्यर्थं नार्थं तेप्रतिषेध इति वार्त्तिकमप्यसांख्यानायनार्थं तेषु
क्तं न वा बहिरंगलक्षणत्वादिति भाष्यं। तथा रदाभ्यामिति सूत्रे वृद्धिनिमित्तात्प्रतिषेध इति वार्त्तिकप्रयोजनस्य कार्त्तिरित्यादेरन्यथा
सिद्ध्यर्थं न वा बहिरंगलक्षणत्वादिति भाष्यं तथैवाट्कुप्वाङिति सूत्रे ऋकारात्परस्य नकारणत्वार्थं क्षुभ्नादिषु नृनमनशब्दपाठो ५८

ज्ञापक इत्युक्त्वाऽनंतरंगानामनिमित्तसप्तम्यर्थं तस्याऽस्य चारितार्थ्यात्संकार्यां बहिरंगा वृद्धिरंतरंगं च णत्वं असिद्धं बहिरंगमंतरंगे इति
समाधानपरं भाष्यमित्येतद्भाष्यचतुष्टयमयुक्तं स्यादित्यत्वं पक्षेन्वयितेनाद्यं चेत्सारभ्यादिगित्यं तेन ग्रंथेन कैयटाद्युक्तिरखंडनपूर्व
कं स्वसिद्धांतमुक्त्वा संप्रतिप्रकृतपरिभाषायाजातं तत्कालप्राप्तं चेत्समर्थद्वयं कृतं तत्राद्यार्थस्य ज्ञापकभूम्यनुसारेण सिद्धत्वेपि
द्वितीयार्थकल्पने किं प्रमाणमित्याकांक्षायामाह। अत एवेति। तत्कालप्राप्तिकं चेत्यर्थांगीकारादेवेत्यर्थः। अन्यथा धातूपसर्ग
संबंधिकार्यत्वेन गुणस्यांतरंगत्वेपि प्रकृतपरिभाषायाः समकालप्राप्तबहिरंगविषयत्वे प्रवृत्त्यापरत्वाद्दीर्घेऽनंतरं गुणे च रूपवद्ढे
ढ इत्यादीनामसिद्ध्यापाङ्ग्रहणं व्यर्थं स्यादिति भावः। आङ्ग्रहणस्य प्रकृतार्थज्ञापकत्वे प्रमाणमाह। संप्रसारणाच्चेति। धर्मिकल्प
नापेक्षया धर्मकल्पनाया ज्यायस्त्वान्न तद्भाष्यं वचनांतरज्ञापकपरमिति भावः। यत्तु संप्रसारणाच्चेति सूत्रे भाष्ये आङि पररूप
वचनं तु ज्ञापकमंतरंगबलीयस्त्वस्य। एतज्ज्ञापयत्याचार्योऽन्तरंगं बलीयो भवतीत्युक्तं न ह्येतद्भाष्यस्वारस्याल्लोके कार्यप्रतीतिरपि

चिन्० त्तुवचनांतरेणैव ज्ञापितमिति प्रतीयते। अत एव किमेतस्य ज्ञापने प्रयोजनमिति पृष्टे ग्ना। अन्यथा पूर्वत्रैसारो अग्नि औ अत्रेति
५९ वाक्यसंस्कारपक्षे यणा यादेशो बाधितांतरंगत्वात् पूर्वसवर्णदीर्घ इत्यादीनि प्रयोजनान्युपपाद्य तानि विप्रतिषेधेन निराकृत्य इ
दं तर्हि प्रयोजनं वृक्षाः अत्र प्लक्षाः अत्र पूर्वसवर्णश्च प्राप्नोति बहिरंगलक्षणश्च विकारः अतो रोरप्लुतादप्लुते इत्युत्वं पूर्वसवर्णो कं
भवत्यंतरंगत इत्युक्त्वा न वाच्यमिदमेव प्रयोजनं आद्ययोगे बहूनि प्रयोजनानि संति तदर्थमेषा कर्त्तव्या इत्युक्तिः संगच्छते।
अन्यथा तज्ज्ञापितस्य परिभाषात्वेन अचकारस्यासंगत्यापत्तेः। नाप्यूठ्ग्रहणज्ञापित एवानेन ज्ञाप्यते। ज्ञापकांतरवैयर्थ्याप
त्तेः। तस्मान्मूलोक्तं न साधीयति भाष्यानाम् इति केचित्तन्न। उभे तर्हि कर्त्तव्ये नेत्याह। अनयैव सिद्धमिदमपि स्यात् नस्यां नेति। बहिरं
गलक्षणस्यासिद्धत्वादंतरंगो यणादेशो भवतीति वचनांतरमस्या व्याख्यानपरं विप्रतिषेधसूत्रस्थभाष्यविरोधात् संप्रसारणाच्चे
तिसूत्रस्थभाष्यस्य क्लृप्तवचनपरतयैव व्याख्येयत्वाच्च। अन्यथांतरंगबलीयस्त्वमनादृत्य बहिरंगासिद्धत्वेनैव वार्त्तिकोक्तप्रयोज ५९

नानां निर्वाहकरणं भाष्यकृतामनुपपन्नं स्यात्। नन्वेवं ज्ञापकांतरवर्णनं वैयर्थ्यमिति वाच्यं। ऊठ्ग्रहणज्ञापितवचनस्य ज्ञापकभूम्
नुसारेण जातबहिरंगस्थलेष्वप्रवृत्तिरिति भ्रमवारणाय तद्वर्णनस्य सार्थक्यात्। न चात्रानेकप्रकरणव्यवहितयोस्तयोरेकवाक्य
तान संभवतीति वाच्यं। एकार्थत्वादेकवाक्यतेति न्यायात्। अत एव कृत्प्रातिपदिकादिति सूत्रे कथं पुनरिहोऽसमानाः स्वाद्य एकारिष्व
र्थेषु व्याख्यायि ज्ञानुमिसाक्षिप्य। एकवाक्यत्वादेकवाक्यं तच्चेदं चेति परिहृत्य यद्येकं वाक्यं तच्चेदं तर्हि किमर्थं नानादेशस्थं क्रियते इत्याक्षि
प्य कीलालमात्रं मतदाचार्यो दर्शयति यदेकं वाक्यं नानादेशस्थं करोतीति समाहितं भाष्यकृता। तथा चानेन भाष्येणानेकप्रकरणव्यवहिता
नामपि कर्मणि द्वितीये स्वादीनां स्वादिविधायकवाक्यैनैकवाक्यता समर्थनं संगच्छते इति दिक्। ननु च मत्रस्थितस्य एह। सस्यानुकरणे
हे त्रियएहीस्य यमाह स्वर्थबोधनाय शिवइत्यनेन संबंधप्रकृतिवदनुकरणं भवतीति संतवत्त्वाचेनाङ्वमादाय ओमाङोश्चेति पररूपा
र्थमाङ्ग्रहणं चरितार्थं। तत्र धातूपसर्गनिमित्तककार्याभावेनांतरंगपरिभाषाया असंचारादित्यत आह। एह्रीस्यनुकरणस्येति। एह।

चि॰ तेवं यत्तस्येकमनुकरणं तस्येत्यर्थः। नं चैवं ह्यस्यानुकरणां यथेति ङं नायपनस्य एडित्यनेनस्येदमनुकरणमिति बोधनाय तत्सार्थक्यात्। ए
६० तेन एहीति समुदितमनुकरणमिति स्वीकुर्वन्ति सांस्य तत्रैकदेशानिष्टत्वेपि समुदायानिष्टत्वेन प्रकृत्यर्थत्वधर्मत्वात्स्वरूपस्याङ्मात्रत्वा
र्थत्वाद्यत्रातिदेशस्येवासंभवः। तथा सति एहीत्यनुकरणस्येत्यादि ग्रंथः प्राचामनुरोधेनेति बोध्यमित्याहुः। अनुकार्येकत्वाभावेनाङ्
त्वस्य तत्रातिदेष्टुमशक्यत्वेनासंगतोयं ग्रंथ इत्यपि केचित्तत्परास्तं। नन्वेवमपि तत्कालप्राप्तिकं चेत्यर्थे ज्ञापकत्वमाङ्ग्रहणस्य न संभ
वति सुट्कात्पूर्वइति सूत्रस्थभाष्यविरोधात्। तत्र हि पदद्वयाश्रितत्वेन सुटो बहिरंगत्वमाशय तस्यासिद्धत्वात् संचस्करतुः संचस्क
रुरित्यत्र गुणो न स्यात् समचस्करदित्यत्र च दीर्घो लघोरिति स्यादतस्तन्निवृत्त्यर्थमुपदेशिवद्वचनं कर्तव्यमित्यापाद्य गुणार्थेन तावत्
न्नार्थः। वक्ष्यते न ह्यसंयोगादेर्गुणविधौ न संयोगोपधग्रहणं कृत्रिमार्थं चङ्दीर्घप्रतिषेधार्थेनापि नार्थः। पदमित्ययं भगवतः कृत्रिमा
संज्ञायुक्तमिह दर्शयति किमंतरंगं किं बहिरंगं। धातूपसर्गयोर्यत्कार्यं तदंतरंगं। कुतएतत्। पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन ६०

इत्युपदेशिवद्भावस्य प्रयोजनद्वयं निराकृतं। पूर्वप्रयोजननिराकरणभाष्यस्य सामर्थ्याद्बहिरंगासिद्धत्वबाधः। उत्तरप्रयोजननिराक
रणपरस्य त्वयमाशयः। धातूपसर्गसंबंधस्यांतरंगत्वेनानुत्पन्ने बहिरंगे भवति बाह्ये धातूपसर्गसंबंधे सुटा भवितव्यमिति तस्य पदद्वया
श्रितत्वाभावेन बहिरंगत्वं नास्तीति। भाष्ये कृत्रिमसंज्ञेत्यस्य सुप्तिङन्तं पदमित्यर्थः। सा चैवं समित्यस्यैव न धातुमात्रस्य। तथा चैतन्न्यायानु
रोधेन तिङ्युत्पत्तेः प्राक् धातूपसर्गसंबंधे तत्काले च गुणादेशोः नंतरं तिङ्युत्पत्त्यापदांतरसंबंधेप्यभ्यरद्धिवारणार्थत्वेनाङ्ग्रहणस्य
चारितार्थ्यान्न तस्य तत्कालप्राप्तिकांतरंगासिद्धत्वरूपार्थसाधकत्वं तत्र शब्दोक्तविधयासमकालप्राप्तेरभावात्। अतएव सकर्मकात्कर्म
णि लकारेपि सिध्यति। सात्रायकं केषांचित् भ्रमं यच्चिस्यादिनात्रपसमनंतरोक्तभाष्यादुक्तरेणानेन तत्सारमित्यादि सिद्धांतभाष्येण दूषय
ति। तन्नेति। पश्चादिति। प्रायो कुत्स्नथा बोधेपीति शेषः। नन्वेवं संचस्कार समस्करोत् समस्काषीत् इत्यादिसिद्धये सुट्कात्पूर्वः। अड्भ्या
सव्यवायेपीति वक्तव्यं स्यात् पूर्वं धातूपसर्गसंबंधस्तेतन्न वक्तव्यं भवतीति लाघवं। तथा चैनेन तत्सारमिति भाष्यं संगोरनयस्त्वेन सिद्धं।

चित्० तिवाभावात्कथं तदनुरोधेन तन्नेसादिना खंडनं संभवतीत्यत आह। एवं चेति। उपसर्गद्योत्यार्थान्तरभावेन धातुनैव तदर्थाभिधा
११ नेच्चेत्यर्थः। तथा सति पूर्वोपस्थितान्तर्भूतार्थकनिमित्तकत्वेन सुटोऽन्तरंगत्वं बाह्यसाधनबोधकप्रत्ययनिमित्तकार्यत्वेन द्वित्वादेर्बहिरं
गत्वं। तथा चोपसर्गद्योत्यार्थान्तरभावेन विशिष्टधात्वर्थबुद्धौ कृत्वात्तत्र साधनसंबंधप्रयुक्तकार्ययोगेन साधनत्वायोगात् श्रौतत्वाधाय
क्रियायोगनिमित्तोपसर्गसंज्ञकत्वाद्धयोगे केवलोपसर्गयोगनिमित्तककार्यापेक्षया साधनसंबंधनिमित्तकं कार्यमन्तरंगमात्रं। सु
ट्त्वितरापेक्षया पूर्वोपस्थितसाधनसंबंधापेक्षयापि पूर्वोपस्थितिकत्वेनान्तरंगतरो योधात्वर्थान्तर्भूतार्थः सोऽर्थो यस्य तथाभूतोप
सर्गस्तन्निमित्तत्वादन्तरंगः। तस्मात्संस्कृतिः इत्यवस्थायां द्वित्वादिभ्यः प्रागेव तत्प्रवृत्तौ सुट्कात्पूर्व इत्यादिनवक्तव्यमिति भावः। एतेन
न संकु—शब्दे अयस्थिते एव सुट् भवतीति कैयटोक्तं न युक्तमिति ध्वनितं। साधनप्रत्ययोत्पत्तेः पूर्वमुपसर्गसंबंधाभावादन्तरंगतरा
र्थकोपसर्गनिमित्तकसुडागमस्य तदवस्थायामनुपपत्तिरिति बोध्यं। उक्तार्थमेव दृढीकर्तुमाह। अत एव चेति। अन्यथा पूर्वं धातूपस ११

र्गसंबंधे पुकः पूर्वमेवान्तरंगत्वात्तन्निमित्तकणत्वे यदागमेति परिभाषया भाष्यकृत्कृतसमाधानमुपपन्नं स्यादिति भावः। न च णत्वस्यै
पादिकत्वात्तस्यासत्त्वान्तरंगत्वे परिभाषाया अप्रवृत्त्या पूर्वमेव पुगागमे भाष्यस्यासामंजस्यान्न विरोधः। एकदेशिमताभिप्रायेणान्यथोक्ते
रदोषात्। इदानीं भाष्यसंमतिं वक्तुं तत्रसंमतिमपि सूचयति। अत एवेति। विपक्षे बाधहेतुमप्यनस्यैति। अन्यथेति। नन्वेवं साधननि
मित्तककार्यस्यान्तरंगत्वे उपसर्गनिमित्तककार्यस्यान्तरंगत्वं क्वापि न स्यादित्यत आह। यदीति। न ह्येवं सत्युपसर्गनिमित्तककार्यमा
त्रस्यान्तरंगत्वं नास्तीति नियमः किंतु केवलशब्दत उपसर्गनिमित्तकस्य तन्नेति। तथा च यत्रोपसर्गतदर्थे तूभयनिमित्तकं तद्विशिष्टोप
सर्गनिमित्तकत्वात्साधननिमित्तकार्यापेक्षयाप्यन्तरंगं यथा सुट्। यत्र केवलतादृशशब्दत उपसर्गनिमित्तकं न तदन्तरंगं यथा णत्वा
दि। अपि तु तत्र साधननिमित्तकमेवान्तरंगमिति विवेचनीयमिति भावः। न धातुलोप इति सूत्रस्थभाष्यसंमतिमाह। अत एवेति। वि
शिष्टोपसर्गनिमित्तकस्यासति कार्ये साधननिमित्तककार्यस्यैवान्तरंगत्वादित्यर्थः। बहिरंग इति। तत्रशब्दत उपसर्गस्य निमि

वि॰ नत्वेनांतरंगत्वासंभवादिति भावः। अयं च पूर्वोक्तातिरिक्तस्थले उपसर्गसंबंधापेक्षया पूर्वं साधनसंबंधे साधननिमित्तकमेव कार्य
६२ मंतरंगं। उपसर्गसंबंधस्तु साधनसंबंधोत्तरमेवेति नियम इति सिद्धं भवति। विपक्षे उपपदमतिङिति सूत्रस्थभाष्योक्तं बाधकमु
पन्यस्यति। किं चेति। तत्र हि। एवं तर्हि सिद्धे सति यदतिङिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो नित्यं सुप् सुपेति ज्ञापनांतरं। किमेतस्य
ज्ञापने प्रयोजनं गतिकारकोपपदानां मित्येषा परिभाषा न कर्तव्या भवति। सुत्त्वा युध्येतज्ज्ञाप्यते केनेदानीं। समासो भविष्यतीति प
ष्टे समर्थेन सुत्ता रिति यद्यप्येवं धातूपसर्गयोरपि संबंधः प्राप्नोति पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेनेत्यत्रांकांनेन तदस्ति पूर्वं
धातुः साधनेन युज्यते पश्चादुपसर्गेणेत्युक्तं। यद्यपि भाष्ये समासः प्राप्नोतीत्येवोक्तं तत्वेकस्वर्यादि तथापि यद्येवमिति प्रतीकमुपा
दाय नतत्रैकस्वर्यादिप्रसंग इति कैयटोक्तमेव तद्बोध्यं। भावार्थकप्रत्ययस्येति। पूर्वं धातुरिति भाष्ये साधनेत्युपलक्षणमिति नस
ग्नः। किमत्र प्रमाणमित्याकांक्षायामध्ययन इति निर्देशः प्रमाणमित्याह। अनतएवेति। नन्वेवमपि निर्देशस्यस्वज्ञानीयापेक्षत्वेन भा ६२

वकत्वेन तथादेशवारणं स्यान्नभावीतिङेते इत्यत आह। इदं चेति। वस्तुतस्तस्य विशेषापेक्षज्ञापकत्वेपि न दोष इति ध्वनयितुमाह। य
दीति। एतेन भावी तिङ्युपसर्गयोगोस्तीति ध्वनितं दोषाभावोपि ध्वनित एवेति बोध्यं। इदानीं। विशेषापेक्षमंतरंगं सामान्यापेक्षं बहि
रंगमिति प्राचीनोक्तपरिभाषैकांतरंगबहिरंगपदार्थं खंडयितुं तन्मतमनुवदति। यत्त्वित्यादिना। विशेषापेक्षं बहिरंगमित्यस्यायं
भावः। विशेषो व्याप्यधर्मस्तस्य व्यापकधर्माणां नांतरीयत्वेन तद्धर्मोपस्थितौ तदुपस्थितेरधिकनिमित्तापेक्षत्वं। यथा रुदादिभ्यः सार्वधा
तुक इत्यस्य धातुविहितप्रत्ययसंज्ञिकतिङ्तादेः सार्वधातुकसंज्ञाविधानाद्व्याप्यसार्वधातुकरूपधर्मोपस्थित्या प्रत्ययरूपव्यापकध
र्मस्याप्युपस्थितेरावश्यकत्वाद्रुदादित्वरूपविशेषोपस्थित्या तज्ज्ञानीयेव धातुत्वरूपसामान्यधर्मस्योपस्थितेरावश्यकत्वाच्च या पा॰ १
स्तु अपेक्षया अधिकधर्मनिमित्तत्वेन बहिरंगं। एतावता विशेषापेक्षं बहिरंगमिति फलितं। सामान्यापेक्षमंतरंगमित्यस्यायं भावः। सामा
न्यधर्मस्य व्यापकधर्मत्वेन तस्य व्याप्याधिकरणातिरिक्ताधिकरणत्वस्यापि सत्त्वात्तदुपस्थितौ व्याप्यधर्मस्यानियतत्वेनाल्पधर्मनिमि

चित्र० न्तकत्वाद्यास्तुद्वंतरंगः। एतेनात्मनिमित्तकमंतरंगमिति फलितं भवतीति। इदं च शाब्दमर्यादया न्यायविधांतरंगबहिरंगाख्याभाष्याकूतं खंडि

६२ तमपि यथाकथंचिदभ्युपेत्य खंडयति तन्नेति। ननु धातुत्वप्रसक्त्यत्वेन तदुभयज्ञानमंतरा सार्वधातुकज्ञानान्यथानुपपत्त्या सामान्यधर्म

स्य निमित्तत्वसंभवेन मानाभाव इत्ययुक्तमित्यत आह। भाष्य इति। यासुट्तु नित्यत्वाद्भवतीति तदाशयः। ननु मनुसूत्रे भाष्ये भाष्यकृतै

यतथाविधांतरंगबहिरंगभावस्याश्रयणात् भाष्य एवंविधेस्त्वायुक्तिरयुक्तेः सतो मनुसूत्रस्थं भाष्यं यत्त्वित्यादिनानुद्यतंस्यैकदेश्यु

क्तित्वेनासाधकत्वमित्याह। नैवेति। तत्र हेतुमाह। अपवादत्वाहानेरिति। एवंविधांतरंगत्वेपि तदपेक्षयापवादस्य बलीयस्त्वात्तेन वबा

धकत्वमक्षतमेवेति न तदपर्यंतरंगत्ववर्णनं युक्तमिति भावः। सामान्यापेक्षविशेषापेक्षरूपांतरंगबहिरंगभावसत्त्वेपि तमनादृत्य

को यणाचि अकः सवर्णे दीर्घ इत्यादावपवादत्वेन बाध्यबाधकभावदर्शनस्य हेतुत्वेनोपन्यासं करोति। अच्सामान्यापेक्षमिति। नन्व

पवादत्वमप्ययुक्तं पांचनापितिरित्यादौ सावकाशत्वोक्तेरित्यत आह। किंचेति। परत्वेनैवेति। एवमेव बाधसिद्धावंतरंगपर्यंतानु ६२

धावनं व्यर्थं स्यादिति भावः। नन्वेवमप्येतद्भाष्यस्यैकदेश्युक्तित्वं परत्वेनैव पूर्वोपस्थितेन बाधसिद्धौ तत्पर्यंतानुधावनं किमित्येतावं ते

यवाच्यं तन्न युक्तं। परापेक्षयांतरंगस्यान्यत्र बलवत्त्वप्रयोजकतायादृष्टत्वेन तथोक्तावपेक्षाभावात्। नहि परत्वांतरंगत्वे तदुभयस्यै

कत्र बलवत्त्वनियामकत्वेन दृष्टत्वे पूर्वोपस्थितिकत्वात्तदेव वक्तव्यं नान्यत्र बलवत्त्वेन दृष्टत्वादंतरंगत्वमिति कुलधर्मोस्ति। अत एवेत

दभ्युपेत्यैव यदि तर्ह्यतिप्रसंगाः स्युरिति तद्द्विधा वस्तिग्रहणं क्रियते बहुश्रीहावप्यस्तिग्रहणं क्रियते। अस्तियुक्तायां थास्यादनंतरास्ति

कान्मा भूदित्युक्तं। तस्माद्यत्किंचिदेतदित्यरुचेराह। किंचेति। एवमप्यस्माद्भाष्यादधिकापेक्षमंतरंगमित्येवायातीति न केवलं विशेषापेक्ष

मित्येतद्भाष्यारूढं। तच्च दूषितं प्रागस्माभिः। विशेषापेक्षस्यापि भाष्यानारूढत्वमेव साधयति। अत एवेति। ननु भवदनभिमतार्थक

तबहिरंगत्वाश्रयणादेवेतद्भाष्यमयुक्तमिति तटस्थाशंकां न चेत्यादिना शंक्य परिहरति। एकदेश्युक्तित्वेनेति। अत एवेति। अर्थकृत

बहिरंगत्वानाश्रयणादेवेत्यर्थः। स्वाभिमतार्थं द्रढयति। अत एवेति। तत्र संमतिमाह। भाष्ये कैयटयोरिति। तत्र हि निर्दिश्यमानपरि

चि० भाषाप्रयोजनावसरे ऋरुदितामित्यत्रो इयिकृते स्येड्कस्य तां तंतामादेशाः प्राप्नुवंति निर्दिश्यमानस्यादेशा भवंतीति न दोष इत्युक्त्वा इद
६७ मिह संप्रधार्यमिट् क्रियतां तां तंतामइति किमत्र कर्त्तव्यं परत्वादिडागम इत्युक्तेंतरंगत्वात्तामादय इत्युक्तं भाष्ये। अंतरंगा इति प्रतीकमुपा
दाय प्राग्ग्लादेशेभ्यो धात्वधिकारात्तामादयोंतरंगा इति कैयटः। तथाहि। इदं भाष्यं प्राग्ग्लादेशेभ्यो धात्वधिकार इति पक्षमाश्रित्य प्रवृत्तं प्र
त्यया निर्दिश्यमानस्येत्युक्तेपि धातोरित्युपादानादिड्व्यवधानेन तामादयो न स्युः। तथा च रुदादिभ्यः सार्वधातुक इडस्य तामादिनिमि
त्तसमुदायबहिर्भूतरुदादिनिमित्तत्वेन बहिरंगत्वात्तामादय एव भवंतीति सूचनात्सामान्यापेक्षमंतरंगं विशेषापेक्षं बहिरंगमिति ना
स्त्येवेति सूचितं। वस्तुतो विचार्यमाणे कैयटेनैवतादृशांतरंगत्वाभावः सूचितो न भाष्यकृता। भाष्यस्यान्यथापि सामंजस्यात्। अत्रे
दं बोध्यं। समनंतरोक्तमतुप्सूत्रस्थभाष्यादल्पापेक्षमंतरंगं बह्वपेक्षं बहिरंगमित्यायाति। अर्थकृतबहिरंगत्वमप्यायाति। ननु नैषा।
सिद्धांतयुक्तिरिति चेन्न। हि तदभावेपि एतदर्थमभ्युपेतैवातिप्रसंगे सत्युभयत्राप्यस्ति ग्रहणं नापाद्यमर्थ इति व्यवस्थाप्योभयोः समान ६७

कत्वे स्वीकृते तस्मान्न द्विगोस्तद्धितस्य प्रतिषेधो वक्तव्य इति वचनमंगीकुर्वता भाष्यकृता सोऽर्थोंगीकृत एवेति हानिः। न च परत्वेन निर्वाहे
वचनमिदं निर्बीजमिति वाच्यं। तद्धि यथार्थस्य सर्वैरपि परिहरणीयत्वात्। न च शाब्दमर्यादया नैतदर्थलाभ इति वाच्यं। तन्मर्यादया तदर्थालाभेपि पारि
भाषिकस्य तादृशार्थस्यांगीकारे बाधकाभावात्। तस्मादेतद्भाष्यात्पूर्वोक्तांतरंगबहिरंगभावस्य लाभे तन्मूलकसामान्यापेक्षविशेषापेक्ष
रूपांतरंगबहिरंगभावोपि लब्ध एव। नन्वेतदंतरंगबहिरंगभावस्यासाधारणं फलं नास्तीति तत्फलानामन्यथासिद्धेरिति चेदस्मिन्नस्तु
अनेन नास्ति फलमिति भाष्यान्नायातीति तु न समीचीनं। न बहिरंगपरिभाषानित्यत्वेन तत्फलानामन्यथासिद्धौ नाजानंतर्यपरिभाषाभा
ष्येनास्तीति वक्तुं युक्तं। नद्दोः ससाविति सूत्रस्थमनंतस्य ग्रहणं तु भाष्ये प्रत्याख्यातमेवेति न तदभावे साधकं। पादः पदिति सूत्रस्थभाष्यमपि न
तदभावसाधकमित्युक्तं प्राक्। न स्येत्येके परे तु तत्र सभाष्यस्य प्राग्ग्लादेशेभ्यो धात्वधिकार इति पक्षमाश्रित्य प्रवृत्तत्वात्तथोक्तभाष्याणि न तत्सा
धकः। तस्मादयं पक्षो दत्तदोषादुष्टत्वान्निर्दोषः। परत्वेन तस्यासाधारणं फलं चिंत्यमित्येतावतैव तस्य परित्याग इति। प्रकृतमनुसरामः।

चि० नन्वकृतपरिभाषायां जातं तत्कार्यप्राप्तिकं चेत्यर्थद्वयं ज्ञापकद्वयेनांगीकृतं। तत्र प्रथमज्ञापकबलाद्यथाज्ञातस्येतरस्याभावस्तथैव द्विती-
९५ यज्ञापकबलेन प्रक्रियाक्रमेण पूर्वोपस्थितनिमित्तकस्यापि लाभः। तथा चासुसुवदित्यत्र चङ्निमित्तके उवङि सार्वधातुकनिमित्तकोत्र
घूपधगुणो च प्राप्ते प्रक्रियाक्रमेण पूर्वोपस्थितनिमित्तकत्वेनांतरंगत्वाद्गुण एव स्यात्। इत्याशयेन शंकते। नन्वेवमिति। अंतःकार्यित्वरू-
पांतरंगत्वमाश्रयपरिहरति। नेति। किं पुनरंतःकार्यित्वमित्याकांक्षायामाह। अंतःकार्यित्वं चेति। अत्र पूर्वोपस्थितिकत्वं च प्रयोगोच्चा-
रणक्रमेणैव। धर्मियाहकमानलभ्यत्वं तु प्रक्रियाक्रमेण पूर्वोपस्थितिकत्वं स्येव नास्तीति भावः। एतेन परिभाषयैव सिद्धे किमित्यस्योप-
न्यास इति शंकापरास्ता। कथमेतत्सिद्धमित्यत आह। इदं चेति। भाष्ये स्पष्टमिति। पद्मेत्यादो स्थानिवद्भावप्रयोजननिराकरणमिति
शेषः। नन्विदमंतरंगत्वं जातबहिरंगस्य नेयुगपत्प्राप्तिस्थलेषु लोकन्यायेना- वेति निर्णयाभावादत आद्यं निराकरिष्यमाणो द्विती-
यमंगीकरोति। तदपीति। ननु पद्मेत्याद्युदाहरणे पदस्य विभज्यान्वाख्याने लिति। दाक्षित्यायुक्तिं यत्त्वे च मित्यादिना दूषयखंडयति। त ९५

च्चिंतमिति। प्रकृते काजितिस्त्रेरितत्प्रयोजनखंडनायस्येरेतस्य श्रेयान् श्रेष्ठ इत्यादिप्रयोजनमुपपाद्य एकानुच्चारणसामर्थ्यान्निराकृ-
त्य चानंतरं विन्मतोर्लुगर्थप्रकृतिभावो वक्तव्यः। स्रग्वितरः स्राजीयान् स्रग्वितमः स्रजिष्ठः स्रुचनरः स्रुचीयान् स्रुचनमः स्रुचिष्ठ इति पु-
नः प्रयोजनमुपपाद्य। ननु च विन्मतोर्लुक्कृते टिलोपं बाधिष्यते। कथमन्यस्याश्रयमाणमन्यस्य बाधकं स्यादिति मा क्षिपक्षाश्रयणेनाशंकिते।
इदं तावदयं प्रष्टव्यः यदि तर्हि विन्मतोर्लुक्कृतो ऽनतिक्रमिहस्यादिति। टिलोप इत्याह। टिलोपश्चेन्नाप्नोति टिलोपे विन्मतोर्लुगारभ्यते स-
बाधको भविष्यत। इति जातिपक्षाश्रयणेन समाहितं भाष्यकृता। एवं विधांतरंगत्वाश्रयणेन तत्समाधानपरं भाष्यमसुक्तं स्यात्। लु-र
कस्थानिकटिलोपापेक्षया लुको बहिरंगत्वेनासिद्धत्वाच्च तद्धारणान्तरेवाह। स्रजिष्ठ इत्यादिना। अत्र विन्मतुवंतस्य यष्टिलोपस्तं लुक्बा-
धतां तस्मिंस्तु कृते यष्टिलोपः प्राप्नोति। तं कथं बाधेत न हि तस्मिन्प्राप्ते लुगारभ्यते इति कथमन्यस्येति शंकाभाष्याशयः। यद्यपि विषयभे-
देन टिलोपो भिन्नस्तथाप्यनपेक्षितविषयभेदं टिलोपशास्त्रं येन नाप्राप्ति मायेन लुका बाध्यते। तेन स्रजीयानित्येतस्मिन्नंगे सांप्रति

शि० कीभाविनी च टिलोपप्राप्तिर्यचि भत्वे सावकाशा लुका बाधिष्यत इति नाप्राप्ते इति समाधानग्रंथस्याशयः। ननु पूर्वोक्तांतरंगत्वं संयोगां
६६ तस्य लोप इति सूत्रे यणः प्रतिषेधो वाच्यो न वा झलो लोपाद्बहिरंगलक्षणत्वादिति वार्तिकत्रयस्यैकवाक्यतां प्रकल्प्य दाश्रितमपि न स
र्वत्रैवेति न सम्प्रत्ययः कस्कादिषु काजिति सूत्रस्थभाष्यविरोध इत्यरुचेर्हेत्वंतरमाह। भाष्य इति। तथाविधस्य क्वापि मुख्यत्वेनानुच्चारणादिति भावः।
ननु प्रकृतपरिभाषाया अनुत्तरपदाधिकारे इति प्रतिषेधो वक्तव्यः। अन्यथा परंतप इत्यादावनया परिभाषया मुमोऽसिद्धत्वादनुस्वारो
न स्यात्। द्विषंतप इत्यत्र च संयोगांतलोपो न स्यादित्यत आह। इयं चेति। ननु पपुषः चिच्युषः लुलुवुषः इत्यादावनया परिभाषयाऽसंप्रसारण
स्य बहिरंगत्वेनासिद्धत्वादल्लोपादीनि न स्युरित्यत आह। आभीयं तरंग इति। आभीयेष्वल्लोपादिष्वंतरंगेषु कर्त्तव्येषु आभीयाया
बहिरंगपरिभाषाया असिद्धवदित्यसिद्धत्वान्न तेष्वंतरंगेषु प्रवर्त्तत इति भावः। न चाल्लोपादीनां बहिरंगपरिभाषायाश्च समानाश्रयत्वं
नास्तीति वाच्यं। यद्विषये ऽल्लोपादीनां प्रवृत्तिस्तद्विषये एव परिभाषाया इति समानाश्रयत्वस्याक्षतत्वात्। उक्तेऽर्थे संमतिमाह। असि ६६

द्धवदिति। ननु चिरायी रजिरायी इत्यत्रांतरंगत्वाद्गुणे कृते यादेशे च यांतत्वाद्वृद्धिनिषेधः स्यादत आह। एवं सतीति। भाष्यस्य स्पष्टमिति। सं
मतिप्रदर्शनमेतत्॥४२॥ ॥बहिरंगपरिभाषापवादभूतां नाजानंतर्यपरिभाषामाह। नन्वेवमित्यादिना। ननु पदद्वयसंबंधिवर्णद्वयापेक्षत्वं
बहिरंगत्वे हेतुरूपमस्त्वत्र भाष्यद्वयं प्रमाणयति। भाष्ये स्पष्टमिति। तत्र ह्याद्ये किं पुनरार्द्धधातुकग्रहणं लोपविशेषणं आर्द्धधातुकनि
मित्ते लोपे सति यो गुणवृद्धी प्राप्नुतस्ते न भवत इति आहोस्वित् गुणवृद्धिविशेषणं धातुलोपे सत्यार्द्धधातुकनिमित्ते ये गुणवृद्धी प्राप्नुतस्ते
न भवत इति पक्षद्वयमुद्भाव्य यदि लोपविशेषणं प्रेद्धः उपेद्धः इत्यत्रापि प्राप्नोति। अथ गुणवृद्धिविशेषणं क्नोपयति अत्रापीति पक्षद्वयेऽपि दूष
णोद्भावनानंतरं। अस्तु लोपविशेषणमित्यंगीकृत्य प्रेद्धः उपेद्धः इ— पूर्वोक्तदूषणनिरासाय बहिरंगो गुणोऽन्तरंगः प्रतिषेधः। असिद्धं बहिरं
गमंतरंगे इति निराकुर्वता भाष्यकृता तस्य बहिरंगत्वे हेतुत्वं स्पष्टीकृतं। न चैवं द्धितामिसंयोगांतस्य लोपे यणः प्रतिषेधो वाच्य इति वार्ति
कप्रत्याख्यानाय वाक्यार्थमित्यादौ बहिरंगलक्षणत्वादिति यदीति वार्तिककृतोक्ते। बहिरंगो यणादेशोऽन्तरंगो लोप इति न ह्यारब्धाना भाष्य

चिं० कृताचतल्लघीकृतंबोध्यं।तत्रबहिरंगइतिप्रतीकमुपादाययस्यपूर्वंप्रसंगःपश्चादुपसर्गयोगस्तदाप्रतिषेधोंतरंगोगुणोबहिरंगः।यस्तु
६७ पूर्वमुपसर्गयोगःपश्चात्प्रसंगयोगस्तदागुणोंतरंगोनिषेधोबहिरंगः।सर्वथाबहिरंगस्यासिद्धत्वादिष्टसिद्धिरितिकैयटः।तद्भाष्य
तद्भाष्यान्नपदद्वयसंबंधिवर्णद्वयापेक्षमंतरंगमितिलभ्यते।तदुक्त्यातेनपूर्वोपस्थितिकत्वरूपांतरंगभावस्यैवाश्रयणात्।एतदूषकत्रि
मतंशृंर्वेधातुःसाधनेनयुज्यतेइतिसूत्रकारुर्वइतिसूत्रस्थभाष्यसिद्धांतरी।सापिसंयोगांतलोपइतिसूत्रस्थभाष्यादपिचिंत्येनेतदायाति।
अंतर्भूतसुप्निमित्तकपदसापेक्षांतरंगसंयोगांतलोपापेक्षयाबहिर्भूतात्निमित्तकत्वेनयणोबहिरंगत्वसंभवेनभाष्यापपत्तेः।संयोगां
स्य तलोपइतिसूत्रेंतरंगत्वादितिप्रतीकमुपादायैकपदाश्रयत्वादितिकैयटस्तुबहिर्भूतेतरपदसंबंधत्निमित्तकत्वाभावेनांतर्भूतसुन्निमि
त्तकप्रथमपदाश्रयत्वादितिभावार्थः।तस्मात्पदद्वयसंबंधिवर्णद्वयापेक्षस्यबहिरंगत्वेएतत्ज्ञापकपरभाष्यमेवप्रमाणमितिसुधियोविभाव
यंतु।विप्रतिषेधसूत्रेऽसिद्धंबहिरंगलक्षणमित्युक्त्वाततोवक्ष्यामिनाजानंतर्येबहिष्ट्वप्रक्लृप्तिरिति।सानर्थ्याकर्तव्या।आचार्यप्रवृत्ति ६०

र्ज्ञापयतिभवत्येषापरिभाषायद्ययंषत्वतुकोरसिद्धइत्यसहेत्युक्तंभाष्ये।एतद्भाष्यादिष्टसर्वस्यसूत्रस्यज्ञापकतालभ्यते।ननुतुक्ग्रहणस्यै
वाएतदभिप्रेत्यैवयदयमितिप्रतीकमुपादायकोसिचदधीत्सेतिबहिरंगस्यैकादेशस्यासिद्धत्वात्सत्वंनभविष्यतीतिकृचत्प्रवर्त्तिष्यते
किमसिद्धवचनेनेतिकैयटः।इदानींषत्वांशेतदुक्तियत्विसादिनानूद्यखंडयति।तन्नेति।ननुतुक्ग्रहणमात्रस्यज्ञापकत्वेकथंसामा
न्यतोयस्यायंषत्वतुकोरसिद्धइत्यादिभाष्योक्तिःसंगच्छतेइतिचेन्न।षत्वतुकोरितिसमासनिर्देशेनतथोक्तौप्यदोषात्।ननुकोसिच ले
दित्यत्रसिचदित्यस्यपदत्वेनसकारस्यपदादित्वात्सात्पदाद्योरितिनिषेधेनैवषत्वाप्राप्तेस्तद्व्यर्थंप्रकृतसूत्रेषत्वग्रहणमेवव्यर्थ
मित्यतआह।एकादेशस्येति।एवंतर्हिपरादिवद्भावेनासिचदित्यस्यपदत्वेनेणःपूर्वपदसंबंधित्वाभावात्पदद्वयसंबंधिवर्णद्व
यापेक्षत्वाभावेनोभयोःसमत्वाभावात्कैयटोक्तंषत्वग्रहणस्यज्ञापकत्वंसम्यगेव।किंचपदद्वयसंबंधिवर्णद्वयापेक्षत्वेनैवनबहि
रंगत्वमपितुबहुनिमित्तकत्वेनापि।तथाचैकादेशस्यबहुनिमित्तकत्वेनबहिरंगत्वंषत्वस्यतदपेक्षयाल्पनिमित्तकत्वेनांतरंगत्वं।अतएवस्त

चिन्० मान्तो भाष्योक्तिरपि संगच्छते। तस्या विशेषविषयतया संकोचे प्रमाणाभाव इत्यत आह। त्रैपादिकेंतरंग इति। स्वाभिमतं परिभाषार्थमाह।
६८ अचोनानंतर्य इति। एकवचनांतेन समासोऽनानंतर्यपदस्य तन्निमित्तकं लक्षणं चेत्युभयमर्थेन सूचितं। ननु परिभाषायामंतरंगबहिरं
गोभयसाधारण्येनानानंतर्य इत्युक्तौ कथमंतरंग इत्युक्तिरत आह। अनुवृत्तिसूचनादिति। विप्रतिषेधसूत्रे भाष्यकृतेति शेषः। स्वोक्तप
रिभाषाफलमाह। तेनेति। एतेनोचोरानंतर्यमिति द्विवचनांतेन समासे यदस्य स्वाध्याहारः। अनानंतर्यमंतरंगबहिरंगमुभयं यत्रास्ति तत्र
बहिरंगपरिभाषाप्रवृत्तिर्नेति परिभाषार्थ एवं ततः सीरदेवादयोः पास्ताः। तथा सति धर्मिण्यारूढमानविरोधो न धातुलोपसूत्रस्थभाष्यविरो
धश्च स्यात्। तत्र भाष्ये भेद्य इत्यादौ धातुलोप इत्यस्यार्धधातुकविशेषणत्वेऽतिप्रसंगमापाद्य गुणो हि बहिरंग इत्युक्तं। अंतरंगे निषेधे क
र्तव्ये बहिरंगगुणस्यासिद्धत्वान्नातिप्रसंग इति तदाशयः। अंतरंगे बहिरंगे वाऽनानंतर्य इत्यर्थे तु प्रकृतेंतरंगस्यानानंतर्याभावेऽपि बहिरंग
स्य तत्सत्त्वान्नानानंतर्य इति निषेधेन परिभाषाप्रवृत्तौ अतिप्रसंगतादवस्थ्यात्तद्विरोधः स्पष्ट एव। ननु मूलोक्तार्थे परस्मैमादिति सूत्रस्थ ६८

अमू आसाते अमी आसते इत्यत्र मात्प्रगृह्यसंज्ञायां पूर्वत्रासिद्धमिति सिद्धत्वाद्दयायेकादेशप्रतिषेध इति वार्त्तिकोक्तासिद्धत्ववर्णनं वि
रुध्येत। अंतरंगमुत्वादि दृष्ट्वा बहिरंगाभीयादीनामसिद्धत्वान्निष्पूर्वत्वनिरूपितमुत्वादीनां परत्वाभावेन पूर्वत्रासिद्धमित्यस्याप्रवृत्तेः।
अंतरंगे बहिरंगे वाऽनानंतर्य इत्यर्थे त्वंतरंगानानंतर्याभावेऽपि बहिरंगानानंतर्यसत्त्वेनानानंतर्य इति निषेधाद्बहिरंगत्वासंभवात्पूर्वत्रेत्यसि
द्धत्ववर्णनं वार्त्तिककृतां संगच्छत इति चेन्न। खरवसानयोरिति सूत्रस्थसिद्धांतभाष्यानुरोधेन त्रैपादिकेंतरंगबहिरंगपरिभाषाया अप्रवृ
त्तेः। तत्रत्यवार्त्तिकस्य तद्भाष्यस्य सिद्धांतत्वेन विरोधाभावात्। अनलंबेति। ऽनानस्य बहिरंगत्वेत्युक्तत्वादेवेत्यर्थः। इणो झिशीनामिति विप्रतिषे
धसूत्रस्थं भाष्यं अयजे इंद्रं स्याम इद्ध संवैद्यम इत्यादिसिद्ध्यै प्रयत्नं। यदि तन्निमित्तग्रहणं क्रियते शाचवड्ंते दोषः। स्योति पिप्यति माङ्कुचदिति
तन्निमित्तग्रहणे दोषमुक्त्वा अत्र न प्राप्नोति शाचवडंतस्यांतरंगलक्षणत्वादिति किं। निर्येनिसूत्रस्थं भाष्यं। इत्यादीत्यादिशब्देन आरभ्यमाणो
नित्योऽसौ परश्चासौ अनवस्था। युगपत्संभवो नास्ति बहिरंगेणासिध्यतीति पदूयामध्ये निसिध्यनुगुणमचः परस्मिन्निति सूत्रस्थं भाष्यं। संग

छेतेइतिप्रत्येकंसंबध्यते।तत्रैवसूत्रस्थान्त्यग्रहणमपिप्रमाणयति।अतएवेति।इदानींजानस्येत्युक्तावप्यक्षद्यूर्नसिध्यतीतिशंकते।नचेति।क
र्तव्यइतियत्कृतेचेत्यधात्रुस्तस्मिन्नंतरंगंप्राप्नोति।तत्रकर्तव्यइतिशेषपूरणेनपरिहरति।अचइति।ननुवलिलोपेबहिरंगपरिभाषाया
अनित्यत्वादेवतदप्राप्तिद्वारेणपरिभाषायामधिकनिवेशोविफलइत्यतआह।असिद्धेति।तथाचतदनित्यत्वेसामान्यापेक्षंज्ञापकंवि
शेषापेक्षंवा।नाद्यः।वलिलोपेतदनित्यत्वेविशेषज्ञापकस्यानुपलब्धेः।नांत्यः।सामान्यापेक्षयातदनित्यत्वेषत्वतुकोरितिसूत्रस्थतुग्ग्र
हणस्यप्रत्ययोत्तरपदयोश्चेतिसूत्रेमपर्यंतानुवृत्तेश्चास्यासवर्णेइत्यादेर्ज्ञापकत्वेनाजानंतर्यस्यादेर्वैयर्थ्यापत्तेः।तस्मादुभयथाप्यनि
त्यत्वेनतद्वारणंयुक्तमितिभावः।मूले।स्येत्युपलक्षणं।नेनैवेति।अनित्यत्वेनैवेत्यर्थः।तत्रैवज्ञापनिरसंज्ञयितुमाह।अतएवेति।परिभाषा
सत्वादेवेत्यर्थः।ननुयत्रोभयनिमित्तस्यैवबहिर्भूतंप्रत्ययनिमित्तकबहिरंगंतत्रैवेत्युक्तिश्चिंत्या।परंपरयानिमित्तत्वमादायबहिरंगत्वाश्रयणे
तुनमानं।ध्वनितंचेदंनलोपःसुब्विधीतिसूत्रेभाष्येइतिपूर्वोक्तसिद्धांतासंगतिःस्पष्टैवस्यात्।नलोपःसुब्विधीतिसूत्रस्थभाष्यानुरोधेनप

रंपरयानिमित्तत्वमादायबहिरंगत्वाश्रयणस्यक्वाचित्कत्वमित्यस्यनलोपःसुब्विधीतिसूत्रभाष्यविषयातिरिक्तविषयत्वस्यावश्यंवाच्य
त्वेनदोषतादवस्थ्यंतत्कस्येनप्रमाणाभावश्च।तद्भाष्यस्यान्यथाप्युपपत्तेरितिचेन्न।परिभाषांगीकर्तृमतेनतदुक्तेरदोषात्।एतद्भ्रू
कुत्तुरसिद्धंबहिरंगमितिपरिभाषाऽनित्यत्वेनचसर्वत्रनिर्वाहेनाजानंतर्यपरिभाषायाअनावश्यकत्वमितिसिद्धांतात्।एतच्चानुपदम
ववक्ष्यते।ममत्विति।परिभाषांगीकर्तुरित्यर्थः।परिभाषासत्वेरुत्वस्यपिंती।तिसूत्रस्थभाष्यविरोधमाशंकते।नचैवमिति।विपक्षेभा
ष्यासंगतिंस्पष्टयतिनाजानंतर्यइति।एतत्परिभाषानावश्यकत्वबोधनेनैवतद्भाष्योपपत्तौनविरोधइतिपरिहरति।नेनेति।तत्राचः
परस्मिन्नितिसूत्रस्थंभाष्यंसंवादयति।अतएवेति।अस्याअनावश्यकत्वादेवेत्यर्थः।ननुविप्रतिषेधसूत्रेऽसिद्धंबहिरंगमंतरंगइति
परिभाषायाअक्षद्यूरिहिरण्यद्यूरित्यत्रातिव्याप्तिमाशंक्यनैषदोषः।असिद्धंबहिरंगलक्षणमंतरंगलक्षणेइत्युक्त्वाततोवक्ष्या
मिनाजानंतर्यइतिवदताभाष्यकृतातस्यावश्यकत्वस्यसूचनात्कथमनावश्यकत्वंवक्तुमुचितमित्यतआह।अतएवेति।विप्रतिषेधसू

चि० नं० ऽभाष्यकृता तस्या उक्तत्वेऽप्यन्यत्र कुत्रापि अनुक्तत्वात्तस्या आवश्यकत्वमिति भावः। संप्रसारणाच्चेति सूत्रस्थभाष्यात्तस्या अनावश्यकत्व
७० मिति भावः। एतदभिप्रेत्याह। संप्रसारणाच्चेनेति। तत्र हि आद्ययोगे बहूनि प्रयोजनानि संति यदर्थमेव तत्कर्तव्या प्रतिविधेयं दोषाः स्युरिति पा
ठः। आद्ययोगेऽस्यास्या विप्रतिषेधस्सूत्रे इत्यर्थः। बहूनि प्रयोजनानि संति सुक्तिकस्याऽस्या आकांक्षायामुपस्थिति लब्धमस्या इति। यदर्थमित्यस्य
तदर्थमित्यर्थः। एतत्फलितार्थो मूलेऽक्तः। अन्यमिति। अन्यमर्थस्तु वस्तुतः अनावश्यकत्वं च स्वसमानकक्षत्वातिरिक्तसंभाव्यफलसंपाद
कत्वं। प्रकृतपरिभाषायास्तु न तथात्वं। स्वसमानकक्षत्वातिरिक्तस्य स्वफलसंपादकत्वाभावात्। न च बहिरंगपरिभाषानित्यत्वमेव तत्फलसं
पादकमिति वाच्यं। तस्या अनित्यत्वस्यानुगतत्वेनानुगतनाजानंतर्यैतिवचनस्य समानकक्षत्वाभावात्। न च पूर्वोक्तकृत्स्नस्यापि नेति सू
त्रस्थभाष्यविरोधः। तद्भाष्यप्रामाण्यादेव तद्विषये अस्या अप्रवृत्तिकल्पनेनापि भाष्यस्य सुयोजत्वात्। अतएव परिभाषाज्ञापकोपवर्णनं
भाष्यकृतं संगच्छते। अन्यथा तदनित्यत्वज्ञापकोपवर्णनमेव कुर्यात्। किंच सामान्यापेक्षज्ञापकेन सर्वत्रानित्यत्वज्ञापनें तरंगानपि विधीनिमा ७०

दिपरिभाषाज्ञापकानि तत्र तत्रोक्तान्युच्छिद्येरन्। अन्यत्र तदनुक्तेस्त्वो हि नैतदनावश्यकत्वसाधकः। किंतु सर्वमेतत्परिभाषाप्रयोजनमत्रैव व्या
ख्येयमिति अर्थस्सूचनायेति न तद्विरोधः। प्रतिविधेयं दोषाः स्युरिति संप्रसारणाच्चेति सूत्रभाष्यमपि बहिरंगपरिभाषाप्रतिपक्षनिषेधवचन
कर्तव्यतापरं। तस्मान्नेतस्या अनावश्यकत्वं समीचीनतरमिति॥५०॥ अजानंतर्यांतरंगविषये अक्षद्युरित्सांतो बहिरंगपरिभाषाप्रतिषाहि
परिहृत्य बहिरंगत्वनिबंधनकार्ये प्रियस्त्रांतो नदीतिप्राप्तिं परिहर्तुं परिभाषांतरमवतारयति। नन्वेवमिति। अत्र ज्ञापकाकांक्षायां भाष्योक्त
कर्मणेऽयज्ञापकमाह। अर्थेसादि। ज्ञापकविघटनमाशंकते। नन्वित्यादि। इत्यादयितिः आदिनातुमर्हितं त्वद्धितं तवायं त्वदीयमत्सादिसंग्रहः।
न च मादित्यादिग्रहणेनैव तुभ्यादिसंग्रहः। तदस्तु पयन्त्वेव भाष्योक्तमपर्यंतानुवर्तिरेव ज्ञापिकेत्याह। एवं तर्हीति। प्रत्ययोत्तरपदयोश्चेति सूत्रभा यो
ष्ये एवं मेव ज्ञापकं कर्मोक्तत्वात्। प्रत्ययोत्तरपदयोश्चेति सूत्रस्थोत्तरपदग्रहणस्यैव ज्ञापकत्वं युक्तं। न संपूर्णस्य सूत्रस्य युष्मदादिभ्यः प्रातिपदिक
मात्रेऽप्याचारक्विपि नत्वादेशासंपादकतया तत्र समस्तस्य ग्रहणस्य चरितार्थत्वादिति प्राचीनोक्तेरनादरणीयत्वं ध्वनयितुमाह। युष्मदादिभ्य इ

चित्॰ ति। ननु यदयं षत्वतुकोरसिद्धः इत्याहेति विप्रतिषेधसूत्रस्थभाष्यस्तु ग्रहणमात्रज्ञापकपरत्ववदत्राप्युत्तरपदग्रहणांशे न ज्ञापकत्वपर्या

७१ नेनमुपस्थादिभ्यः क्विपोनभिधानकल्पनेमानाभावादिति प्राचीनोक्तं सम्यगेवेत्यस्तस्तदनभिधाने हल्ग्रहणं तदाह। कृत्वैव न घाप इति। नत्विह

इमे बहुवचनाम्नाब्दाः कास्म सस्मादाममन्त्रे लिटि सोसामः किमेत्ति अन्यथा दाम्यर्द्धूपप्रकर्षे रामन घामनी भ्य इति कस्येदं। षष्ठी

बहुवचनस्य ग्रहणमित्युक्त्वा अपास्य कस्मान्न भवति कास्मस्त्याद्दाममन्त्रे इति निरनुबंधकग्रहणे न सानुबंधकस्येत्युक्तेति। स मा

तर्हि स्यैवमर्थोनुबंधः कर्त्तव्य इहास्य ग्रहणं मा भूदित्याक्षिप्य ननु चावश्यं मकारेत्संज्ञापरित्राणार्थं मकारानुबंधः कर्त्तव्य इति समाधाय ना

र्थदेत्संज्ञापरित्राणार्थेन इत्कार्याभावादत्रेत्संज्ञा न भविष्यतीति आशंक्येदमस्ति कार्यं मिदचोन्त्यात्पर इति यथा स्यादिति समाधाय तदनंत

रं प्रत्ययांतादयं विधीयते न तत्र चनास्ति विशेष इत्युक्तं। तथा च यदि हलंतेभ्य आचारक्विप्स्यात्तर्हि सनाद्यंता इति धातुसंज्ञायां धातुत्वाद्वि

१ स्व रिकास्म सस्यादित्याम्भवत्येव न त्वचमकारेत्संज्ञायां हलः पूर्वभागस्यान्त्यत्वाभावे तु हलउत्तरमिति विशेषोस्त्येवेति नास्ति विशेष इत्यस्य ७१

कं स्यात्तस्मादेतज्ज्ञापकसामर्थ्यात् हलंतेभ्यस्तस्यानभिधानमिति कल्प्यंत इति भावः। नन्वेकार्थीभावात्प्रातिपदिकभूतानां युष्मदस्मदोर्मातान्तकरो

लिन्यदाचष्ट इति णिचि त्वादयति मादयतीति प्रयोगसिद्ध्यर्थं तर्हि प्रत्ययोत्तरपदयोश्चेति सूत्रस्थप्रत्ययग्रहणस्य चारितार्थ्यात् संपूर्णसूत्र

स्य ज्ञापकतानुपपत्तेः सन्न आह। एवमेवेति। अत्रानभिधानप्रमाणं तु संपूर्णसूत्रज्ञापकपरभाष्यमेव। प्राचीनोक्तखंडनमेवानभिधाने प्र

त्यंदर्शयति। एतेनेति। वस्तुतस्त्वनभिधाने प्रत्यंचितं संपूर्णसूत्रस्य ज्ञापकता परभाष्यस्य तु यदयं षत्वतुकोरसिद्ध इत्याहेति चरप्युपपन्नः।

प्रमाणं शैथिल्यात्याच्चुमपर्यंतग्रहणानुवृत्तेर्ज्ञापकत्वमुक्तं तदेवेदानीमुपपादयितुमाशंकते। नन्विति। उत्सर्गसामानदेशा इति न्यायमंगी

कृत्य तदनुवृत्तेर्वैयर्थ्यमाशंकते। न चेति। परिहरति। तस्येति। न्यायस्येत्यर्थः। न्यायेनानेनापवादस्योत्सर्गसमानदेशत्वं न सर्वत्राभ्युपेय

ते किं त्वसति बाधके। नेतावतोत्सर्गप्रवृत्तस्य तस्य परित्यागः संभवति। नापि तत्र किंचित्प्रमाणं पश्यामः। तस्माच्चक्रमांतमित्यादिवैय

र्थ्यरूपबाधकसत्त्वात् न्यायेन अमादीनामुत्सर्गसमानदेशत्वाभावेपि प्रकृते तत्सत्त्वे बाधकाभावात् मपर्यंतानुवृत्तेर्वैयर्थ्यं तादव

चि॰ स्यमेवेति परिहरति। नेति। तत्रसौत्रादेशविधानमपि प्रमाणयितुमाह। अनन्यत्वेति। बाधकविरहेणान्यायसत्त्वादेवेति अर्थः। तदेवोपपाद
७२ यति। अन्यथेति। अनभिहितेइति सूत्रस्थकैयटरीत्या मपर्यन्तानुवृत्तिर्ज्ञापिकेति यदुक्तं भाष्यकृतां मते एतन्न्यायाभावमात्रं कृतोभय
पाति। तत्रादिश्चमन्बहुजकस्य अनभिहिताधिकारस्य साख्यानवादिना विरोधे न भवतीसूत्रदृष्टान्तमुपपाद्यान्तरङ्गं। न च अमन्बहु
जकयोपवादस्य सत्त्वादपवादत्वाद्बाधका भविष्यतीति। अमन्बहुजकस्य नानादेशत्वादुत्सर्गाप्रतिषेधः। समानदेशयोरपवादोत्सर्गयोर्बाध
नं भवति नानादेशत्वान्न प्राप्नोतीत्युक्तं भाष्यकृता। नानादेशत्वादिति प्रतीकमुपादाय विरोधे बाधकारणं न विशेषविधानमेव वा
र्त्तिककारस्य च येदं दत्तं भाष्यकारस्तु विरोधाभावेति विशेषविधानमात्रेणैव बाधकत्वमन्यत्रापीच्छतीति हि कैयटः। अन्यत्रेत्यस्य मि
दचोन्त्यादि टेरित्यादि सूत्रे इत्यर्थः। परिहरन्नाह। तथापीति। एतद्भाष्यमपीति। मपर्यन्तानुवृत्तिज्ञापकपरं भाष्यमित्यर्थः। ज्ञापकत्वमुपपा
दयति। एवमिति। एतस्मिन्न्याये सतीत्यर्थः। असत्त्वांहि प्रकृतपरिभाषायां त्वदुक्तमित्यादौ प्रत्ययोत्तरपदयोश्चेत्यस्य त्वादिबाधनार्थत्वादुत्सर्ग। ७२

समानदेशत्वादिति न्यायेन मपर्यन्तयोरेव तौ स्यातामिति तदनुवृत्तिर्व्यर्था स्यात्। एतद्वैयर्थ्यान्यथानुपपत्त्या ज्ञापितायां त्वेनस्यामन्तरङ्गत्वा।
ल्लुकि तद्विषये त्वादीनामप्राप्त्या तदपवादत्वाभावेन तन्न्यायानवतारादनेकाल्त्वात्सर्वयोः स्थाने त्वमौ स्यातां तद्वारणाय मपर्यन्तानुवृत्तिश्च
रितार्थेति भावः। त्वत्तु त्वद्दस्मादावस्मासामेतस्यामन्तरङ्गत्वात्पूर्वं न यमेमादेशयोर्मपर्यन्तासम्भवेन तदनुवृत्तिर्व्यर्था स्यात्। तद्वैयर्थ्यान्यथानुप
पत्त्या सत्त्वां तु तस्यामन्तरङ्गत्वाल्लुकि विभक्तिपरत्वाभावेन न यमेमादेशयोरप्राप्तौ मपर्यन्तानुवृत्तिश्चरितार्थेति हृदयम्। उक्तमपर्यन्तानुवृत्ते
र्ज्ञापकत्वोपवर्णनं यच्चित्यादिना नूद्य खण्डयति। तन्नेति। अन्तरङ्गत्वमेमादेशापेक्षया ऽपवादभूतप्रत्ययोत्तरपदयोश्चेत्यस्य बलीयस्त्वे
न ततः पूर्वमन्तरङ्गत्वमनाद्यादेशाप्रवृत्तिरिति न दोष इत्याशयः। उत्सर्गसमानदेशा इति न्यायो वस्तुतो विचार्यमाणो वार्त्तिकमते एव सम्भवतीत्यत्र
थापि न भाष्यरीत्या मिदचोन्त्यादिति सूत्रस्थभाष्यविरोधात्। तस्माद्भाष्योक्तं मपर्यन्तानुवृत्तेर्ज्ञापकत्वं वार्त्तिकरीत्यैव न त्वरीत्या। न चैवं भा
ष्यमते गोमन्प्रियइत्यादौ नाम सिद्धिः। तन्मते यथा चिन्निकरणाय मर्थ इति स्वीकारात्। न च भाष्यमतेपि युष्मकाद्यादेशविधानसामर्थ्या

चिकु० दुत्सर्गस्त्वीक्रियतएवेतिवाच्यं।नहिविधानस्यापिवार्त्तिकरीत्यैवसंभवेनभाष्यमतेतदसंभवादित्याह।वस्तुतइति।केषांचित्सिद्धांतमनुवदति।
७३ इत्यमिति।अत्रकेचित्संदेहाद्भावितमस्वरसमेवएङ्ह्रस्वादितिन्यासयोरितिसूत्रस्थभाष्यविरोधेनतत्रत्यकैयटविरोधेनचप्रकट
यति।एङ्ह्रस्वात्संबुद्धेरित्यादि।तत्रप्रथमतएङ्ह्रस्वादितिसूत्रभाष्यमर्थतोदर्शयति।आद्यइति।तत्रत्यभाष्यानुपूर्वीतु।अपृक्तसंबुद्धिलोप
भ्यांलुग्भवतीतिवार्त्तिकंसप्रयोजनमुक्त्वा।अनंतरंनवालोपलुकोर्लुगवधारणात्।यथा।अनडुह्यनेइति।यथा।अनडुह्यतइत्यत्रानङ्गि
चाचरतीत्यर्थेप्रथमांतात्कर्तृवाचकादाचारेक्यङिहल्ङ्याबितिसुपोधातुप्रातिपदिकयोरितिलोपलुकोर्लुगेवभवति।तथात्रपुंजनुरत्रापिभवतीति
नार्थोविप्रतिषेधेनेतिभाष्यार्थः।अंत्येचेति।न्यासयोरितिसूत्रस्थकैयटइत्यर्थः।मूलोक्ताकरत्राब्दस्यभाष्यकैयटोभयसाधारण्या
त्।तत्रहिउपसर्गस्थानादित्यर्थंप्रतिषेधेसकनउपसंख्यानमितिवार्त्तिकमुक्त्वातन्नहिकर्त्तव्यंनकर्त्तव्यं।आचार्यप्रवृत्तिर्ज्ञापयतिनैवं
जातीयकानामित्त्वंभवतीतियदयंमदस्तिकनितिनिर्देशंकरोतीतितत्समासाख्यातंभाष्ये।तत्रचयदयमितिप्रतीकमुपादायनचतद्धितलुगि ७३

मित्कारात्वारत्वंस्यादन्यथापंचभिर्मात्तिकाभिःक्रीतइत्याद्यर्थकोऽध्यर्धपूर्वेतिलुकितुकृतद्धितेतिटापोलुक्तिनिमित्ताभावादित्वंनस्या
त्।चमात्तिकइत्युक्त्वाऽथंऽतरंगांर्थ्यतिमूलोक्तःकैयटग्रंथः।नन्वेवंतद्राजस्यबहुष्वितिसूत्रेअबहुत्वेचलुग्वक्तव्यः।अतिक्रांतोगानतंगइ
त्युक्त्वाबहुवचनेपरतोयस्तद्राजइत्येवंकृत्वाचोद्यते।अथकिमर्थंपुनरिदंनबहुवचनइत्येवसिद्धमित्युक्तेनसिध्यतिबहुवचनेइत्युच्यतेन
चात्रबहुवचनंपश्यामइतिभाष्यं।तत्रनचात्रेतिप्रतीकमुपादायांतरंगानपिविधीन्सुपोधातुप्रातिपदिकयोरितिलुग्बाधतेप्रसमोत्तरपदयोश्चेतिज्ञाप
कादर्थस्यचसंभवादितिकैयटस्यकागतिरित्यतआह।एतद्विरोधादिति।समनंतरोक्तन्यासयोरितिसूत्रस्थकैयटविरोधादित्यर्थः।यत्त
द्राजस्येतिसूत्रेकैयटेनोक्तं।तदेतद्विरोधात्त्याज्यमितिद्रष्टव्यमित्यन्वयः।नन्वंतरंगानपीतिज्ञाप्येनायंलुक्सुब्लुकोबाधकःस्यादितिभाष्याप
र्यालोचनायांकिमपिसमाधानंवक्तव्यमन्यथातद्भाष्यमनुपपन्नंस्यादित्यतआह।लुगपेक्षयेति।एतद्भाष्यसामान्यादेवज्ञापकस्यसजा
तीयापेक्षत्वाभ्युपगमेकार्यांतरनिमित्तविनाशकलुकएवकार्यांतरापेक्षयाप्राबल्यंबोध्यतइतिनैतद्भाष्यमनुपपन्नमितिभावः।नन्वनेन

विर० न्यायेनांतरंगापेक्षयातन्निमित्तविनाशकलुकः प्राबल्यंबोध्यतेतथाचबहिरंगपुरस्सांतेनत्वेपिगोमत्प्रियइत्यादौनतत्संभवः। अंतरंग
७४ प्राप्तिवेलायांतदप्राप्तेरित्यतआह। अनेनन्यायेनेति। परिभाषास्थलुक्शब्दोलुक्स्वप्रयोजकसमासादेश्चेतदुभयपरइतिभावः
अन्यत्रेति। तद्राजस्येतिसूत्रेउद्योतेइत्यर्थः॥५१॥ नन्वेवमपिपूर्वेषुकामशमः अपरेषुकामशमइत्यत्रपूर्वइषुकामशमअ अपरेषुका
मशमअइतिस्थितेबहिरंगपरिभाषयांतरंगत्वात्पूर्वेषुगुणेपूर्वोत्तरपदयोर्व्यपवर्गाभावादुभयतआश्रयणेंतादिवद्भिरकार्यादिशःपरंवाया
मवाचिनांनगरवाचिनांचिनांचांगानांमवयवस्याचोवृद्धिरित्यर्थकप्राचांग्रामनगराणामितिसूत्तरपदवृद्धिर्नस्यात्तथाउत्तरपदस्येत्य
धिकृत्यविहितायावृद्धेस्तत्रसुत्तरपदेसर्वशब्दादिकशब्दस्यांतोदात्तइत्यर्थकेनोत्तरपदवृद्धौसर्वंचेत्यनेनपूर्वपदांतोदात्तत्वंचनस्या
त्स्यावकाशंचैतदुभयंपूर्वकाशमृत्तिकः अपरपांचालकइत्यादौ। तथैवगुडोदकमिश्रास्तस्यावुदकेकेवलेइतिपूर्वपदांतोदात्तत्वंनस्यात्।
उदश्विदुदकमिश्रास्तेसावकाशंचैतदपि। अतःपूर्वोक्तातिव्याप्तिवारणायांतरंगनिषेधिकांपरिभाषामवतारयति। नन्वेवमित्यादिना। ७४

ननुसोमिश्रास्तावंतरंगत्वात्कृतेप्येकादेशेंतादिवद्भावेनपूर्वपदात्परस्यतस्यतत्त्वेनेंदुस्येतिवृद्धिनिषेधश्चरितार्थइत्यतआह। अंतादिव
द्भावस्त्विति। उभयतइति। पूर्वपरशब्दाभ्यांचविरोधस्यपुरःस्फूर्तिकत्वेनविरुद्धार्थद्वयस्ययोगपद्येनासंभवेन्यायसिद्धप्येकदे
शविकृतन्यायेनस्यशब्दस्यइन्द्रशब्दत्वेनदेवताद्वंद्वेतिप्राप्तवृद्धिनिषेधायसोस्त्वित्यतआह। किंचेति। वृद्धिरप्यनेनापिशब्दएवार्थोतथाचो
भयतआश्रयणेनांतादिवदितिनिषेधेनोभयाभावेपिपूर्वांतत्वेनैकादेशविशिष्टपूर्वपदत्वेनस्यशब्दस्यैकदेशविकृतन्यायेनोत्तरपद
त्वेपिवृद्धिरत्रनप्राप्नोति। स्वन्वयः। ननूभयतआश्रयणेनांतादिवद्भावइतिनिर्मूलंव्यतिघटितशास्त्रस्यासत्यार्थारोपबोधकत्वेनतस्यचवि
रुद्धविषयस्यापियुगपत्संभवात्। यथाद्वयोरेकःप्रेष्यइतिलोकदृष्टांतेनतस्यसिद्धिरित्यंतादिवच्चेतिसूत्रस्थंभाष्यंलोकेदृष्टयुक्तिःस्पष्टैव
दर्शीयादितिप्रतीकमुपादायलघुशब्देंदुशेखरेइत्यतआह। उभयतइति। नत्वाश्रयेणवेति। वाशब्दोहेतुविकल्पार्थः। अतएवेति। परादिव
द्भावेनएकादेशउत्तरपदाद्यवयवाभावादेवेत्यर्थः। आशंकितं। विप्रतिषेधसूत्रेभाष्यकृतानत्कैयटेनचेतिशेषः॥५२॥५३॥ वार्णपरिभाषाम

चि० पतारयति। नन्वेवमिति। तत्फलं दर्शयति। नेनेति। ज्ञापकाकांक्षायां सीरदेवादिप्राचीनोक्तप्रकारेणान्तदाह। अभ्यासस्येत्यादि। उपपा
७५ स्यति। तद्वेति। नन्वसवर्णग्रहणाभावेंतरंगत्वाद्दीर्घः सवर्णग्रहणाभावत्त्वेन सिद्ध्यतीत्ययुक्तं। इयङादिसवर्णदीर्घयोरुभयोरपि
तुल्यनिमित्तकत्वेनांतरंगबहिरंगभावविरहेण परत्वाद्दीर्घो बाधित्वेयङादेव स्यादिति माचत्याक्षेत्तेरित्यत आह। इयुवङाविति। अ
भ्याससंबंधिनिमित्तकत्वादिति। अनसंज्ञाकृतबहिरंगत्वात्। अयणां संबंधनिमित्तकत्वादित्युक्तं। नचाभ्यासस्यैर्निषण्णात्तस्या
नित्वेकृतत्वादच्यापितथैवेत्यभ्युपगमेनाभ्यासस्येत्यस्य विशेषणेन स्यानैवेवान्यपेत संबंधस्य निमित्तत्वस्य सुवचत्वात्। तथा चाकस
वर्णे इत्येतन्निमित्तसमुदायाद्बहिर्भूतनिमित्तकत्वेन बहिरंगत्वमिति भावः। नन्वेवमप्यंतरंगापेक्षयापवादस्य बलीयस्त्वादियङु च
स्यादित्याशंकते। नचेति। तत्परिहरति। येननेति। प्रकृतलक्ष्ये दीर्घस्यावश्यंप्राप्तावपि स्वविषयलाभच्छेन तदप्रवृत्तस्यानयेन नेतु प्रस्यविष
यः। यणास्तु स्वविषयलाभच्छेदेन प्राप्त्यानदपवादत्वमेवेङादेरनेन न्यायेनेति भावः। न चासवर्णग्रहणाभावे ईषनुरिसादोयणो भानिरव ७५

सवर्णदीर्घेण बाधादिति कथं सकललक्ष्यप्राप्तयणपवादत्वमियङादेरिति वाच्यं। बाधकविषयेपि तत्प्राप्तिसंभावनामात्रेण येन नाप्रा
प्तिन्यायविषयस्य सत्वात्। स्पष्टं चेदमहन्नित्यत्र अन्यास्यावसरे लघुशब्देंदुशेखरे। प्रांचइति। सीरदेवादयइत्यर्थः। तेषामयमाशयः। दाश्वा
न्साह्वान्मीढ्वांश्चेति सूत्रे। द्विर्वचनाद्गुणवृद्धी विप्रतिषेधेन भवत इति प्रकृते। तस्य च विचार्य। चिचयिषेत्यादि प्रयोजनमुपपाद्य नेतदस्ति प्रयो
जनं। अस्तु वा द्विर्वचनं तत्र कृते परस्य गुणवृद्धी भविष्यत इति तत्प्रयोजनं निराकृतं। इदं तर्हि प्रयोजनं इयाय इयायिथेत्युक्ते ननु चात्रापि
पूर्वं चेद्यदि द्विर्वचने कृते परस्य गुणवृद्धी भविष्यत इत्याशंक्य न सिध्यति अंतरंगत्वात्सवर्णदीर्घप्राप्नोतीत्युक्ते पुनस्तस्मिन्नाख्यास्यमा
नेन वार्णादांगं बलीय इति गुणवृद्धी भविष्यतः। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गम्यते। आचार्यप्रवृत्तिर्ज्ञापयति वार्णादांगं ब
लीय इति। यदयमभ्यासस्यासवर्णे इत्यसवर्णग्रहणं करोतीत्युक्तं भाष्यकृता। स्पष्टमेवैतद्भाष्यादसवर्णग्रहणमात्रस्य ज्ञापकत्वं मतं
मतेन तु संपूर्णसूत्रस्य भाष्याक्षराननुगुणत्वात्। अन्यथा यदयमभ्यासस्यासवर्ण इति शास्त्रं करोतीत्येवं वदेद्भाष्यकार इति। इदानीं

वि॰ स्वसिद्धांतमाह परेति। सादिना कृत्स्नं तेन। ननु इयेष इत्यामेसां दोलिटि लावस्थायामेव द्वित्वनिमित्ता अरकत्वाभावात् द्विर्वचने चाति निषे
८६ धाप्रवृत्त्या तत्रैव गुणे पूर्वत्र परत्र च वृद्धौ अनंतरं द्वित्वे च कृते इयङ् अभ्यासस्येति सूत्रस्य चारितार्थ्यान्न परिभाषाज्ञापकत्वं वर्ण
यितुं युक्तं। गुणवृद्धिप्राप्तिवेलायां सवर्णदीर्घप्राप्तेरेवाभावादित्याशंकते। नचेति। तं परिहरति। तयोरपीति। अथवा लावस्थाया
मेव विषयसप्तमीकल्पनेन अचो ञ्णितीत्यस्य प्रवृत्त्यापादनं वृद्धिर्वचने चास्यापि प्रवृत्त्यापादनेन तत्रैव पूर्वं द्वित्वे कृते अंतरंगत्वाद्गुण
वृद्धी बाधित्वा सवर्णदीर्घापत्त्या तद्वैयर्थ्यं स्पष्टमेवेति परिहारो बोध्यः। आदेशप्रवृत्तेः परं तु शंकासमाधानं स्पष्टमेव। संप्रसारण
सूत्रस्य ज्ञापकत्वं विघटयितुमाशंकते। नचेति। तं परिहरति। तावन्मात्रेति। पुनस्तद्विघटयितुं स्पष्टद्वये सूत्रचारितार्थ्यमाशंकते।
नचेति। यद्वेति। दाश्वान् साह्वानिति सूत्रे इति शेषः। तदुपपादनं यथेति। अस्य भाष्यकृत्कृतेत्यादिः। अर्थस्येवेति। संपूर्णसूत्रस्येव
त्यर्थः। यद्यपि सवर्णग्रहणमात्रस्य ज्ञापकत्वं भाष्यकृत्संमतं भवेत्तर्हि नह्यंतरेणेत्येवमुपपादनं न कुर्यात् किं तु सवर्णग्रहणे ह्यनुरि ८६

त्यादि सवर्णपराभ्यासनिवृत्त्योऽस्त्यर्थं। न द्वित्वांतरंगत्वाद्दीर्घे सवर्णपरो अभ्यासो भवतीति वदेदिति भावः। तावन्मात्रस्य ज्ञापकत्वे अपि
म भाष्यमतिविरुद्धमित्यर्थमाह। अग्रेपीति। तत्सार्थक्यं। असवर्णग्रहणमात्रसार्थक्यं। समनंतरोक्तरीत्येति भावः। असत्त्वादिति।
भाष्यसंमतासाधारणफलाभावादिति भावः। अस्मदीयमते यथाकथंचित्तस्याः सत्त्वमादायाह। सत्वेपीति। यत्रेति। प्रतीयत्ता
दावित्यर्थः। तत्र अंतरंगकार्यस्य प्रवृत्तियोग्यकालोत्तरकालोपयोगिसत्ति यो कालस्तस्मिन्नेवांतरंगस्य निमित्तविनाशकस्य अ
प्रवृत्तिबहिरंगविधेः प्राप्तिरस्ति यथा तथा प्रकृतेंतरंगदीर्घरूपकार्यप्रवृत्तियोग्यकालोत्तरकाले इयेषतुरित्यवस्थापन्ने दीर्घनिमि
त्तविनाशकस्य पुगंतलघूपधस्येति बहिरंगविधेर्न प्राप्तिरस्तीति न तत्परिभाषाप्रवृत्तिः। अंतरंगकार्यप्रवृत्तियोग्यकालोत्त
रकालिकतन्निमित्तविनाशकबहिरंगविधिप्राप्त्या विधिकरणमेवैतत्परिभाषाप्रवृत्त्यधिकरणमिति ज्ञापकपरभाष्यप्रामाण्ये
न तथैवाङ्गीकारादिति भावः। पुनः प्रकारांतरेण सूत्रस्य चारितार्थ्यमाशंकते। नचेति। अभ्यासस्यासवर्णे इति सूत्रस्यासवर्णपरस्य

चित्०

७० यथाश्रुतार्थपरित्यागप्रसक्त्यासत्यानदीयांशांतरकल्पनेनपरिहरति। प्रसक्त्यासत्येति। ननुविनाप्रमाणंप्रसक्त्यासन्निमात्रेणयथाश्रुतार्थपरि
त्यागोऽयुक्तइत्यतोहेत्वंतरमाह। शास्त्रबाधेति। एतच्चसवर्णग्रहणस्याचिकित्सस्यपरत्वाद्बाधंकृत्वाग्रहणस्यांचोक्तिरीत्यास्यबाधना
र्थंसूत्रमित्येवंकल्पनापेक्षयापरबलीयस्त्वप्रतिपादकपरिभाषाबाधउचितः। पूर्वत्रशास्त्रस्वरितत्वप्रतिज्ञयाऽधिकार्थबोधनेन
परत्वाद्बाधस्यास्याचिकित्साप्रसंगएवोचितइतिभावः। नन्वेवमपिशास्त्रस्यप्रमाणकल्पनद्वारापरिभाषाज्ञापकत्वकल्पनापेक्षयाशा
स्त्रबाधकल्पनमुचितंतस्यलघुत्वात्। किंच। बाधोहिनामनात्रलक्ष्यतावच्छेदकावच्छिन्नवृत्तित्वासंभवरूपः। अपितुअपवादशा
स्त्रानुरोधेनोत्सर्गशास्त्रस्यतदतिरिक्तविषयेसंकोचरूपः। अन्यथाशास्त्रस्याप्रामाण्यापत्तेः। सचनिरुक्तज्ञापकत्वकल्पनापेक्षया
नगुरुभूतोनापिज्ञापकेनवचनांतरकल्पनवद्वचनकल्पनमितिचेन्न। प्रमाणसहकृतशास्त्रबाधकल्पनापेक्षयाऽप्रमाणिकां
तस्यज्ञापकपरभाष्यरूपप्रमाणसहकृतपरिभाषाज्ञापकत्वस्यैवौचित्यमित्याशयात्। एवंतर्हिभाष्यप्रमाणसहकृतप्रसक्तसंभवस्तत्र ७०

स्यासवर्णपदस्यनिरुक्तार्थपरत्वमादायैवशंकासमाधानेसिद्धेकृतंहेत्वंतरकल्पनेनेतिचेदस्तुसमकक्षहेत्वंतरसमुच्चयः। कस्यचिन्मतेन
परिभाषाप्रवृत्तिनिमित्तंदर्शयितुमाह। साचेयमिति। अथवाएवकारस्तदर्थेसचधर्मिग्राहकमानादिस्यास्येयोजनीयः। तथाचध
र्मिग्राहकमानानुसमानकार्येप्रवृत्तिः। तत्रतत्राकरणीयानुतद्भावेपीत्यर्थः सिध्यति। एवंचसमानकार्यित्वेसमाननिमित्तत्वानाग्रह
इतिफलति। यथाश्रुतेत्वेतत्परिभाषाऽनित्यत्वज्ञापनपरोनत्वयंप्रथमविरोधः। विभ्नइत्यादौतुकृत्रादेशयोः समानकार्यित्वाभावादेवपरि
भाषाप्रवृत्त्याप्रसक्तिर्निर्देशानन्तदनित्यत्वस्यज्ञापयितुमशक्यत्वात्। तस्माद्यथाश्रुतंनसाधीयः। समानकार्यित्वइति। समानस्थानिकत्व
इत्यर्थः। अतएवसार्वधातुकमपिदित्यत्रेः पिदिदितिपर्युदासपक्षेऽयंनेत्यत्रेवंनेत्यादौगुणास्यवंनिसत्यादंतरंगत्वाद्वैकादेशकृतेपिस्थि
तोर्जातस्यैकादेशस्यापिस्थाऽगुणनिषेधः स्यादित्युक्तंभाष्ये। विभिन्नकार्यित्वेपाणिपरिभाषाप्रवृत्तौतुनदसंगतिःस्पष्टैवेतिभावः। स
मानकार्यित्वेएवयंप्रवर्त्ततइतिनायंनियमः। अपितुसमाननिमित्तकत्वेएव। अन्यथास्थानइत्यादौयएगुणयोः समानकार्यित्वादेत

चि.नृ. सरिभाषाप्रवृत्त्यागुणा ह्यंतरंगत्वाद्यण्णन स्यादितिसीरदेवादिमतमनुवदति। यस्त्विमादिना। ज्ञापितेफलासिद्धा सूत्रवैयर्थ्येन चरवं स्यति।
७८ तन्नेति। कथं तर्हि स्योनः सिध्यतीत्यत आह। स्योन इत्यत्रलिति। नन्विमाये सांतो इत्यधातोर्लिटि णल्याद्यादेशोद्विर्वचनेचवार्णादागमितिपरिभा
षया वृद्ध्यादेशोपि अचः परस्मिन्निति स्थानिवत्वात्सवर्णपरत्वेनेयङादिनस्यादितिशंकते। नचैवमिति। तत्परिहरति सूत्रारंभेति। यथान्य
थानुपपन्नं परिभाषां ज्ञापयति तथा ज्ञापितायामपि तत्स्यां स्थानिवद्भावाभावं विनाऽनुपपन्नमिदं सूत्रं तमपि कल्पयतीति न दोषः। याव
ता विना यदनुपपन्नं तत्सर्वं तेन ज्ञाप्यत इति न्यायादिति भावः। ननु किमेतत्सूत्रसामर्थ्यादेतद्विषये स्थानिवद्भावाप्रवृत्तिः कल्प्यते आह।
स्थित्वामान्यतोऽभ्यासस्य कार्येकर्त्तव्ये तदुत्तरखंडादेशो न प्रवृत्तिरिति। नाद्यः। आरतीत्यादेरियणादेशस्य स्थानिवद्भावेन रेफपरत्वाभावा
त्कृत्वोपेइति दीर्घानापत्तेः। न द्वितीयः। अरिरिय्रियादिसूत्रस्थानिवद्भावेनेयङानापत्तेः। अत आरतीत्यादिसंग्रहाय अरिरिय्रियादि स्वातिप्रसंग
वारणाय चाह। नचेति। नदेतत्सर्वं दर्शयति। अत एवेत्यादिना। एतेनेमायेयेषसांतो लिटि णल्यादेशो च परत्वाद्गुणवृद्धो च ततो द्विर्वचने चानिस्था ७८

निवद्भावादिकारद्विर्वचते च तस्मिन्निमयङुवङोः कर्त्तव्ययोरचः परस्मिन्निति स्थानिवद्भावादसवर्णपरत्वादिमङादेशः स्यादतः सूत्रस्थमस
वर्णग्रहणं ज्ञापकं भवेत्। नह्यर्थं सज्ञापयत्यनादिष्टादचः पूर्वविधावेव स्थानिवद्भावः। अत एव भाष्ये एवमपि स्थानिवत्वादियङ् न स्यादप्यसस
पि विषयनिषेधेयावता स्थानिवद्भावः। कथमेयेन त्विध्यतिकस्मादेवात्र न भवतीत्याशंक्य योनादिष्टादचः पूर्वस्य विधिं प्रतिस्थानिवद्भावः।न्या
दिष्टाच्चैषाचः पूर्वइतीत्युक्तमिति सीरदेवाद्यभिमतमपास्तं। द्विर्वचनेचीति भाष्येरूपातिदेशास्यैवसिद्धांतितत्वात्। नन्वेवं कतसूत्रसी सी
भाष्यविरोधः। नत्सूत्रस्य भाष्यस्य कार्यातिदेशाभिप्रायकत्वात्। यद्यपि धर्मिग्राहकमानात्समानाश्रये एवेयं प्रवर्त्तते तथापि यजमाचेति
नङोनङित्करणात् आश्रयेपि प्रवर्त्तते। अन्यथा विश्वसृ्त्यादावंतरंगत्वात्तुकि गुणाप्रसक्तात्तद्वैयर्थ्यं स्यादतश्चतेऽइत्याद्वेकादेशात्पूर्वगुण
७८ इतिन्यासकारमतं परा कर्त्तुमाह। इयं चेति। अंगसंबंधिन्यांग एवेत्यत्रैव कारस्य व्युत्क्रमेणान्वयः। तथा चांगे अंगसंबंधिन्येवेत्यर्थः। तथा
सति धर्मिग्राहकमानात्समानकार्यित्व एवेति फलितमिति यजयवेति नङोङित्करणं चरितार्थमिति भावः। अयं तडसारिफत्वं सार्वधातु

चित्र० द्धमिति सूत्रस्य भाष्यविरुद्धमित्यर्थः ध्येयं। भाष्य इति। तत्र हि कुमार्या इदं किशोर्या इदं अग्रण्य इत्युदात्तानुदात्तयोरेकादेशस्तस्यैकादेश उदात्तेनोदात्त इ
७९ त्येतद्भवति। तस्य सिद्धत्वं वक्तव्यं आंतर्यत इति उदात्तस्योदात्त आदेशो यथा स्यादिति एकादेशस्वरोऽन्तरंग इति वार्तिकस्य प्रयोजनं आख्यायमनेन द
र्शितप्रयोजनमेकादेशे कृते उदात्तमणोऽस्पूर्वादित्युदात्तो भविष्यती सुक्ते इदमिह संप्रधार्यं उदात्तत्वं क्रियतामेकादेश इति किमत्र कर्तव्यमिति
तयोभयोरनित्ययोः शास्त्रोपरत्वादुदात्तत्वमिति संप्रधार्य। अंतरंगत्वादेकादेशः कृतेऽन्तरंगता चूर्णाश्चाश्रित्यैकादेशः परस्योदात्तत्वमिति तत्राप
नेरवतदहेश्मिह संप्रधार्य आद्क्रियतामुदात्तत्वं वा किमत्र कर्तव्यमिति सुक्ते उभयोरनित्ययोः परत्वादादित्युक्तं। तच्च पूर्वपक्षिमतं स्वसंगच्छते नाम भा
भाष्ये पदस्योदात्तत्वमिति विभक्त्युदात्तत्वमित्यर्थः। तदेव दर्शयति। तत्र हीति। वस्तुतस्तु नायं सिद्धांतः। शास्त्रेण परिभाषामात्रं ज्ञाप्यते। ननु स
मानाश्रयमेव यस्सापि। एवं च न ऊ... करणमपि सफलं नेतावता तस्यानर्थक्य [illegible] कथ्येतेति लाघवं। इत्यनित्या भाष्यस्य प्रवृत्तानुपरिभाषा
तदनित्यत्वाभ्यां निर्बाध्येति ध्येयं। स्योनस्याद्यर्थमनित्यत्वमावश्यकमेवं केषांचिदपि लाघवेनाहाइयं चानित्येति। अनंत्रेति। इकोगुणवृद्धी। ७९

इति सूत्रस्य वृद्ध्यकं दृष्टुभावेरसर्वः॥ ५४॥ इदानीमंतरंगपरिभाषाया नन्वित्यादिनाति आमिमाशंक्य तां स्वानभिप्रेतान्तनमतसिद्धपरिभाषां
तरणवारयितुमाह। अत्र केचिदिति। तत्र ज्ञापकाकांक्षायामाह। अत्रं चेति। तदेवोपपादयति। तद्धीति। एतेनात्रगोरतद्धितलुकीति सूत्रस्थं
तद्धितग्रहणं ज्ञापकं। अन्यथा दीक्षितास्य इति राजगवीति इत्यादौ सुब्लुकः पूर्वमेवांतरंगत्वाद्धि चतत्सिद्धं स्यात् तत्र्याभावात्तद्व्यर्थं स्यात् तत्सा
मर्थ्याज्ज्ञापितायां परिभाषायां भाविनद्धितलुका अलुक्कृतां तरंगनिमित्तविनाशं दृष्ट्वा टचः प्रवर्त्त्यानुयुक्तरमेवटचः प्रवृत्तेः सत्वात्तत्रालुक्
निषेधाद्धि चूनस्यानर्थतया वश्यकमिति सीरंस्वाद्युक्तमपास्तं। अंतरंगानपीति न्यायमूलमानि इत्वारणेन तस्य साफल्यात्। ननु संतो शिविति
स्यादेएकादेशप्रवृत्तिकाले च च्छेदनरूपप्रासादनुत्तरं च्छेः शाभायनतयांतरंगनिमित्तशब्दविनाशः संभवति। अपवर्गाभावेन तन्निमित्तस्य पृ
थगवस्थितेरभावादिति ज्ञापितायामपि तस्य स्वांशे चारितार्थ्याभाव इति चाशंकते। नचेति। पृथगवस्थितनिमित्तविनाशाभावेऽपि एकादेशवि
नाशाद्वारेण तन्निमित्तविनाश इत्याशयेन परिहरति। तद्वारेणेति। नन्वेवमपि पूर्वोपस्थितनिमित्तकत्वरूपांतरंगैकादेशं दृष्ट्वा बहिरंगायाच्छेर

चि॰न्॰ सिद्धत्वान्तन्निमित्तविनाशः संभवतीत्याशंकते। नचेति। यावतावि नानुपपन्नमिति न्यायेन परिहरति। समर्थग्रहणेनेति। नन्वेवमपि नार्थोऽनया
८० परिभाषया एतदनित्यत्वेनैव सिद्धेरुपदेशादीनां सिद्धेरितियत्त्वित्यादिनानूद्य खंडयति। तन्नेत्यादिना। असिद्धत्वं बोध्यत इति। इदं च पदसंस्कारप
क्षमनभ्युपेत्य क्रमेणान्वाख्यानाश्रयेण बोध्यं। तदाश्रयणे लोकादृशापेक्षया वार्णपरिभाषया वृद्धेः प्राबल्येन तन्निवारणाय समर्थग्रहणस्य सा
र्थक्यात्। ज्ञापकस्य भंगप्रसंगः स्यादिति तदाशयः। नन्वचः परस्मिन्निति सूत्रस्थ लौकिकन्यायेन क्रमेणान्वाख्याने पदसाधुत्वविषयपूर्वोपस्थित
तन्निमित्तस्य कृतत्वरूपांतरंगमादाय तस्मिन्कार्ये भाविबहिरंगस्य निषेधरूपमसिद्धत्वमित्यपि परिभाषार्थ इति सेत्यादि। स्थितिरित्यादितन्नयाद्वृद्धेर्निषेधा
सिद्धप्रयोगेप्यकादेशाश्रवणं स्यात्तन्निवारणाय कुतो नानित्यत्वकल्पनं सफलं भवतीत्यत आह। नत्विति। नत्वमिति। पश्चात्। आम वृद्धिनिषेधरू
पमसिद्धत्वमित्यर्थः। तत्र हेतुमाह। मानेति। ननु तत्र परिभाषायां कर्त्तव्य इति वक्तुं कृते इत्यध्याहारेण ज्ञानेंऽतरंगेपि तन्मात्रबोधनान्मानाभावादिति किं ८०
त्वसिद्धिरतो हेत्वंतरमाह। फलाभावाच्चेति। अनन्यथासिद्धत्वस्य सिद्धिरूपफलाभावादित्यर्थः। एवं चेति। परिभाषायास्तदर्थाभावे चेत्यर्थः। वि

त्रिपाद्यामनित्यत्वज्ञापनासंभवादितिहेतुस्तत्रेत्याशयोऽस्य। कथं तर्हि समर्थग्रहणेनेतद्विषयेनस्या प्रवृत्तेरपि ज्ञापनादित्युक्तिरपि। समर्थग्रहण
सामर्थ्येन परिभाषाया एतदर्थज्ञापनज्ञानेरेतद्विषयेनस्या प्रवृत्तेरपि ज्ञापनादित्याशयेनस्येति बोध्यं। परिभाषाज्ञापकवर्णनावसरेंतरं
गतादीर्घकृतेरसुक्तिलुकानिसंतं। सादावियपूर्वोपस्थितनिकत्वांतरंगमादायैवनतु परिभाषामाश्रित्यैव। अथवा संस्कारपक्षेपदमेत्यादाविवम
कृतेपि परिभाषासंचारमंगीकृत्याह। अंतरंगानपीति। अत्रापिशब्दः कृतमपि कार्यमित्यस्य समुच्चायकः। एवकारेणएतस्यानित्यत्वनिरासः। नन्वे न्वे
वमपि सेदुषद्दास्येत्यथा साक्षान्निमित्तविनाशग्रहणं तथांतरंगानपीत्येतस्य परिभाषाविषये साक्षान्निमित्तविनाशग्रहणे मानाभावः। नसाश्रितं
साक्षान्निमित्तविनाशाभावेनव्यभिचारः। तत्र समर्थग्रहणसामर्थ्यात्तथा कल्पनेप्यमनंतर्थेवसत्त्वात्। एवं च विषयभेदसंभवात्कथमेतस्यांतर्भावइ
त्यत आह। एतन्त्र वचनो वेति। समर्थग्रहणसामर्थ्याज्ज्ञापकपराक्रमरग्रंथसामाण्याच्चनस्वरूपसन्निमित्तस्यैव ग्रहणमित्याग्रहः। अपि तु संभावन
यानिमित्तविनाशस्यापि ग्रहणं। एवं चोभयोरप्येकविषयत्वसंभवस्तेनैतस्यानस्यांतर्भाव इति भावः। अत्रापि शब्दः स्वरूपसन्निमित्तविनाशसमुच्चायकः।

परि॰ एवंचान्तरंगस्यानिमित्तविनाशकस्याग्रहणं। अपितु पूर्वोक्तोभयविधया साक्षान्निमित्तविनाशस्यैवग्रहणमुभयत्रापीति नासंगतिः। अत एवं चेति। संभार
८२ नयापितन्निमित्तताणीकारादेवेत्यर्थः। अंतरंगानपीत्यादितु नातिरिक्तमित्युक्तं। नन्वनतिरिक्तत्वमयुक्तं। वार्णपरिभाषाव्याख्यानावसरे स्पष्टत्वं अंतरंगकार्य
प्रवृत्तियोग्यकालोत्तरमेव तन्निमित्तविनाशकबहिरंगविधेः प्राप्तिस्तत्रैवेतत्परिभाषाप्रवृत्तिरिति सिद्धांतितत्वेन। नयोर्विषयभेदात्। तथाहि गोम
द्रुडिगोमतिप्रियेत्यादावुक्तरीत्या संभवान्नाकृतव्यूहपरिभाषाप्रवृत्तिः। तदप्रवृत्तौ चांतरंगत्वाद्धल्ङ्याब्भ्यादिलोपेनुमादयः स्युरिति तन्निरासप्रसंगवारणाय प्र
थगंतरंगानपीति परिभाषावश्यकीति चेन्न। अंतरंगानपीत्यारम्भसामर्थ्येनेति संभावनाद्वन्तानतिरिक्तत्वोपपादकग्रंथस्य परिभाषांगीकर्तृसिद्धां
तत्वेनादोषात्। केयटस्त्विति। समर्थग्रहणप्रयोजनोपपादनाय किं प्रयोजनं समर्थादुत्पत्तिर्यथा स्यात्। असमर्थान्मा भूदिति किं पुनः समर्थमर्थाभिधा
नेयत्वसमर्थं किं पुनस्तत्कृतवर्णानुपूर्वीकं सोऽर्थिनिवेश्यमाणिरिति भाष्यस्य सोऽर्थिनिरितिप्रतीकमुपादायविभज्यान्वाख्यानं समुत्पित्समस्मा
दपि प्रत्ययः स्यात् नन्वसाधुरिति तिरिस्सनिष्प्रसंगः वार्णादांगमितिवृद्धिप्रसंगात्। नन्वंतरंगत्वात्कार्णेषु कार्येषु कृतेषु भविष्यति। एवं तर्ह्यंत ८२

दनेनसमर्थवचनेन ज्ञाप्यते अस्तीयं परिभाषा अकृतव्यूहाः पाणिनीया इति। तेन पद्युषं तस्युष इत्यादि सिद्धं भवति। सन्न्यंथेनेति शेषः। निमि